बेंगल्लूर् श्रीमन्मध्वसंघ ग्रन्थमाला

श्रीमत्सनत्सुजातीयम्

श्री वादिराज भगवत्पादविरचित भाष्यसहितम्

Bangalore Sriman Madhva Sangha
PUBLICATION SERIES
No. 8

SRIMAT SANATSUJATIYAM

WITH THE COMMENTARY OF
SRI VADIRAJASWAMI

EDITED BY
B. Gururajah Rao, B.A., B.L.,
Retired Sub-Judge.

  Price one Rupee.

PRINTED BY
THE V. B. SOOBBIAH AND SONS.,
AVENUE ROAD, BANGALORE CITY.

PREFACE

Sriman Mahabharatha is according to the Hindu iptures ranked as the fifth Veda. It has been cribed by a recent European writer Mr. E. P. Rice the Holy Bible of some hundred millions of Hindus. his introduction to the analysis and index to the habharatha, he says "It is much more than an : story of the heroic age of ancient India. it is a t repository of Hindu traditional lore, philosophy l legend. It has been the quarry from which natists and Purana writers have drawn much of r materials for fifteen centuries.........................It loses to us an age-long quest, made by a religious-minded people for a solution of the perennial blems of the human race with regard to the tion of the man to the seen and unseen universe, th and thereafter, sin and sorrow, the standard onduct, and the way to eternal bliss."

It is from this quarry that at least five valuable is like the Kohinoor diamonds have been taken and are the everlasting source of inspiration in y Hindu household. They are 1. Bhagavath- 2. Anugita, 3. Bheeshma Sthavaraja, 4. Vishnu isranama, 5. Sanatsujateeya. Sanatsujateeya ntained in the Udyogaparva of Mahabharatha. s the sublime message of salvation imparted to

Mouna (मौन) which is the essence of shastraic wisdon cannot co-exist. The third Adhyaya takes up th thread of the second and continues the description o Mouna (मौन) or shastraic wisdom which is brough about by a devout study of the Vedas and understan ing their real import. The Vedas deal with the (तप (Tapas) rituals, and describe, though not fully, th attributes of the Lord. The relative imp tance of the two and the place which the ritu occupy in the scheme of spiritual evolution are al dealt with in detail. Tapas (तपः) is again divided in three categories ऋद्धं समृद्धं केवलम्. The last kind Tapas alone which is free from all kinds of blemi leads to emancipation.

The blemishes such as anger, lust etc., whic vitiate the spiritual efficacy of the Tapas are th enumerated and described in detail. Each of the it is said graphically, lies in ambush like a wild anim to attack the spiritual aspirant and drag him down its prey. Side by side in refreshing contrast with th dark picture of a psuedo-sage, the glorious attribut of a real yogi who is on the surest way of realizatic of Brahman are described. Of these blemishe कामत्याग—absence of vanity and abandonment of mate rial pleasures—is said to be the most difficult o attainment. It is by the practice of such Tapas as laid down in the Vedas which results in the unclouded

knowledge of Brahman that final release is attained. The study of the Vedas and the mode of their interpretation are also discussed. Finally it is concluded that a real Brahmana is one who has studied the Vedas and understood their real purport in relation to Paramatma.

The study of the Vedas necessarily demands Brahmacharya as its essential condition and the fourth Adhyaya relates to the duties enjoined on a spiritual student. The student, while living under the protection of his Guru, is asked to devolop all the moral qualities which have been eulogised in the second Adhyaya, as the requisites for the proper performance of Tapas. Thus he enriches his mind, while he builds up his character. The Guru is described as one, who, unlike the parents who give only the physical body, endows the Sishya with a spiritual body which is imperishable and immortal and which enables one to reach Brahman. The Adhyaya naturally ends with an attempted enumeration of the characteristics of the Brahman whose knowledge alone ensures immortality.

The fifth Adhyaya which is more or less a repetition of the points mentioned in the third Adhyaya does not find a place in the Bhashya of Sri Shankara as already stated. The sixth Adhyaya deals with the form of that Brahman whose knowledge alone leads

Mouna (मौन) which is the essence of shastraic wisdom cannot co-exist. The third Adhyaya takes up the thread of the second and continues the description of Mouna (मौन) or shastraic wisdom which is brought about by a devout study of the Vedas and understanding their real import. The Vedas deal with the (तप) (Tapas) rituals, and describe, though not fully, the attributes of the Lord. The relative importance of the two and the place which the rituals occupy in the scheme of spiritual evolution are also dealt with in detail. Tapas (तपः) is again divided into three categories ऋद्धं समृद्धं केवलम्. The last kind of Tapas alone which is free from all kinds of blemish leads to emancipation.

The blemishes such as anger, lust etc., which vitiate the spiritual efficacy of the Tapas are the enumerated and described in detail. Each of these it is said graphically, lies in ambush like a wild animal to attack the spiritual aspirant and drag him down its prey. Side by side in refreshing contrast with the dark picture of a psuedo-sage, the glorious attributes of a real yogi who is on the surest way of realization of Brahman are described. Of these blemishes कामत्याग—absence of vanity and abandonment of material pleasures—is said to be the most difficult of attainment. It is by the practice of such Tapas as laid down in the Vedas which results in the unclouded

knowledge of Brahman that final release is attained. The study of the Vedas and the mode of their interpretation are also discussed. Finally it is concluded that a real Brahmana is one who has studied the Vedas and understood their real purport in relation to Paramatma.

The study of the Vedas necessarily demands Brahmacharya as its essential condition and the fourth Adhyaya relates to the duties enjoined on a spiritual student. The student, while living under the protection of his Guru, is asked to devolop all the moral qualities which have been eulogised in the second adhyaya, as the requisites for the proper performance of Tapas. Thus he enriches his mind, while he builds up his character. The Guru is described as one, who, unlike the parents who give only the physical body, endows the Sishya with a spiritual body which is imperishable and immortal and which enables one to reach Brahman. The Adhyaya naturally ends with an attempted enumeration of the characteristics of the Brahman whose knowledge alone ensures immortality.

The fifth Adhyaya which is more or less a repetition of the points mentioned in the third Adhyaya does not find a place in the Bhashya of Sri Shankara as already stated. The sixth Adhyaya deals with the form of that Brahman whose knowledge alone leads

to salvation and the way in which the Sages have realized that Brahman.

Thus it is seen that this short episode in the Mahabharatha contains in an attractive form the nucleus of the entire philosophy expounded in the Vedas and the Upanishads commencing with the daily human conduct and leading up to the final emancipation. The commentary on this by Sri Vadiraja Swamy is at once simple and illuminating. This epitome of philosophy contained in the original text and elucidated by this splendid commentary must serve as a moral guide book in the hands of those who aspire for spiritual knowledge. The Sriman Madhva Sangha of Bangalore which has undertaken the printing of this book as one of its serial publications will feel amply rewarded if it will only serve to stimulate further spiritual study in those who take the trouble to read it themselves or have it explained by others.

Dated
11th July 1940

B Gururajah Rao,
President of the
Sriman Madhva Sangha, Bangalore.

॥ श्रीमन्महाभारतम् ॥

॥ उद्योगपर्व ॥

॥ सनत्सुजातीयपर्व ॥

॥ वैशम्पायन उवाच ॥

ततो राजा धृतराष्ट्रो मनीषी संपूज्यवाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते महात्मा पप्रच्छ बुद्धिं परमांबुभूषन् ॥१॥

॥ श्री गुरुराजो विजयते ॥

॥ श्रीमत्सनत्सुजातीय व्याख्यानम् ॥

॥ श्रीवादिराजीयम् ॥

मुद्रापुस्तकशंखाक्षविद्योतितकराम्बुज । हृद्यवैष हयग्रीव मद्ध्यानविषयोभव ॥१॥ आचार्योक्तेन मार्गेण तेषामेव कृपाबलात् । सनत्सुजातवाक्यानि विषमाणि विवृण्महे ॥२॥

ॐ ॥ साक्षाद्यमावतारो विदुरः स्वावरधृतराष्ट्रनामकगन्धर्वरूपिणमवतारदशायां क्षत्रियकुले अग्रजत्वेनोत्पन्नमसुरावेशवशाद्दुष्ट-

पुत्रस्नेहसङ्गजनितमहापापागतनरकाद्यनर्थभागिनं धृतराष्ट्रमुद्धर्तुकामस्त्वादौ गुडजिह्विकान्यायेन स्वोपदिष्टाध्यात्मज्ञानोपगर्भितसन्नीतिशास्त्रश्रवणेन तस्य वेदान्तशास्त्रश्रवणाभिरुचिमुदपादयत् । ततो धृतराष्ट्रः पूर्वं शोकमोहादितप्तोपि स्वोत्तमगुरुविदुरोपदेशेन जातविरागः "तरति शोकमात्मविदि"ति नियमादात्मनः शोकापनोदाय ब्रह्मविद्यां श्रोतुकामः पुनर्विदुरमपृच्छत् । 'अनुक्तं यदि ते किञ्चिद्वाचा विदुर विद्यते । तन्मे शुश्रूषतो ब्रूहि विचित्राणीह भाषसे '॥ इति धृतराष्ट्रप्रश्नानन्तरं 'धृतराष्ट्र कुमारो वै यः पुराणः सनातनः । सनत्सुजातः प्रोवाच मृत्युर्नास्तीति भारत ॥ स ते गुह्यान्प्रकाशांश्च सर्वान् हृदयसंस्थितान् । प्रवक्ष्यति महाराज सर्वधर्मभृतांवर' इति विदुरवाक्यानन्तरं "किमेष वेद तत्सर्वमित्येकेन श्लोकेनात्मज्ञानं तवैवास्ति चेत्त्वमेव मामुपदिशस्वेति धृतराष्ट्रोऽब्रवीत् । इति तद्वाक्यसमनन्तरं ब्रह्मज्ञानसंपन्नोपि विदुरः स्वात्मनः शूद्रजात्युत्पन्नत्वेन तदनर्हत्वं वेदान्तोपदेशो ब्राह्मणानामेवऽधिकारो, नान्येषामिति ज्ञापयन् 'शूद्रयोनावहं जात' इति श्लोकद्वयेन स्वात्मनो वेदान्तार्थोपदेशानधिकारित्वमभिधायातः परं सनत्सुजातमेव पृच्छस्वेत्याह । एवमुक्तो धृतराष्ट्रः परमहंसाश्रमिणो योगिप्रत्यक्षविषयस्य सनत्सुजातस्यायोगिनो मम द्रष्टुमशक्यत्वात्त्वमेव तं मे दर्शयेति 'ब्रवीहि विदुर त्वं मे' इत्येकेन श्लोकेन पुनः प्रार्थयामास । अनन्तरं विदुरः सनत्सुजातमस्मरत् । ततस्तच्चिन्तितं ज्ञात्वा झडिति सनत्कुमारः प्रत्यक्षोऽभूत् । ततो विदुरस्तं प्रतिपूज्य राज्ञे दर्शयित्वा तच्छोकापनोदाय 'भगवन्संशयः कश्चिदि'ति श्लोकचतुष्टयेनाभिप्रेतं पृच्छतीत्याह तत इति ॥ ततो ("भगवन्संशयः कश्चिद्धृतराष्ट्रस्य मानसः । यो न शक्यो

मयोद्धर्तुं त्वमस्मै वक्तुमर्हसी"ति, विदुरवाक्यानन्तरं) विदुरवाक्यो- परमानन्तरं मनीषी राजा धृतराष्ट्रः (विदुरेरितं तद्वाक्यं) तत् विदुरेरितं नीतिरूपं वाक्यं संपूज्य संमान्य रहिते (एकान्ते) दुष्टजनरहिते एकान्तस्थल इत्यर्थः । 'सनत्सुजातमि'त्यत्र सनदित्यव्ययं । अव्यया- नामनेकार्थत्वादत्र नित्यार्थं । तथा च सनत् नित्यो भगवान् सनत्कुमारनामा सुष्टु जातोऽभिव्यक्तः । 'जनी प्रादुर्भाव' इति धातोः । उक्तं च भगवत्पादैः "प्रादुर्भावो हरेर्जनि" रिति । कामस्वरूपसनत्कुमारविषये तु सनत्-हिरण्यगर्भाख्यं ब्रह्मसुष्ठु । तस्मा- ज्जातः ज्ञानवैराग्यादिसंपन्नः परमहंसराट् सनत्कुमारः । स एव सनत्सुजातः । ब्रह्मपुत्रे सनत्कुमारनाम्नो हरेरावेशोस्ति । तत्र प्रमाणं—'स एव प्रथमं देवः कौमारं सर्गमास्थितः । चचार दुश्चरं ब्रह्म ब्रह्मचर्यमखण्डितमिति' श्रीमद्भागवते ॥ "कुमारो नाम भगवान्स्वस्मात्स्वयमजायत । दिदेश ब्रह्मणे (ब्रह्म) ज्ञानं ब्रह्मचर्ये स्थितो विभुः ॥ यस्मात्सनत्कुमारश्च ब्रह्मचर्यमपालयत् । यस्स्थाणोः स्थाणुतां प्रादाद्भगवानव्ययो हरि (रिति ब्रह्मांडवचनेन सिद्धं) रित्यनेन श्रीमद्भागवततात्पर्योदाहृतब्रह्मांडवचनेन ब्रह्मपुत्रादन्यः साक्षात्सनत्कु- मारनामा भगवानप्यस्तीति ज्ञायते । केचित्तात्पर्यापरिज्ञानिनः ब्रह्मपुत्रसनत्कुमारमेव अनन्याविष्टितयासंगिरंते । अप्रामाणिकत्वादे- तदुपेक्षणीयं ॥ एवं भूतगुणविशिष्टं तं पप्रच्छेत्यन्वयः । किं कुर्वन् सन्? परमां परापरतत्त्वविचार विषयत्वेनोत्तमां बुद्धिं बुभूषन् । 'भू प्राप्ता' विति धातोः प्राप्तुमिच्छन् । यद्वा परमां । परं पूर्णा- नन्दाद्वितीयत्वादिगुणविशिष्टत्वेन जगतोत्यन्तभिन्नम् भगवन्तं मीयते

ज्ञायतेऽनयेति परमामिति ॥ सनत्कुमार इति पाठेऽर्थः स्पष्ट एव ॥१॥

धृतराष्ट्र उवाच ॥ सनत्सुजात यदिमं शृणोमि मृत्युर्हि-
नास्तीति तवोपदेशं । देवासुराद्याऽचरन्त्रह्मचर्यं
(देवासुराभ्यंतरचारिणस्ते) ह्यमृत्यवे तत्कतरन्नु
सत्यम् ॥२॥

एवं विदुरमुखाच्छ्रुतसन्नीतिशास्त्रः प्रारब्धवशाद्दुष्टपुत्रसंगतिवशेन विस्मृतपरापरतत्वज्ञानोऽपि परमसज्जनविदुरसङ्गजनिततात्कालिकविषय-वैराग्यवत्वेन सनत्सुजातोक्तपरतत्वजिज्ञासुर्धृतराष्ट्रः प्रासंगिकतया प्राग्विदुराच्छ्रुतं सनत्सुजातोपदिष्टं मृत्युर्नास्तीति वाक्याभिप्राय-मजानंस्तदभिप्रायमेवादौ पृच्छति---**सनत्सुजातेति** । हे **सनत्सुजात** सनत्कुमार ! **यत्** यस्मान्**मृत्युर्नास्तीति** त्वया शिष्यान्प्रति उपदिष्टमिति विदुरोक्तं **तवोपदेशंशृणोमि** । तेन कस्यापि लोके मृत्युर्नास्तीत्यव-सीयते । छान्दोग्ये तु "एकशतं ह वै वर्षाणि मघवा प्रजापतौ ब्रह्मचर्यमुवास, तदोभये देवा असुरा अनुबुबुधिरे" इत्याद्यारभ्य "तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतु" रित्यादिनेंद्रविरोचनयोर्मृत्योरभावाय ब्रह्मचर्याचरणादिप्रयत्नाचरणस्य श्रूयमाणत्वाच्छ्रुति-भवदुक्तयोर्विरोधः प्रतीयते । मृत्युरस्तीत्यपि च ज्ञायते । तस्यैवाभावे तदभावाय प्रयत्नानुपपत्तेः । अतस्तत् तयोः मृत्युसद्भावासद्भावपक्षयोः **कतरत्** कः पक्षः **सत्यमिति** नु निश्चयेन ब्रूहीति शेषः । हीत्यनेनास्यार्थस्य प्रसिद्धिरिति ज्ञायते ॥ **देवासुराभ्यन्तरचारिणस्त** इत्यत्र देवानाम-सुराणामभ्यन्तरे अन्तर्हृदिचारिणः कामरूपेण (कामावतारसनत्कुमारा-

विष्टस्यभगवतः सर्वान्तर्नियामकतया कामरूपेण) संचरत इत्यर्थः । अनेनमृत्योरभावे मृत्युपरिहाराय देवैरमृतपानं किमर्थं कृतमसुरैश्च अमृत्यवेरुद्रादीन् प्रतिउग्रंतपः कस्मात्कृतमिति ध्वनयति ॥ २ ॥

सनत्सुजात उवाच ॥ अमृत्युः कर्मणा केचिन्मृत्युर्नास्तीति चापरे । शृणु मे ब्रुवतो राजान्यथैतन्माविशङ्किथाः ॥३॥

एवं धृतराष्ट्रपृष्टः सनत्सुजातः **मृत्युसद्भावासद्भावरूपयोरुभयोरपि** पक्षयोः केषां चित्केषां चिज्ज्ञानसंमत्या सत्यत्वासत्यत्व (स्वाभाविकास्वाभाविकत्वं) विवक्षेति वक्ष्यन् तत्तज्ज्ञानिमतं प्रतिजानीते **अमृत्युरिति** । हे राजन् यद्यपि मृत्युरस्ति तथापि तदभावः । कर्मणा वेदोदितस्वोचितकर्मानुष्ठानेनेति केचित्तुज्ज्ञानिनः संगिरन्त इति शेषः ॥ यद्वा **अमृत्युः** मृत्युशब्दवाच्य संसाराभावः । मोक्षो वा । कर्मणा सर्वं करोति जानातीति कर्मशब्दवाच्यो भगवान्, तेनेति वा ॥ **अपरे** अन्ये केचन ज्ञानिनस्तु मृत्युरेव नास्तीति संगिरन्ते । चेत्येतदवधारणार्थे । यथैतत्पक्षद्वयं परस्परमविरुद्धं तथा ब्रुवतो मे शृणु । मा विशङ्किथाः मदुक्तौ शंकां मा कृथाः ॥ ३ ॥

उभे सत्ये क्षत्रियाद्यप्रवृत्ते मोहो मृत्युः सम्मतो यः कवीनां ॥ प्रमादं वै मृत्युमहं ब्रवीमि सदा प्रमादममृतत्वं ब्रवीमि ॥ ४ ॥

अत्र श्लोके देहवियोगरूपमरणाख्यो मृत्युर्न विवक्षितः । तस्य आब्रह्मपर्यन्तं प्रत्यक्षसिद्धत्वात् । किन्तु स्वतोऽछेद्याभेद्यात्मकत्वेन । संसारिणो जीवस्येश्वरेच्छया प्राप्तसंसार एव मृत्युरिति अस्तित्ववादीनां

पक्षः। ईश्वरेच्छया यदाकदाचिद्वापि तन्नाशस्यावश्यं भावित्वात् जीवस्याविनाशित्वमंङ्गीकृत्य नास्तित्ववादीनां पक्षः इत्युभयोरपि सत्यत्वमिति स्वान्योभयविवज्ञानिमतं पूर्वार्धश्लोकेनाभिधायोत्तरार्धश्लोकेन मिथ्याज्ञानस्यैव मृत्युशब्दवाच्यत्वमङ्गीकृत्याह; 'मृत्युर्नास्तीति प्रब्रवीमी' ति स्वमतमप्युपदिशति उभे इति ॥ हे **क्षत्रिय! आद्यप्रवृत्ते** आनादितः प्राप्ते मृत्युरस्ति, नास्तीति वाक्ये **सत्ये** यथार्थभूते। अर्थाव्यभिचारिणीत्यर्थः ॥ ननु एकस्मिन्नधिकरणे परस्परविरुद्धधर्माधिकरणयोरुभयोर्याथार्थ्यकथने कोभिप्राय इति तत्राह **मोह इति**। 'मुह्‌ वैचित्य' इति धातोः। मुक्त्यधिकारिणां सात्विकजीवानां स्वबिंबोपास्तिमपहाय देहगेहासक्तिनिमित्तकविपरीतज्ञानमूलकसंसार एव **मृत्युः**। तमोधिकारिणां तु मुख्यतया स्वात्मना क्रियमाणस्वबिंबैक्योपासनामपहाय वेदविहितधर्माचरणसहकृत-विपरीतज्ञानमूलक संसार एव **मृत्युः**। सचास्ति सर्वेषामित्यस्तित्ववादीनां पक्षः ॥ नास्तीत्ववादीनां पक्षे तु **अमोहः अमृत्यु** रिति पदच्छेदः। **अमोहः** बाह्यसंशयविपर्ययज्ञानाभावः। मुक्तिदशेत्यर्थः। स एवामृत्युरिति तादृशमृत्युर्मुक्तौ नास्तीति नास्तित्ववादीनां पक्षः। इदं तु राजसतामससात्विकानां सममेव। सर्वेषांतु लिङ्गभुक्त्यानंतरं अपुनरावृत्तिनियमात्। **कवीनां** ज्ञानीनां **मोहोऽमोह** एव **मृत्युरमृत्यु** रिति **संमतः** ॥ तव संमतः कीदृशीत्याशंकायां स्वसम्मतिमाह, **प्रमादमिति**। 'प्रमादोऽनवधानते' त्यभिधानात प्रमाद्यतेऽनेनेति प्रमादोहंकारः स्वात्मनि कर्तृत्वमिथ्याज्ञानमित्यर्थः मन्मते स एव **मृत्युः**। अनुत्थानतमःसाधनत्वात्। **सदा** सर्वदा **अप्रमादं** अविद्यमानस्वात्मकर्तृत्वरूपमिथ्याज्ञानराहित्यं **अमृतत्वं**

अमृत्युरिति **ब्रवीमीति** । तर्हि मृत्युरेव नास्तीति तवोक्तेः कोभिप्राय इत्याशंकायां स्वतश्चिदानन्दात्मकस्य सात्विकजीवस्य स्वभाव विपरीत चिदाद्यात्मकजीवस्य चास्मदभिप्रेतमृत्युशब्दवाच्यसंसारादेरस्वाभाविकत्वाभिप्रायविवक्षया नास्तीत्युक्तिरिति भावः ॥४॥

अहंकारानहंकारशब्दपर्यायशब्दवाच्यप्रमादाप्रमादशब्दशब्दित मृत्व्यमृत्व्योर्वैरिवत्पराभवकारणत्वब्रह्मभावकारणत्वे दृढीकुर्वन् देवासुरयोः स्वभावं तयोर्गतिं चाह **प्रमादादिति—**

प्रमादाद्वा असुराः पराभवन्नप्रमादाब्रह्मभूताः सुराश्च ॥
नवै मृत्युर्व्याघ्र इवात्ति जन्तून्नचास्य रूपमुपलभ्यते ह ॥५॥

प्रमादात् विश्वं मिथ्या; ब्रह्म निर्गुणं; जीवश्चब्रह्माभिन्नः; वेदोऽप्रमाणमित्यादिरूपमिथ्यज्ञानात् । **वा** इत्यवधारणे। एवंभूतमिथ्याज्ञानादेव **असुराः** विष्णुवैष्णवद्वेषिणः कल्यादयो दैत्याः **पराभवन्** पराभूताः अभवन् । इहलोके पराजयाद्यनिष्टं, परत्रान्धतमःप्राप्तिलक्षणं पराजयं प्राप्ता इत्यर्थः । **सुराश्च** मुख्यप्राणप्रभृतयो देवाः **अप्रमादात्** विश्वं सत्यं, हरिः कर्ता, जीवोऽन्यः परमार्थतः, वेदाः सत्यं, प्रमाणं चेत्युक्तं तत्वज्ञानजन्येश्वरापरोक्षज्ञानप्रयुक्तत्वेन प्रमादाभावात् **ब्रह्मभूताः** 'भू सत्तायामिति' धातोः ब्रह्मणि स्थिताः । तन्निष्टमनस्काः तथा तत्रैव स्थितिमन्तो मुक्ता इति यावत् । अभवन्निति शेषः । अथवा "बृह वृद्धावि" ति धातोः मुक्तिदशायामानन्दाभिवृद्धिमन्तो अभूवन्निति वा ॥ ॥ ननु सर्वजनमारकप्रसिद्धमृत्युरेवात्र विविक्षितः किं नस्यादिति चेत् आयुषः क्षये सर्वेषां देहपातस्य अवश्यभावित्वनियमात् मृत्युशब्दवाच्यदेवस्य जनमारणविषये हर्याज्ञया निमित्तमात्र-

त्वान्महाप्रलये तस्यापि च मृतिधर्मविशिष्टत्वेन नियमादिदानीं मरणदशायां केनाप्यदृष्टस्वरूपत्वाच्चात्र प्रसिद्धो मृत्युः **व्याघ्रवत्प्रत्यक्षीभूय जन्तून्** प्राणिनः यदा कदा वा नैवात्ति आयुषः क्षय एवेति भावः। जनमारकस्यमृत्योः रूपमपि केनापि नैवोपलभ्यते । प्रमादाख्यमृत्योः रूपं तु असुराणां तदात्म्यविवक्षया अपरोक्षदशायां लभ्यत एवेति प्रमाद एवात्र विवक्षित इत्यतोऽत्र **हे**त्यव्ययबलान्न वै मृत्युरित्युत्तरार्धस्य पौनरुक्त्यान्वेतव्यम् । तथाहि--यः प्रसिद्धो **मृत्युर्व्याघ्र इव** अलक्षितः सन् **जन्तून्**प्राणिनः **आत्ति** भक्षयति सः मृत्युः **न वै** अत्रविवक्षितो नैव । कुत इति चेत् । यतो अस्मद्विवक्षितप्रमादाख्यमृत्योरसज्जीवस्वरूपत्वात्तस्य च मुक्तिदशायां प्रत्यक्षविषयत्वाज्जनमारकस्य मृत्योस्तदभाववदतोऽत्र प्रमादाख्यमृत्युरेव विवक्षित इति ॥ ९ ॥

एवं सनत्सुजातेन मृत्युरूपसंसारभयं परिहृत्य स्वरूपानन्दाविर्भावकारणं ज्ञानमेव, नान्यदिति श्रुत्यादिसम्मत्या श्रुतज्ञानविभवो धृतराष्टः दुःखाभावसुखप्राप्तये श्रुत्युक्तज्योतिष्टोमादियज्ञानुष्ठानजनितसुकृतेनापि स्वर्गादिलोकप्राप्तिश्रवणात्कथमन्ययोगव्यवच्छेदकतया ज्ञानस्यैव मुख्यकारणत्वमिति शङ्कां मनसि निधाय ज्ञानस्यैव मुख्यत्वप्रतिपादकानां, कर्मणश्चापि मुख्यत्वप्रतिपादकानां "नान्यः पन्था अयनाय विद्यते" ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादीनां श्रुतिवाक्यानां परस्परविरोधमाशङ्क्यात्र ज्ञानिनां प्रवृत्तिः कथमिति पृच्छति तथाच एवंपृष्टः सनत्सुजातः अध्यात्मरीत्या प्रमादाख्यमिथ्याज्ञानस्य मृत्युशब्दवाच्यत्वमभिधायायेदानीं मुख्यामुख्यभेदेन लोकसिद्धमृत्युदेवतास्वरूपमुभयविधरहितं भगवत्स्वरूपं चोपदिशति **यमामिति**—

यमं त्वेके मृत्युमतोऽन्यमाहु (रात्मावासममृतं) रात्मा वासीदमृतं ब्रह्मचर्यं। पितृलोके राज्यमनुशास्ति देवः शिवः शिवानामाशिवोऽशिवानां ॥६॥

यममिति एके ज्ञानिनः **यमं** यमाख्यदेवं **मृत्युं** जनमारक-मृत्युदेवतां **आहुः**। केषांचित्पक्षे अमुख्यमारकादीनामपि मृत्युशब्द-वाच्यत्वास्याङ्गीकृतत्वात्तद्व्यावृत्त्यर्थं 'यमं मुख्यमाहु' रित्यर्थद्योतकस्तु-शब्दः। यद्वा "मृत्यु मृत्योश्च मारकमिति" प्रमाणात् **एके** भगवत्स्वरूपविदो ज्ञानिनः **अतः** मृत्युशब्दवाच्ययमादिभ्यः **अन्यं** विलक्षणं नरसिंहं **मृत्युं आहुः** सर्वमारकं प्रसिद्धं मृत्युमाहुः॥ तल्लक्षणान्याह **यमामित्यादिना**। **यमं** सर्वप्रेरकं॥ 'आत्मावासीदि'ति पाठे तु "आत्मा वा इदमेक एवाग्र आसीत्" "शिष्यते शेषसंज्ञा" इत्यादि श्रुतिस्मृतेरर्थतः प्रतीकग्रहण "मात्मा वासी" दिति जगदुत्पत्तेः प्राङ्महाप्रलयेपि पूर्णसच्चिदानन्दाद्यात्मतया मुख्यतः सर्वस्वातंत्र्येण विद्यमानमित्यर्थः॥ पुनः कथंभूथं नरासिंहं? **अमृतं** मृतपदोक्तनाना-विधवस्तुविलक्षणं। "तदेव सत्यममृतं तद्ब्रह्म तदाहु" रिति श्रुतिः। नानाविधमृत्युरहितमिति वा। पुनः कथंभूतं? **ब्रह्मचर्यं** "ब्रह्म वेदस्तत्व-मिति" प्रमाणात् ब्रह्म वेदः, तेनचर्यते ज्ञायत इति ब्रह्मचर्यं; "चरगति भक्षणयो" रिति धातुः, गत्यर्थानां ज्ञानार्थत्वात्। यद्वा ब्रह्म पूर्णं, चर्यं सर्वभक्षकं। एतादृशं नरसिंहाख्यं वस्तु कुत्र स्थित्वा संहरतीत्या-कांक्षायामाह **पितृलोक इति**। **पितृलोके** यमलोके **राज्यं अनुशास्ति** यमादीननुशास्ति। "रामो यमसभातल" इति वचनात्। यद्वा "नृसिंहो

ब्रह्मसदने रामो यमसभातले। उपेन्द्रश्चामरावत्यां स्थित्वा तत्रानुशास्ति हि" इति वचनात् प्रमाणबलात् भगवतः पिताचतुर्मुखः, आदिवराहस्य चतुर्मुखब्रह्मणो जनिश्रवणात्; **पितृलोके** सत्यलोके **राज्यं** सहभोगरूप राज्यम् **अनुशास्ति,** ब्रह्मणा सहेति शेषः। क्रीडादिगुणविशिष्टस्य नृसिंहस्य ब्रह्मपुत्रतादोषाभावसूचनाय **देव** इत्युक्तं। सत्यलोके भगवान्-ब्रह्मणापूज्यमानो वसतीत्येतत् "अथोसुराणां प्रवरः सुरार्चितः स्वयैक-तन्वा न्यवसत्सुरालये" इत्यदि प्रमाणासिद्धं॥ यमादिदेवानां लोके स्थितस्य श्रीनृसिंहादिरूपिणः श्रीनारायणस्य राज्यानुशासनप्रकारमाह **शिवइति। शिवानां** यमलोकमागतानां पुण्यशीलानां प्राणिनां **शिवः** माङ्गल्यप्रदः धर्मरूपेण स्वर्गादिलोकप्रदः **अशिवानां** पापशीलानां यमलोकमागतानां प्राणिनां **अशिवः** भयंकररूपेण नरकयातनादिप्रद-स्तिष्ठति। सत्यलोकेपि **शिवानां** मुक्त्याधिकारिणां सत्यलोकं प्राप्तानां सात्विकानां प्राणिनां **शिवः** मुक्तिप्रदः। **अशिवानां** तामसानां **अशिवः** तमआदिप्रदः। एवंभूतो भगवान्नारायण एव नृसिंहादिरूपेण सर्वमारकमृत्युशब्द इति सिद्धं॥६॥

सनत्सुजातः एवं प्रसङ्गात् प्राप्तसिद्धमृत्युदेवतास्वरूपमभिधाये-दानीं पुनः स्वोक्तमिथ्याज्ञानात्मकप्रमादाख्यमृत्योरुत्पत्तिकारणं, क्रोध-मोहयोरपि तदंशत्वं, तत्संबन्धेनैव जीवस्य अज्ञानेन कुमार्गवर्तित्वं चेत्याद्युपदिशति—**आस्यादिति**।

आस्यादेष (अस्यादेशात्) निःसरते नराणां क्रोधः
प्रमादो मोहरूपश्च मृत्युः। अहं गतेनैव चरान्विमार्गान्न

चात्मनोयोगमुपैति कश्चित् ॥७॥

एषः प्रमादाख्यो मृत्युः **आस्यात्** अनादितः प्राप्तलिङ्ग-संबन्धादुत्पन्नस्वात्मन्यविद्यमानमिथ्याभूताहंकारात् **निःसरति** उत्पन्नो भवति। चेत्यव्ययबलाज्जीवस्येति शेषः॥ दुरहंकारस्याऽऽस्यशब्दवाच्यत्वे नियामकमाह "सर्वदाक्षेपसंयोगादसुधातुसमन्वयात्। आस्य इत्युच्यते घोरो (ह्यहंकारो) ह्यसुषु स्थित" इति। (गुणो महानितिवापाठः) **अस्य** सर्वस्वामिनः श्रीनारायणस्या**देशात्** आज्ञाशक्तेः सकाशात् **एषः** प्रमादाख्यो मृत्युः **निः सरति** उत्पन्नो भवति। अत्रापि **च** शब्द-बलाल्लिङ्गसंबंध एव हेतुरिति अन्वेतव्यम्॥ किमात्मकोसौ प्रमादाख्यो मृत्युरित्याशङ्कायामाह—**क्रोधो मोहरूपश्चेति**। क्रोधमोहात्मक इत्यर्थः। **एष** जीवः **अहंगतेन** मिथ्याभूताहंकारादुत्पन्नप्रमादाख्यमृत्यु संबन्धेन **विमार्गात्** श्रुतिस्मृतिविरुद्धनानाविधदुर्मार्गात् **चरन्** आचरन् **आत्मनः**। आत्मन इति विषयसप्तमी। परमात्मनो विषय इत्युक्तं। **योगं** "आत्मावारेद्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्ये" त्यादावुक्तं ज्ञानं **नोपैति** न प्राप्नोति॥ ननु तर्हि मिश्रितमिथ्याज्ञान-कत्वेन राजसतामसानां तदस्तु। स्वतश्चिदानन्दाद्यात्मनां सात्विकजी-वानां कथमितिचेत् **कश्चिदिति**। कश्च चिच्च कश्चित्। कं सुखं, चित् ज्ञानं, तदुभयात्मकोऽसात्विको जीवः कश्चिदित्युच्यते। **चाप्यर्थे**। कश्चित् सात्विकोपिजीवः "यावलिंङ्गान्वितो ह्यात्मा तावत्कर्मनिबन्धनः" इत्यादिना संसारदशायां **अहंगतेनैव विमार्गानाचरन् आत्मनो योगं** भगवत्तत्वज्ञानं **नोपैति** ॥७॥

ते मोहितास्तद्वशे वर्तमानाः अतः प्रेतास्तत्र पुनः पतंति ।
ततस्तं देवाः अनु परिप्लवन्ते ततो मृत्युर्मरणादभ्युपैति ॥८॥

एवं मिथ्याभूताहंकारादुत्पन्नप्रमादाख्यमृत्युसंबन्धकृतात्मविस्मृतिकारणीभूतदुर्मार्गप्रवृत्या तेषां दिवनिरियादिषु पौनः पुण्येन परिभ्रमणात्संसारादनुत्थानप्रकारमाह **त इति । तद्वशे वर्तमानाः** प्रमादाख्यमृत्युवशे स्थिताः अत एव **मोहिताः ते** संसारदशां प्राप्ताः प्राणिनः **अतः** अस्मान्मनुष्यलोकात् **प्रेताः** मृताः सन्तः **तत्र** नरकादिषुकिञ्चित्कालमुषित्वा स्वकृतकर्मफलमनुभूय **पुनः** पापादिशेषेण वर्षादिक्रमाद्दैववशात्**पतन्ति** मानुषं गर्भमाविशन्ति । **ततः** मानुषगर्भप्रवेशानन्तरं **तं** मानुषगर्भस्थं देहं **देवाः** हरिमुख्यप्राणप्रभृतयः तत्वाभिमानिनो देवाः **अनु** क्रमेण **परिप्लवन्ते परि** परितः स्वाभिमतेषु स्थानेषु प्लवन्ते प्रविशन्ति । **ततः** तत्वदेवताप्रवेशानन्तरं **मृत्युः** मृत्युदेवतापि तं देहंप्रविशन्ति ॥ तत्वदेवानां मृत्युदेवतायाश्च तस्मिन्देहे यावन्तं कालमवस्थितिरित्याशंकायामाह **मरणादिति** मरणादित्येतत ल्यब्लोपे पञ्चमी । आमरणं यावद्देहपातमित्यर्थः । ततः मरणान्तरं अयं देही **अभ्युपैति** पुनर्जन्मेति शेषः । "जातोजातोमृतोमृत" इति प्रमाणात् । मरणानन्तरं पूर्ववन्नरकादिषूषित्वा पुनः कर्मोपचितं देहं पुनर्मृत्युं जन्ममरणसंबन्धारूढो न कदाचिन्मुच्यत इत्यर्थः ॥८॥

कर्मोदये कर्मफलानुरागास्तत्रानुयान्ति न तरन्ति मृत्युम् ।
सदर्थयोगानवगमात्समन्तात्प्रवर्तते भोगयोगेन देही ॥९॥

एवं प्रमादाख्यमृत्युसंसर्गेण पुनः पुनः जननमरणादिरूपसंसारा-

दनुत्थाने किं कारणमित्याशङ्कायां विषयानुरागा एव मुख्यकारणमित्याह **कर्मोदयेति** । "स्वर्गकामो यजेत" "यदास्यामिमे दिष्टे" त्यादिवाक्यैर्बहिर्मुखानां कृत काम्यकर्मिणां प्राणिनां **कर्मोदये** नश्वरकर्मफलोदये सति **कर्मफलानुरागाः** स्रक्चन्दनवनितादिभोगरूपकर्मफल एव स्नेहोपेताः सन्तः **तत्र** तदवसानेपि बलवत्संस्कारवशात्पुनरपि तादृशकाम्यकर्मानुष्ठानायानु**यान्ति** पुनः पुनः प्रवर्तन्ते । अत एव **मृत्युं संसारं न तरन्ति** । संसारसमुद्रोत्तारं न प्राप्नुवन्तीत्यर्थः ॥ ननु "न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुते" "कर्मणैव हि संसिद्धमास्थिता जनकादयः" इत्यादिना कर्मणोपि मोक्षसाधनत्वश्रवणात्कथमुच्यते श्रुत्युक्तकर्मानुष्ठायिनां संसारानुत्थितिरित्यत आह **सदर्थेति** । **सदर्थयोगानवगमात्** । "अनेवंवित्पुण्यं कर्म करोति तद्धांस्यांऽततः क्षीयत एवे"ति श्रुतेः सदर्थस्य भगवदनुसन्धानपूर्वकत्वेन क्रियमाणस्यैव कर्मणो मोक्षहेतुत्वं, नान्यस्येति वेदार्पितबहिर्मुख जनागोचरनिर्दुष्टाख्य योगस्य उपायस्यानवगमात् अपरिज्ञानात् । यद्यपि श्रुत्युक्तकर्मानुष्ठानस्य मोक्षसाधनीभूतत्वमस्त्यथापि अज्ञानां ज्ञात्वानुष्ठानाभावान्नास्तीत्युच्यते; ज्ञात्वानुष्ठितस्यैव कर्मणः उक्तफलदातृत्वनियमात् । तथा हि—उक्तं च गीतायामेव । "मा कर्मफलहेतुर्भूर्मा ते सङ्गोस्त्वकर्मणि" (अ २-श्लो ४७) "असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः । तस्मादसक्तः सततं कार्यं कर्म समाचरे" (अ ३-श्लो १९) त्यादिना कर्मफलापेक्षाराहित्येन स्वविहितकर्मानुष्ठानाय तत्तत्कर्मदेवतान्तर्यामित्वेन भगवन्तं विज्ञाय "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजे" (अ १८-श्लो ६६) त्युक्तप्रकारेण तत्तत्कर्मफलं भगवति परित्यज्य

एवमनुसंधानपूर्वकतया कृतस्यैव कर्मणो मोक्षसाधनत्वमिति निर्दुष्टार्थपरिज्ञानाभावेनानुष्ठानात् । **देही** जीवः **समन्ततः** सर्वत्र स्वर्गनरकादौ **भोगयोगेन** स्वकृतपुण्यपापफलसम्बन्धेन **प्रवर्तते** प्रवृत्तो भवति । परिभ्रमतीत्यर्थः । अतः कदापि संसारादनुत्थानमिति पूर्वेण सबन्धः ॥९॥

तद्वै महामोहनमिन्द्रियाणां मिथ्यार्थयोगस्य गतिर्हि नित्या । मिथ्यार्थयोगाभिहतान्तरात्मा स्मरन्नुपास्ते विषयान्समन्तात् ॥१०॥

पूर्वश्लोके संसारिणां संसारदनुत्थानस्य भगवद्विस्मृतिकृतापराधजनितविषयासक्तिरेव कारणं, नान्यदिति यदुक्तं तद्विषयासक्तिप्रकारमेवास्मिन्नुत्तरश्लोके विवक्षित्वोपपादयति—**तद्वा इति । तत्** विषयेषु इंद्रियाणां रागेण प्रवर्तनमेव **महामोहनं** महामोहसम्पादकं । विवेकज्ञाननाशकमिति भावः । विवेकज्ञानाभावरूपमहामोहसंबन्धे **नास्य** देहिनः; अहं कर्तेत्यादिमिथ्यार्थयोगे सतीति शेषः । "यत्र त्रिसर्गो मृषा" "मिथ्यैव व्यवसायस्त" इत्यादिषु 'मिथ्या' शब्दस्य वृथेति प्रयोगदर्शनात् अत्रापि **मिथ्या**भूताः वृथाभूताः **ये अर्थाः,** अर्थ्यन्त इत्यर्थाः, शब्दादिविषयाः; तेषां **योगे** सम्बन्धे सति अस्य जीवस्य गतिः संसारगतिः नित्या नियता, जायतेति शेषः ॥ ननु विषयाणां स्नेहसम्बन्धेनास्य संसारगतेर्नित्यता कुत इति चेदत्राह **मिथ्यार्थयोगाभिहतान्तरात्मेति ।** मिथ्यार्थयोगेन वृथाभूतविषयसंगेन अभिहतः सर्वत्रविषयासक्तिभावेन तिरस्कृतः, तुच्छीकृतः अन्तरात्मा अंतःकरणं यस्य सः । निरर्थकविषयाभिध्यानेन कलुषितमना इत्यर्थः । तदनन्तरं कलुषितेन

मनसा **विषयान्** संस्कारवशात् पूर्वानुभूतान्तानेव विषयान्**स्मरन्** सर्वदा अभिध्यायन् **समन्तात्** सर्वत्र स्वर्गादौ **उपास्ते** स्वकर्मोपचितानेव सेवते । **ह्वी**त्यनेन न कदाचिदपि भगवन्तमित्यर्थः सूचित इति ॥१०॥

अभिध्या वै प्रथमं हन्ति चैनं कामक्रोधौ गृह्य चैनं च पश्चात् । एतान्बालान्मृत्यवे प्रापयन्ति धीरास्तु धैर्येण तरन्ति मृत्युम् ॥११॥

ननु स्रक्चन्दनवनितादिविषयाणां सुखहेतुत्वात्तेषां निरंतरानुचिन्तनेन पुनः पुनः प्राप्त्य विषयाभिध्यायाः सुखसाधनत्वात्किमिति विषयानुस्मरणस्य दुःखहेतुत्वमुच्यते? इत्याशङ्कायां विषयाणामनित्यत्वेन कामाभिभूतमनसां पामराणां निरंतरानुस्मरणेनापि तेषामप्राप्त्या क्रोधादिसंभवात् कामक्रोधयोः संसर्गेण सर्वनाशकरसंमोहप्राप्तिरेवेति ज्ञात्वा विद्वांसः विषयवैराग्यविशिष्टभगवदपरोक्षज्ञानेन मृत्युशब्दवाच्यसंसारं तरन्तीत्याह **अभिध्येति** । **अभिध्या** दुर्विषयाणां निरंतरचिन्ता **एनं** देहिनं **प्रथम**मादौ **हन्ति** हिंसति । 'हन हिंसागत्योः' । अत्र हन्तीत्यनेन देहनाशो न विवक्षितः । किन्तु "चिन्तायाश्च चितायाश्च बिन्दुमात्रं विशिष्यते । चिता दहति निर्जीवं चिन्ता दहति जीविन" मित्युक्तरीत्या चिन्तायाः प्राणनाशसमदुःखदत्वमेव हननमिति । **पश्चात्** विषयाभिध्यानानंतरं **कामक्रोधौ** कामः पूर्वं विषयाभिलाषः, तदप्राप्त्या तज्जः क्रोधश्चेत्युभौ भवतः; "कामक्रोधोभिजायत" इति नियमात् । तौ कामक्रोधौ मिलित्वा **एनं** दुर्विषयाणां चिन्तया मृतप्रायं तमेव देहिनं **गृह्य** गृहीत्वा, स्वाधीनं कृत्वेत्यर्थः । **चे**त्यनेन

नाशयत इति योज्यं । अत्र नाशो नाम "क्रोधाद्भवति संमोह" इति प्रमाणात् विवेकज्ञानशून्यं कुर्वाते ॥ ननु 'क्रोधा'दिति पञ्चम्येकवचनेन क्रोधस्यैव सम्मोहकारणत्वं कामस्य कथमिति चेत्, क्रोधकामयोः कार्यकारणनियमात् । कामस्य कारणत्वेन कार्यभूतक्रोधा अनुस्यूतत्वादुभयोरैक्यविवक्षया एकवचनेनैव सम्मोहजनकत्वमिति । **एतान्** कामक्रोधानां सम्बन्धेन सम्मोहितान् **बालान्** विवेकज्ञानशून्यान देहिनः **मृत्यवे** संसाराया **प्रापयन्ति** । 'प्रापयन्ती'ति बहुवचनेन अभिध्या-काम-कोधास्त्रयो मिलित्वा देहिनः संसार एव पातयन्तीत्यभिप्रायः सूचितः ॥ ननु पूर्वार्धश्लोके'एन'मित्येकवचनमुक्त्वोत्तरार्धश्लोके एतानिति बहुवचनोक्त्या विरोध इति चेत्, द्वितीयचशब्दबलाज्जात्त्येकवचनविवक्षया न विरोधः ॥ नन्वेवं चेत्कस्यापि संसारानुत्थानप्रसङ्ग इत्यतः परिहरति । धीराः भगवद्विषयकज्ञानेन रममाणाः ब्रह्मादितृणान्ताः मुक्त्यधिकारिणः सात्विकजीवाः **धैर्येण** नश्वरविषयविरक्तिसम्पन्नस्वबिंबविषयकापरोक्षज्ञानेन **मृत्युं** अज्ञानदशायां अभिध्यादिसंसर्गप्राप्तसंसारमृत्युं **तरन्ति** संतरन्ति ॥११॥

योऽभिध्याय न्प्रत्यभीक्ष्णं (न्नुत्पतिष्णून्)
निहन्यादनाचारेणाप्रतिबुद्ध्यमानः । स वै मृत्युमृत्यु-
रिवात्ति भूतानेवं विद्वान्योभिहन्तीह कामान् ॥१२॥

एवंमीश्वरेच्छयां अनादितः प्राप्त-अज्ञानात्मकलिङ्गसंबन्धेन समागतमिथ्याज्ञानात्मकप्रमादाख्यमृत्संसर्गेण संसारमापन्नानां विविधसांसारिकदुःखदर्शनेन विषयविरक्तानां मोक्षाधिकारीणां सात्विक-

जीवानां ईश्वरानुग्रहेण कस्मिंश्चिज्जन्मनि स्वोत्तमज्ञानिगुरुसङ्गत्या अभिव्यक्तस्वबिम्बापरोक्षिणां अपरोक्षज्ञानद्वारा मृत्युशब्दवाच्यसंसारोत्तारमभिधायेदानीं राजसतामसयोः प्रवृत्तिं तज्जं फलं चोपदिशति **य** इति । **यः** विषयान् पुरुषः **प्रत्यभीक्ष्णं** प्रतिप्रतिविषयेषु वारं वारं **अभिध्यायन्** । 'उत्पतिष्णूनि'ति पाठे उत्पतनशीलानित्यर्थः । पूर्वानुभूतानेव विषयान् स्मरन् **अनाचारेण** श्रुतिस्मृत्यविहितस्वात्मार्थकरणाख्यविरुद्धाचारेण **अप्रतिबुध्यमानः** मदर्थं घातिता एते पशवः प्रेत्य नरकिणं मामेवं घातयिष्यन्तीति अजानमानः सन् । यद्वा "ब्रह्मार्पणं ब्रह्महविरि"त्यादिवाक्यार्थानुसन्धानमजानमानः सन् इति वा । **निहन्यात्** हन्ति । इहलोके पशूनिति शेषः ॥ **स मृत्युः** वृथापशुमारणजनितपापाख्यमृत्युः **मृत्युरिव वै** इत्यनेन तमेव पशुघातिनं प्रेत्य नरकगतं पापिनं **अत्ति** काकबकादिरूपेण, पश्वादिरूपेण वा खादयति । प्रेत्य खादन्ति ते च तानिति वक्ष्यतीति । यः पुरुषः **एवं आत्मार्थे** प्राणिहिंसकानां महानर्थप्राप्तिरित्येवं ज्ञात्वा **इह** मनुष्यलोके **भूतान्** अनादिसंस्कारवशात् स्वमनस्युद्भूतान् कामान् **विषयान् अपि** अपुरुषार्थबुद्ध्या वैराग्येण **हन्ति** त्यजति । स एवं **विद्वान्** । अत्र कामानामननुस्मरणमेव परित्यजनरूपंहननं विवक्षितमित्यर्थः । यद्वा **'धीरास्तु धैर्येण तरन्ती'ति** पूर्वश्लोकान्त्यचरणे ज्ञानिवर्गलक्षणमुक्त्वा उत्तरश्लोकेन तत्प्रवृत्तिलक्षणमुपदिशति **य** इति । **यः** ज्ञानी **अभीक्ष्णं** निरन्तरं **अभिध्यायन्** विषयाणां अनित्यत्वाशुचित्वदुःखानुविद्धत्वादिदोषदुष्टत्वं चिन्तयन् । 'उत्पतिष्णूनिति' पाठे विषयविशेषणं स्वमनसि वासनावशादुत्पतनशीलान् पुनः पुनः

स्मृतिपथं प्राप्तानिति यावत् । एवंभूतान्विषयान् **अप्रतिबुद्धयमानः** विरक्तःस्सन् तान् पुरुषार्थबुद्धया अननुस्मरन् **निहन्य**।द्धन्ति । परित्यजनमेव विषयाणां हननं । परित्यजतीत्यर्थः । विषयविरक्तज्ञानिपुरुषस्य यद्विषयहननसामर्थ्यमुक्तं **तत् "ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुतेऽर्जुने"** त्याद्युक्तरीत्या समूलनाशकमिति जननाशकमृत्युदृष्टान्तमुखेनोपपादयति **सवा इति । सवै** विषयालम्बुद्धिसम्पन्नज्ञानिरेव **मृत्युरिव** जनानामपुनरुत्थानरूपहननसामर्थ्यसंपन्नप्रसिद्धमृत्युरिव **मृत्युः** मारको भवतीति शेषः । **यः भूतान्**वासनावशात् मनसि संभूतान् **कामा**न्विषयान् **एवं** पूर्वोक्तरीत्या **इह** मनुष्यशरीरे **अभिहन्ति** सर्वतः परित्यजति । स एव **विद्वान्** सएवज्ञानी विषयालम्पटतया शास्त्रांध्ययनवान् एव ज्ञानीभवतीत्यभिप्रायः ॥१२॥

कामानुसारी पुरुषः कामाननु विनश्यति ।
कामान्व्युदस्य धुनुते यत्किञ्चित्पुरुषो रजः ॥१३॥

संसारमापन्नानां प्राणिनामनवरतं विषयानुवृत्तिरेवानर्थकरी तदननुवृत्तिरेव महानर्थनाशनीतिवक्ति **कामानुसारीति** । यः **पुरुषः कामानुसारी** मनोलौल्येन चर्वितचर्वणादिना तदनुसारप्रवृत्तिमान्, स पुरुषः **कामान्** नश्वरवनितादिविषयान् **अनु** तेषां नाशमनुसृत्य **विनश्यति** तदनुचिन्तनेन स्वयमपि नष्टो भवति । परापरतत्वज्ञानविषये इति शेषः ॥ यः **पुरुषः कामान्** विषयान् **व्युदस्य** वैराग्यपूर्वकं तेषामननुचिन्तनेन तान्परित्यज्य **यत्किञ्चित्** यावन्मितं **रजः** स्वात्मनः पापजन्यं (पापजनकं) रजोगुणं **धुनुते** तत्सर्वं नाशयति । अतो विषयानुचिन्तनं न कार्यमिति ॥१३॥

देहोऽप्रकाशो भूतानां नरको यः प्रदृश्यते ।
गृध्यन्त एव धावन्ति गच्छान्ति श्वभ्रमुन्मुखाः ॥१४॥

ननु सर्वविषयारम्भभूतशिरीषपुष्पाधिकसौकुमार्यादिगुणविशिष्ट-सर्वसुखहेतुस्त्र्यादिदेहशब्दवाच्यविषयवर्गस्य दुःखात्मकत्वमङ्गीकृत्य कथं हेयत्वमुच्यत इत्याशङ्कायां देहशब्दोपलक्षितसर्वस्यापि विषयवर्गस्य नरकसदृशत्वमुपपादयन्परिहरति **देह** इति । **भूतनां** स्त्र्यपत्यादीनां **देहो यो** देहवर्गः **प्रदृश्यते** सौकुमार्यादिना सुखसाधनत्वेन प्रत्यक्षतो दृश्यते स देहादिवर्गः **अप्रकाशो नरकः** आच्छादितो नरकः, श्लेष्मासृक्पूयविण्मूत्रादिभिरन्तः पूर्णत्वात् । तथा चाह मनुः—“अस्थि-स्थूणं स्नायुबद्धंमांसशोणितलेपनं । चर्मावनद्धं दुर्गंधपूर्णं मूत्रपुरीषयोः ॥ जराशोकसमाविष्टं रोगायतनमातुरं । रजस्वलमनित्यं च भूतावासमिमं त्यजेत्” इत्यनेन नरकसादृश्येप्युपरि चर्मावनद्धः देहः आच्छादितनरक इत्युच्यते । **गृध्यन्तः** सुखानुभवाय दुःखसाधनीभूतनरक सदृशं स्त्र्यादिकाममभिकाङ्क्षमाणाः प्राणिनः । ‘गृधु अभिकाङ्क्षण’ इति धातोः । **धावन्ति** तत्प्राप्तिसाधनानुष्ठानाय त्वरावन्तो भवन्ति । एवेत्यव्ययबलात् नरकसदृश मातापितृदेहादौ प्रसिद्धनरकेऽपिच पतन्ति इति ॥ तत्र दृष्टान्तमाह **गच्छन्त इति । उन्मुखाः** पादविन्यासाय भुवोदर्शनमपहाय ऊर्ध्वमुखाः गच्छन्तः पुरुषाः यथा निम्नोन्नतप्रदेशा दर्शनेन गर्ते पतन्ति तथेति ॥१४॥

अभिध्या वै प्रथमं हन्ति चैनं कामक्रोधावनु गृह्याशु पश्चात् ।
एते बालान्मृत्यवे प्रापयन्ति धीरास्तु धैर्येण तरन्ति मृत्युम् ॥

अमूढवृत्तेः पुरुषस्येह कुर्यात्किं वै मृत्युस्तार्ण इवास्य सर्पः (व्याघ्रः) ॥१५॥

नन्वेवं चेद्देहगेहादिसंबन्धस्य कदाप्यविनाभावनियमेनानर्थप परायाश्च क्वचिदप्यविनाशित्वेन कस्यापिसंसारानुत्थानप्रसंग इति चे अभिध्यादीनां बलीयस्त्वज्ञापनाय अभिध्येत्यादिभिः श्लोकैः तत्सा र्थ्यमभिधायेदानीं पुनरप्यभिध्येति पूर्वोक्तश्लोकानुवादमुखेनाबुद्धा तद्वशित्वनियमं प्रदृश्य "ब्रह्मविदाप्नोति परं" "ज्ञानेनामृती भवति "ज्ञानवान्मांप्रपद्यते" त्यादिश्रुतिस्मृतितच्छ्लोकान्त्यचरणोक्तमृत्युमार शक्तिसम्पन्नज्ञानमार्गवर्तिनस्तद्भयाभावं दृष्टान्तमुखेनानुवर्णयति **अमू वृत्तेरिति । अमूढवृत्तेः** ज्ञानमार्गवर्तिनः **पुरुषस्य** अधिकारिपुरुषस **इह** जगति **मृत्युः** संसाराख्यमृत्युः **किं कुर्यात्** किमनिष्टं कुर्यात न किमपीत्यर्थः ॥ अत्र दृष्टान्तमाह **तार्ण इति । तार्णः** तृणनिर्मि **सर्प इव ।** अमूढवृत्तेः पुरुषस्येवेति दृष्टान्तेप्यन्वेतव्यं । अयं सर्पस्ता इति भ्रान्तिरहितस्यैवेति । "तार्ण इवास्य व्याघ्र" इत्यपि पाठः अनेन ज्ञानिनां संसारभयं नास्तीति सिद्धम् ॥१५॥

अमन्यमानः क्षत्रिय कंचिदन्यं नाधीयीत निर्णुदन्नभिवास्य वायुः क्रोधाल्लोभान्मोहभयांतरात्मा सवै मृत्युस्त्वच्छरीरे य एषः ॥१६

मुमुक्षोर्मृत्युशब्दवाच्यसंसारोत्तरणाय भगवदपरोक्षज्ञानमेव परमंसाध नान्यदित्युक्तभगवदपरोक्षप्राप्तयेप्यनपरोक्षदशायां सद्गुरुमुखात्सच्छास्त्र भ्यासस्तदभावे अधिकारिणोपि त्रिदिवनिरयभूमिषु पुनः पुनः परिभ्राम क्रोधलोभोत्थमोहभयात्मकप्रमादरूपो मृत्युः सर्वदा शरीर एव वसती

यत्तत्त्वाप्यनुभवसिद्धं तदुपदिशति **अमन्यमान इति** । हे **क्षात्रियेति** धृतराष्ट्रसंबुद्धिः । यः पुरुषः **अन्यं** सुखसाधनाय स्त्र्यपत्यादिविषयवर्गा-दन्यं कंचित्पुरुषार्थं **अमन्यमानः** अप्रतिबुध्यमानः सन् **नाधीयीत** पुरुषार्थबुद्ध्या वेदादिसच्छास्त्राभ्यासं न कुर्याच्चेत् **अस्य** सच्छास्त्राभ्यासा कारिणः पुरुषस्य **निरुणत्** नितरां तृणादिकं नुदति प्रेरयतीति निरुणत् । 'नुद प्रेरण' इति धातुः । **अभि सर्वतो भ्रममाणः वायुः** चक्रवायुरित्यर्थः । वा उपमा । " **वा विकल्पोपमानयोः** " [इत्यमरः] । क्रोधलोभाभ्यां समुत्पन्नमोहभयाविष्टमनाः पुरुषः विषय सुखातिरिक्तं सुखं अबुध्यमानस्सन् पारत्रिकमहासुखदायकं सच्छास्त्राभ्यासं न कुर्याच्चेत्स पुरुषश्चक्र-वातवत् संसार एव पुनः पुनः परिभ्रमतीत्यभिप्रायः ॥ एवमुपदिशन्परमदयालुः सनत्सुजातः धृतराष्ट्रस्य वैराग्यजननाय महासज्जनपांण्डवपक्षपातित्वेन तदीयराज्यादानरूपो मयोक्तो लोभमोहात्मकः प्रमादाख्यो मृत्युस्त्वच्छरीर एव प्रतिभातीति श्रृङ्गिग्राहकतयोपदिशति **स इति** । धृतराष्ट्रस्यापि पाण्डवाः राज्यार्धं याचंत इतिकोपः । भाग्यहानिभयान्नदेयमितिलोभः । क्रोधान्मोहः लोभाद्भयमिति ॥१६॥

एवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः ।
विनश्यते विषये तस्य मृत्युर्मृत्योर्यथा विषयं प्राप्य मर्त्यः ॥१७॥

एवं उक्तप्रकारेण जायमानं लिङ्गसंबन्धेन प्राप्ताहमित्यादिरूप-मिथ्याज्ञानात्मकप्रमादवशादुत्पद्यमानं **मृत्युं** संसाराख्यमृत्युं **विदित्वा** तत्स्वरूपं ज्ञात्वा **ज्ञानेन** देहगेहादिविषयवर्गस्य सर्वत्रनश्वरज्ञानेन हेतुना **तिष्ठन्** निवृत्तिमार्गे अचाञ्चल्येन विद्यमानःसन् । " ष्ठा

गतिनिवृत्ता" विति धातुः भगवन्निष्ठायां वा, विष्णुसर्वोत्तमत्वज्ञानेवा। एवंविधो ज्ञानी पुरुषः **मृत्योः** संसाराख्यमृत्योः, सकाशादिति शेषः; **न बिभेति**। कुत इति चेत् **तस्य** एवं विधस्य ज्ञानिनः विषये **मृत्युः** पूर्वोक्तसंसाराख्यो मृत्युः **विनश्यतेति** नाशं आप्नोति। अत्र नाशो नाम यावल्लिङ्गनाशस्तावदकार्यकारिता, अनन्तरं स्वरूपतो नाश इति॥ संसाराख्यमृत्युनाशविषये दृष्टान्तमाह **मृत्योरिति**। **मृत्योः** जनमारकमृत्योः **विषयं** मार्गं **प्राप्य मर्त्य** इव मरणशीलः पुरुष इव। अनेन मुमुक्षुणा महानर्थनिवृत्तये ज्ञानमेव संपादनीयं, नान्यदिति सिद्धम्॥१७॥

धृतराष्ट्र उवाच—

यानेवाहुरिज्यया साधुलोकान्द्विजातीनां पुण्यतमान्सनातनान्।
तेषामपार्थान्कथयन्ति वेदा एवं विद्वानेति कथं नु कर्म॥१८॥

एवं सनत्सुजातेन मृत्युशब्दवाच्यं संसारभयं परिहृत्य स्वरूपानन्दाविर्भावकारणं ज्ञानात् नान्यदिति श्रुतिसम्मत्या प्रतिपादितं। तदनंतरं "ज्योतिष्टोमेन स्वर्गकामो यजेते" त्यादि-श्रुत्युक्त ज्योतिष्टोमादियज्ञानुष्ठानजनितसुकृतेनापि महाफलप्राप्तिश्रवणात् किमर्थमन्ययोगव्यवच्छेदेन पारत्रिकमहाफलप्राप्तये ज्ञानस्यैव मुख्यकारणत्वमिति शङ्कां मनसि निधाय ज्ञानस्यैव मुख्यत्वप्रतिपादकानां "नान्यः पन्था अयनाय विद्यत" इत्यादिवाक्यानां, कर्मणोपि मुख्यत्वप्रतिपादकानां "न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोश्नुते" "स्वर्गकामो यजेते" त्यादिवाक्यानां परस्परविरोधमाशङ्क्य पृच्छति **यानिति**। **यान्सनातनान्**

नित्यान् पुण्यतमान् वैकुण्ठादीन्**लोकान् द्विजातीनां** ब्राह्मणादीनां ये वेदाः । **यानित्यनेन** ज्ञानात्मकानिति वा, "येति ज्ञानं समुद्दिष्टमिति" वचनात् । **इज्यया** वेदविहितयज्ञानुष्ठानेन **आहुः** त एव **वेदाः** केषुचित्स्ववाक्येषु तेषां विहितयज्ञानुष्ठायिभिः प्राप्तानां लोकानामेव **अपार्थान्** अपगतः अर्थः मोक्षादिर्येभ्यः तान् धर्मानाहुः । धर्मानिति शेषः ॥ **एवं** सति परस्परं स्ववाक्यानां विरोध इत्यभिप्राय इति एवं **विद्वान्** कर्मप्राप्यलोकानामनित्यत्वं जानमानो ज्ञानी पुरुषः **कर्म** वेदविहितयागादिकर्म कर्तुमिति शेषः **कथमेति** कर्तुं कथं प्रवृत्तो भवति । वेदविहितयागादिकर्मणां यदि वैयर्थ्यं तर्हि ज्ञानिभिः कुतस्तत्र-प्रवृत्तिः क्रियते ? इति प्रश्नाभिप्राय इति ॥१८॥

सनत्सुजात उवाच—

एवं हि विद्वान्प्रतियाति तत्र तथार्थजातं च वदन्ति वेदाः ।
स नेह आयाति परं परात्मा प्रयाति मार्गेण निहन्ति मार्गान् ॥

एवं धृतराष्ट्रेण पृष्टः सनत्सुजातः यद्यपि "ज्ञानेनानन्दीभवती" त्यादिना महाफलरूपमोक्षप्राप्तये भगवज्ज्ञानमेव मुख्यसाधनमथापि "कर्मणा ज्ञानमातनोती"त्यनेन स्वयोग्य ज्ञानाभिव्यक्त्यै "असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः" इत्युक्तप्रकारेण विष्ण्वनुसन्धानपूर्वकं कृतस्य कर्मणोपि ज्ञानव्यक्तिद्वारा पारत्रिकपुरुषार्थसाधनत्वेपि बहिर्मुखानां परस्परं विरोधवत्प्रतीयमानानां सर्वेषां वेदवाक्यानां "सर्वे वेदा यत्पद-मामनन्ती" त्यादावुक्तरीत्या ज्ञानिभिः सर्वेषां कर्मणामनुसन्धानेनाचर्य-माणत्वान्न विरोध इति वदन् तच्छङ्कामपनुदति—**एवमिति "एवं**

विद्वान्" "क्षीणे पुण्ये मर्त्यलोकं विशंती" त्यादावुक्तरीत्या काम्य-कर्मणा प्राप्तस्वर्गादीनामनित्यत्वेनापुरुषार्थतां जानन् ज्ञानी **तत्र** ज्ञानपूर्व-कमनुष्ठीयमानकर्ममार्गे **प्रतियाति** भगवद्ज्ञानप्राप्तये विष्ण्वर्पणबुद्ध्या-प्रवृत्तो भवति । **तथा** इत्यव्ययं तथामतीति, एवं कर्मकलापे । ज्ञानिना अनुसन्धानेन क्रियमाणेसति । **वेदाः** "अपाम सोममममृता अभूमे" त्यादयो वेदा **अर्थजातं** धर्मादिमोक्षान्तपुरुषार्थवर्ग **वदन्ति** । **चे**त्यनेन तथाविधज्ञानिन इति शेषः । **सः** सर्वपुरुषार्थभागी, ज्ञात्वा कर्मानुष्ठान-शीलः पुरुषः **इह** संसारमार्गे, मृत्युलोके वा; **नायाति** पुनरागतो न भवति। तर्हि कुत्र गच्छतीति **चेत्**, **परात्मा** परे भगवति आत्मा मनो यस्य सः परात्मा भूत्वेत्यर्थः। 'पृ पालनपूरणयो' रिति धातोः सर्वजगत्पालनादि-कर्तारं **परं** श्रीनारायणं **मार्गेण** अर्चिरादिमार्गेण **प्रयाति गतो भवति**॥ **यद्वा परं वैकुंठादिस्थानं वा प्रयाति। मार्गान्** मृग्यन्ते, अन्विष्यन्ते जनैरिति मार्गा विषयाः, तान् मार्गशब्दवाच्यान् विषयान् । 'मृग अन्वेषण' इति धातुः । **निहन्ति** नाशयति चेति । 'हन हिंसागत्यो' रिति धातुः ॥१९॥

धृतराष्ट्र उवाच—

कोऽसौ नियुङ्क्ते तमजं पुराणं स चेदिदं सर्वमनुक्रमेत ।
किं वास्य कार्यमथवा सुखं च तन्मे विद्वन्ब्रूहि सर्वं यथावत् ॥

॥ इति प्रथमोऽध्यायः ॥

एवं सनत्सुजातोपदेशेन सर्वेषां वेदवाक्यानां ज्ञातभगवद्विषय-ज्ञानो धृतराष्ट्रः 'परं प्रयाती'ति श्रुत 'पर' शब्दवाच्यवस्तुस्वरूपं

ज्ञातुकामः पृच्छति–**क इति । हे विद्वन्** सर्वज्ञ, सनत्सुजात ! **अजं** जननरहितं **पुराण** मनादिकालीनं (तं) जीवं **नियुङ्क्ते** नियोजयति, **यः** प्रेरयति **असौ** पुरुषः **कः** को वा भवितुमर्हति, किं लक्षणक इत्यर्थः ॥ **सः** जीवनियामको विष्णुः **इदं सर्वं जगत् अनुक्रमेत** सर्जनादि-प्रवृत्या संसारयतीति **चेत् अस्य** विष्णोः **किंवा कार्यं** सृष्ट्यादिकरणेन किंवा साध्यं, प्रयोजनं ? । भगवान्किं प्रयोजनमुद्दिश्य सर्जनादिकं करोतीत्यभिप्रायः । **किंवा सुखं** ? सर्जनादिनादस्य सुखं वा किं भवति ? निष्प्रयोजनः करोतीति चेत "प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते" इत्यनेन सप्रयोजन इव भातीत्यतः **तत्सर्वं** मदीयप्रश्नजातं **यथावत्** याथार्थ्येन ब्रूहि ॥२७॥

इति श्रीउद्योगपर्वणि सनत्सुजात
दुर्बोधार्थप्रकाशिकायां प्रथमोध्यायः ॥१॥

॥ श्रीगुरुभ्योनमः ॥

अथ द्वितीयाध्यायः ॥

ॐ

सनत्सुजात उवाच—

अयं महानत्र विभेद योगैरनादियोगन भवन्ति नित्याः
(दोषो महानत्र विभेदयोगे ह्यनादियोगेन भवन्ति नित्याः)।
तथास्य नाधिक्यमुपैति किञ्चिदनादियोगेन भवन्ति पुंसः ॥१॥

एवं धृतराष्ट्रेण पृष्टः सनत्सुजातः "देवस्यैष स्वभावोयमाप्तकामस्य का स्पृहा" "न प्रयोजनत्वात् लोकवत्तु लीलाकैवल्यं" "बाल क्रीडनकैरिवे" त्यादिश्रुतिसूत्रस्मृतिषूक्तप्रमाणसिद्धानादितोऽवाप्तसकलकामस्य विष्णोर्जगत्सर्जनादिना स्वात्मनः प्राप्तव्यप्रयोजनाभावेपि अनादिसिद्धानाम् आदिमध्यान्तशून्यानाम् अस्वतंत्राणाम् अनन्तानाम् अनेकविधभेदभिन्नानां सात्विकादिजीवानां तादात्म्यविशिष्टानादिकालीनतत्तद्योग्यताव्यक्तिद्वारा शुभाशुभफलप्रापणेन सर्वोपकारकत्वाज्जगज्जन्मादिवर्तृत्वं युक्तमित्युपदिशन्, तच्छङ्कामपनुदति **अयमिति**। **अत्र** जगति **महान्** सर्वपूज्यः, 'मह पूजायामि'ति धातुः; **अयं** परमात्मा "योगः सन्नहनोपाय" इत्यभिधानात् **योगैः** स्वलीलाख्योपायैः, जीवानिति शेषः, **बिभेद** देवादिभेदेन उत्पादयामास॥ नन्वनादिनित्यानां जीवानां कथमीश्वरादुत्पत्तिरित्याशङ्कायां "यावल्लिङ्गान्वितो ह्यात्मा तावत्कर्मनिबन्धनं" "जीवो नित्यो धातुरस्यत्व नित्य"

इत्यादावुक्तरीत्या जीवानां स्वरूपतो नित्यत्वेपि अनादिसिद्ध लिङ्ग-सम्बन्धेनअन्तरा प्राप्तजननादिधर्मविशिष्टस्थूलदेहस्य "यतो वा इमानि भूतानि जायन्त" इत्यादिना भगवज्जन्यत्वश्रवणात् उक्तं युक्तमेवेति वदन् तच्छङ्कामुन्मूलयति अनादीति । **अनादियोगेन** अनादिप्राप्त-लिङ्गसम्बन्धनिमित्तेन नित्याः स्वरूपविवक्षया नित्या अपि जीवाः **भवन्ति** ईश्वरादेवोत्पद्यन्ते ॥ नन्वेवंविधानामनेकेषां जीवानां मध्ये चेतनत्वसाम्याद्येन केनापि पुरुषेण विष्णोः साम्याधिक्ये प्राप्ये नवा ? इत्याशङ्कायां "न ते विष्णो जायमानो न जातो देवमहिम्नः परमं तमाप" "साम्यं न चास्य परमेण च केन चाप्यं" "न विष्णोः सदृशः कश्चित भूतो वा भवितापि वे"त्याद्यनेकश्रुतिस्मृत्युक्तप्रमाण-बलात्केनापि विष्णोराधिक्यं साम्यं वा नाप्यते इत्याह--तथेति । **तथा** इत्यव्ययम् । अव्ययानामनेकार्थत्वनियमादत्र तथाशब्दबलात्साम्य-मित्यनुसन्धीयते । **तथापि** जीवेश्वरयोश्चेतनत्वसाम्ये विद्यमानेपि **अस्य** विष्णोः **किञ्चित्** यत्किंचिदपि **आधिक्यं** साम्यमाधिक्यं च **नोपैति** न प्राप्नोति ॥ नन्वीश्वरस्य साम्याधिक्यराहित्येन सर्वोत्तमत्व' मथापि जीवेशयोर्नियम्यनियामकभावः कुत इति चेत्, "रूपं रूपं प्रतिरूपो बभूव" "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजात" इत्यादिश्रुत्युक्तजीवेश्वरयोरनादित एव बिम्बप्रतिबिम्बभावस्य सिद्धत्वा-त्पराधीनसत्तावतो जीवस्येश्वरेण नियम्यत्वं स्वाधीनसत्तासंपन्नबिम्ब-भूतेश्वरस्य नियामकत्वं च सिद्धमित्याह अनादियोगेनेति । **पुंसः** पूर्णषाड्गुण्यस्य विष्णोः **अनादियोगेन** अनादिसिद्धबिम्बरूपेश्वर-सम्बन्धेन **भवन्ति** अनादित एव तदधीनसत्ताकाः प्रतिबिम्बा भवन्ति,

सर्वे जीवा इति शेषः । अनेन समाधिकराहित्येन चाप्तसमस्तकामस्य विष्णोः जगत्सर्जनादिना स्वप्रयोजनाभावेपि स्वाधीनानन्तजीवानां स्वस्वयोग्यताभिव्यक्तिद्वारा चिदचिदात्मकमुक्तितमआदिप्रापणेन स्वमाधिकपरोपकर्तृत्वं सिद्धमित्युक्तं भवतीति समस्तश्लोकाभिप्रायः ॥ अस्मिन्नेव पूर्वार्धश्लोके "दोषो महानत्र विभेदयोगेह्यनादियोगेन भवन्ति नित्या" इति पाठान्तरस्यायमर्थः । **अत्र** भूतभविष्यद्वर्तमानभेदेन त्रित्वसङ्ख्याविशिष्टेकाले **अनादियोगेन** भगवतः अनादिकालेन स्वाऽभिन्नेच्छानिमित्तेन **हि** शब्दसूचिताः प्रत्येकशोऽनादिनित्याः अनन्तावताराः **भवन्ति** वर्तन्ते । एवं विधानामनन्तानां भगवदवताराणां **विभेदयोगे** परस्परं भेदसंबन्धेऽङ्गीक्रियमाणे सति **महान्** अनिवर्तकतमःप्रापकत्वाच्छ्रेष्ठः **दोषः** मिथ्याज्ञानाख्यः संभवतीति ॥१॥

यदेतदाह भगवान्स नित्यं (यएतआ भगवन्सनित्यो)
विकारयोगेन करोति विश्वम् ।
तथा च तच्छक्तिरितिस्म मन्ये तथार्थयोगे च भवान्ति वेदाः ॥२॥

सर्वज्ञः सनत्सुजातः एवं प्रथमश्लोके निरपेक्षेणैव जगज्जन्मादिकर्तृत्वं परब्रह्मणो अभिधाय द्वितीयश्लोके अनेकश्रुतिस्मृत्युक्तप्रमाणप्रमितानन्यसाध्यप्रकृतिविकारात्मकप्रवाहतोऽनादिनित्यसत्यजगत्सर्जन - कथनव्याजेन तत्कर्तृत्वमेव विशेषतो विवृणोति यदिति । **स** नित्यानन्दो **भगवान् नित्यं** प्रवाहतोऽनादिनित्यं **यद्** प्रत्यक्षादिसिद्धं **विश्वं** जगत्; "विश्वं सत्यं मघवानायुव" इत्यादिप्रमाणसिद्धसत्यभूतं जगत इत्यर्थः **विकारयोगेन** विकाराणां गुणत्रयमहदहंकारतन्मात्राणां

पञ्चभूतानां, योगेन पञ्चीकरणाख्योपायेन **करोति** निर्मिमीते । **एतत्** इत्येतत्प्रमेयं **भगवान्** सर्वपूज्यो वेदः **आह** "तत्सृष्ट्वे"त्यादिस्ववाक्यैराह ॥ नन्वस्त्वनेकवेदवाक्यैर्जगज्जन्मादिकर्तृत्वं ब्रह्मण एवेति **मतं**। तत्रापि ऋषित्वेन सर्वज्ञत्वादत्र त्वत्सम्मतिः कीदृशीत्याकाङ्क्षायामाह तथेति । 'मन्ये' इत्युत्तमपुरुषक्रियाबलादहमिति कर्तालभ्यते । अत्र **चे**त्यपिः । अहं च सनत्सुजाताख्यअहमपि **तथा** श्रुत्याद्युक्तसम्मत्यनुसारेणैव **तच्छक्तिरिति** तादात्म्यविशिष्टस्य भगवतः शक्तिः जगज्जन्मादि करोतीति **मन्ये** जाने । शक्तिशक्तिमतोस्तादात्म्याभिप्रायेण 'तच्छक्ति' रित्युक्तिः । स एवकरोतीत्यहं जानामीत्यर्थः । स्वमतेरपि वेदप्रामाण्यानुगुणत्वज्ञापनाय पुनरपि तत्सम्मतिमाह तथेति । **वेदाः** 'परास्य शक्तिर्विविधैव श्रूयते'' "स्वाभाविकी ज्ञानबलक्रिया चे" त्यदयो वेदाः **तथार्थयोगेच** जगतो मत्सम्मत्यनुसारिभगवच्छक्तिजन्यत्वाद्युक्तार्थसम्बन्धयोगे **भवन्ति** सम्मताः भवन्तीति । अतो वेदोक्तिमत्सम्मत्योरेकवाक्यतैवेति ॥२॥

धृतराष्ट्र उवाच—

यस्माद्धर्मानाचरन्तीहलोके (केचित्) तथाऽधर्मान्केचिदिहा चरंति ।
धर्मः पापेन प्रतिहन्यते वा उताहो धर्मः प्रतिहान्ति पापम् ॥३॥

एवं सकलशास्त्रार्थसम्मत्योक्तज्ञातभगवत्संबन्धिजगज्जन्मादिकर्तृत्वनियमो धृतराष्ट्रस्तदानीं श्रुतिविहितानां निष्कामसकामभेदेन

द्विविधानां पुण्यकर्मणां मध्ये, किं अकाम्यकर्मण एवानिवर्तकत्वेनावश्यमनुष्ठेयत्व महोस्वित्सकामकर्मणामिति कर्मस्वरूपं ज्ञातुकामः पृच्छति–**यस्मादिति । इहलोके** मनुष्यलोके **केचिद**परोक्षज्ञानसंपन्नाः अधिकारिणः **धर्मान्** निवृत्तिधर्मानाचरन्ति निष्कामनया विष्णुप्रीत्यर्थमाचरन्ति इति प्रसिद्धिः । **तथा** प्रारब्धवशात्त एव **अधर्मान्** अगम्यागमनादीनप्याचरन्ति । एवं सति **धर्मः** पूर्वाचरितो निवृत्ताख्यो धर्मः **पापेन** आनन्तर्येण कृताऽगम्यागमनादिरूपेण पापेन **प्रतिहन्यते वा** विनश्यते किं **उत धर्मः** स एव पूर्वाचरितो निवृत्तिरूपो धर्मः स्वयमविनाशी सन् **पापं** तमेव पापं **प्रतिहान्ति** विनाशयति ॥ किमिति यद्वा अत्र 'केचिदि'त्युक्त्या गृहाश्रमिण एव ग्राह्याः । **यस्मा**च्छ्रुतिविहितत्वादितिहेतोः **इहलोके** मनुष्यलोके **केचिन्मध्य**माधिकारिणो गृहाश्रमिणः पुरुषाः **धर्मान्** "प्रातःसन्ध्यामुपासी" त्यादिश्रुतिविहितान् **आचरन्ति । धर्मः** स्वानुष्ठितः सन्ध्यावन्दनादिरूपः अकामो धर्मः **पापेन** प्रतिग्रहादिपापेन **प्रतिहन्यते किं** विनश्यते किं **उतधर्मः** सन्ध्यावन्दनादिरूपः **पापं** प्रतिग्रहादिरूपं **धर्मप्रतिहान्ति** किं विनाशयति किं । एवमाचरितसकामपुण्यपापयोः विरुद्धत्वादन्यतरेणान्यतरस्य नाशोस्तिवा नवेति प्रश्नाभिप्रायः ॥३॥

सनत्सुजात उवाच—

स्थितो तस्मिन्स्थितौ वाप्युभयं हि नित्यं ज्ञानेन
विद्वान्प्रतिहान्ति सिद्धिं ।
अतोऽन्यथा (तथान्यथा) पुण्यमुपैति देही तथागतं पाप-
मुपैति (सिद्धम्) सिद्धिम् ॥४॥

एवं धृतराष्ट्रेण पृष्टः सनत्सुजातः ज्ञान्यज्ञान्याचरितपुण्यपापयोः अधिकारिभेदात्तत्तदधिकार्यनुसारित्वमेवास्तीति ज्ञापनाय उभयविधाधिकारिप्रवृत्तिमाह— तस्मिन्निति । **तस्मिन्**परमात्मनि **नित्यमेक**प्रकारेण **स्थितः** तदेकनिष्टो विद्वान् अपरोक्षज्ञानी **उभयं** संचितागामिपुण्यं पापं चेत्युभयं **प्रतिहन्ति** "तदा विद्वान्पुण्यपापे विधूयनिरञ्जनः परमं साम्यमुपैति" "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशा" दिति प्रमाणानुसारेण प्रतिहन्ति निर्मूलयतीत्यर्थः । **सिद्धं हि** नश्वरपुण्यपापजनितस्वर्गनरकादिगमनाख्यसिद्धिं च **प्रतिहन्ति** तदपि नाशयतीत्यर्थः ॥ तदनन्तरं सर्वेषां पुण्यकर्मणां भगवत्प्रीतिसाधनानुष्ठेयत्वमिति भगवद्भक्तिसंपन्नापरोक्षज्ञानिप्रवृत्तिः ॥ **अतः अन्यथा** वैपरीत्येन धर्माचरणशीलः **देही** अपक्वयोगी पुरुषः **तथागतं** फलाभिसन्धानाचरणागतं प्राप्तं—फलानुभवाऽभावे कदाप्यविनाशि **पुण्यं**; "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपी"त्यादिना काम्यकर्मस्वरूपकथनात् । **सिद्धिंच** तज्जनितस्वर्गादिफलसिद्धिं च **उपैति** प्राप्नोति । 'तथागतं' इत्युभयत्रान्वेतव्यं । **तथागतं** अपक्वदशायां प्राप्तं **पापं सिद्धिं च** तज्जनितनरकादिसिद्धिं च **उपैति** ॥ अनेन पक्वस्यापरोक्षज्ञानिनः आगामिसञ्चितसंज्ञानां पुण्यदिकर्मणां अपरोक्षोत्तरकाल एव स्वरूपतो विनाशसंभवात्तज्जनितोभयविधफलाभावः; अपक्वयोगिनस्तु तदभावादुभयविधफलप्राप्तिरिति प्रश्नपरिहार इति ॥

अस्मिन्श्लोके पूर्वोत्तरार्धयोः "सिद्ध" मिति पाठे अस्मदुक्तराद्धांतस्य श्रुत्यादिषु सिद्धामिति हेतोर्न शङ्कावसर इत्यर्थः इति ॥४॥

स्थित्वोभयं कर्माणि भुञ्जते स्थिरं (गत्वोभयं कर्मणा युज्यते स्थिरं) शुभस्य पापस्य स चापि कर्मणः ।
धर्मेण पापं प्रणुदतीह विद्वान्धर्मो बलीयानिति तस्य तत्वविद्धि ॥५॥

इदानीमपरोक्षदशाविशिष्टज्ञानयज्ञानिन्याचरितपुण्यपापाख्य-कर्मणः स्वोत्थनश्वरफलप्रापकत्वाप्रापकत्वं वर्णयति स्थित्वेति । "इष्टापूर्तं मन्यमाना वरिष्टं नान्यच्छ्रेयो वेद यंते प्रमूढा" "त्रैविद्या मां सोपमाः पूतपापः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते" "ज्योतिष्टोमेन स्वर्गकामः" "अन्नदानादेते लोका" इत्यादिश्रुतिषूक्तफलानुरागेण **कर्माणि** काम्यकर्मणि, स्थिरमिति क्रियाविशेषणं, **स्थिरं** यथा भवति तथा **स्थित्वा** तदनुष्ठानायेति शेषः, **सः** काम्यकर्मानुष्ठानशीलः पुरुषः **शुभस्य** नश्वरकाम्यसुकृतस्य तथा **पापस्य, कर्मण इत्युभयत्रा-**न्वेतव्यं, नरकापादकनश्वरपापस्य **चापि उभयं** स्वर्गं नरकं चेत्युभय-विधमपि फलं भुञ्जते साकल्येनानुभूयते ॥ **विद्वान्** "धर्मस्य ह्यापवर्ग्यस्य नार्योर्थायेह कल्पते" "नार्थस्य धर्मैकांतस्य कामो लाभाय हि स्मृतः" "वासुदेवपरा मखाः" "मयि सर्वाणि कर्माणि संन्यस्याध्यात्म-चेतसा । निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः" "काम्यानां कर्मणां न्यासं" इत्यादिबहुप्रमाणेषु काम्यकर्मणां न्यासश्रवणात् "न कर्मणा-मनारंभान्नैष्कर्म्यं पुरुषोश्नुते" त्यादिषु तेषां कर्तुमावश्यकत्वे श्रवणात श्रुत्युक्तानां सर्वेषां कर्मणां विष्णवर्पणाख्यक्रियया सार्थक्यमस्तीति ज्ञात्वानुष्ठानवानपरोक्षज्ञानी, **धर्मेण** स्वानुष्ठितविहितधर्मेण पूर्वार्जितं **पापं प्रणुदति** विनाशयति ॥ **[इह] तस्य** ज्ञात्वानुष्ठानवतो ज्ञानिनः

धर्मः विष्णवर्पणरूपो धर्मः **बलीयान्** पापनाशनशक्तिमान् **[इति] विद्धि** जानीहि। 'विद्धी'त्यनेन किमपि कुर्वित्याशयः। अनेन फलानुसाधनेन काम्यकर्मानुष्ठायिनामज्ञानां स्वाचरितपुण्यपापयोर्भोगनियमः। तेषामेव कर्मणां विष्णवर्पणबुद्ध्या क्रियमाणानां ज्ञानिनां बलिष्ठपुण्यसम्बन्धेन अनिष्टापादककर्मणां नाश इत्यर्थो दर्शित इति ॥५॥

येषां धर्मेषु (व्रतेऽथ) विस्पर्धा बले बलवतामिव।
ते ब्राह्मणा इतः प्रेत्य स्वर्गे यान्ति प्रकाशताम् ॥६॥

इदानीं पूर्वश्लोकोक्तज्ञान्यज्ञान्याचरितस्यैकस्यैवं पुण्यकर्मणः स्वर्गमोक्षप्रदत्वमुक्त्वोत्तरश्लोकैर्विवृण्वन्नादौ सकामकर्मिणां स्वर्गादिप्राप्तिप्रकारमाह येषामिति। **येषां** विषयरागिणां पुंसां **धर्मेषु** प्रवृत्तिर्धर्मेषु **विस्पर्धा** पुण्याधिक्यात्स्वर्गे फलाधिक्यमिति श्रुत्वा स्वर्गसुखार्थं पुण्यानुष्ठायिनोऽन्यान् पुण्यवतोजनान् दृष्ट्वाऽहमस्मादप्यधिकपुण्याचरणेनाऽमुत्राधिकं सुखीस्यामिति स्पर्धा, येषामस्तीति शेषः॥ तत्र दृष्टान्तमाह-बले बलवतामिवेति। यथा **बलवतो** राज्ञः स्वापेक्षयाधिकबलिनं राजानं दृष्ट्वा अहमस्मादपि बलवंतं संपाद्येनं जित्वाधिकं सुखी भूयासमिति यथा दुर्बलस्य राज्ञः सङ्घर्षो वर्तते, तथा काम्यकर्मानुष्ठायिनामपि स्पर्धा॥ **ते ब्राह्मणाः** काम्यकर्माचरणशीलाः, त एव ब्राह्मणाः **इतः** भूलोकात् **प्रेत्य** मृताः सन्तः **स्वर्गे** स्वर्गाख्ये लोके **प्रकाशतां** ऐश्वर्यादिना अतीव प्रकाशतां **यान्ति** स्पर्धयाचरितसुखाधिक्येन स्वर्लोके सुखाधिक्येनाधिकं प्रकाशन्त इत्यर्थः ॥६॥

येषां धर्मे न च स्पर्धा तेषां तु ज्ञानसाधनम् ।
ते ब्राह्मणा इतो मुक्ताः स्वर्गं यान्ति त्रिविष्टपम् ॥७॥

एवं स्वर्गादिसुखारागिणां पुरुषाणां "स्वर्गकामोयजेते"त्यादिश्रुत्युक्तबाह्यानुसंधानसंपन्नबहिर्मुखजनानुष्ठिताऽनित्यसुकृतजनित - कालावधिकस्वर्गादिलोकप्राप्तिमभिधायेदानीं भगवदेकनिष्ठविरक्तज्ञानिपुरुषानुष्टित 'यजेते' त्यादिवाक्यविहितज्योतिष्टोमादियागाद्यनुष्ठानप्राप्तस्वर्गादिशब्दवाच्यवैकुण्ठादिलोकप्राप्तिप्रकारमाह—येषामिति । **येषां** ज्ञानिनां **धर्मे** सकामधर्माचरणे हेयत्वेन सर्वथापरित्यागरूपा **स्पर्धा नच** नास्ति, फलाशां विहाय स्वात्मनो विधिनिषेधविषयत्वेन तदाचरणस्य विहितत्वाद्विष्णुप्रीत्यर्थमेवाचरिष्ये इत्याचरणं 'कर्मणामस्पर्धे'त्युच्यते । एवं शीलं येषामस्ति **तेषां** तथाविधज्ञानिनां **ज्ञानसाधनं,** भवतीति शेषः । **ते** एवमाचरणशीलाः ते **ब्राह्मणाः** ब्रह्मजिज्ञासाशीलाः, 'अणु चेष्टाया'मिति धातुः **इतः** अस्माल्लोकात्, लिङ्गाद्वा **मुक्ताः** भूत्वेतिशेषः **त्रिविष्टपं** त्रिणि विष्टपानि श्वेतद्वीपानन्तासनवैकुण्ठाख्यानि स्थानानि यस्यासौ त्रिविष्टपस्तं **स्वर्गं** "परः स्वो हरिरुद्दाम" इत्यभिधानात् स्वश्चासौ गश्चेति स्वर्गो विष्णुः, 'गम्लृगता'वितिधातुः, तं **यान्ति** वैकुण्ठादिधामत्रयगतं विष्णुमेव यान्तीत्यर्थः ॥७॥

तस्य सम्यक् समाचारमाहुर्वेदविदो जनाः ।
नैनं मन्येत भूयिष्ठं बाह्यमाभ्यन्तरं जनाः (जनं) ॥८॥

ज्ञात्वानुष्टानशीलज्ञान्याचरणस्यैव श्रेष्टत्वज्ञापनायात्र शिष्टसंमतिरप्यस्तीत्याह—तस्येति । **वेदविदः** "वेदो नारायणः साक्षादि"

त्यनेन वेदो विष्णुस्तं जानंतीति वेदविदः; यद्वा 'सर्वेवेदा यत्पदमामनन्ती' त्यनेन ज्ञानमयपरतत्वप्रतिपादकानां सर्वेषां वेदवाक्यानां भगवत्परत्व-ज्ञानसंपन्नाःइति वा; **जनाः** ज्ञानिजनाः **तस्य** निष्कामनया विष्णुप्रीत्यर्थ-मिति सर्वधर्माचरणशीलस्य विदुषः **आचारं** विष्णवर्पणरूपमाचारं **सं** समीचीनमिति **सम्यक् आहुः** । ये ज्ञानिनस्ते सर्वेषां कर्मणां ज्ञात्वा-नुष्ठानमेव सम्यगित्याहुरित्यर्थः॥ इदानीमेवं विध ज्ञानिनां स्वरूपमज्ञानिभि-र्नज्ञायत इत्याह **नेति** । **जनः** विषयरागिजनः **एनं** ज्ञात्वा कर्मानुष्ठान-शीलिनं **बाह्यं** अनपरोक्षिणं, आन्तरं अपरोक्षिणं च **भूयिष्ठं** 'भू पूर्णतायामि'ति धातोः, 'येति ज्ञानं समुद्दिष्ट'मिति वचनाच्च, भूश्चासौ यश्चेति भूयो विष्णुस्तस्मिन् 'ष्ठा गतिनिवृत्ता'' विति धातोः अचांञ्चल्येन तिष्ठतीति भूयिष्ठस्तं, भगवदेकनिष्ठमित्यर्थः, न **मन्येत** न जानातीति । अनेन अपरोक्षानपरोक्षभेदेनोभयविधज्ञानिस्वरूपं, तेषां प्रवृत्तिश्च अज्ञजनै र्न ज्ञायत इत्यभिप्रायः ॥ यद्वा **बाह्यं** काम्यस्वरूपं **आन्तरं** निष्कामस्वरूपं **एनं** विष्णुप्रीतिसाधनं द्विविधं धर्मं **जनः** बहिर्मुखजनः **न मन्येत** मोक्षापादकत्वेन अयमेव महान्धर्म इति न जानाति। अनेन विषयरागिणां बहिर्मुखानां जनानां भागवतधर्मे भूयस्त्वं नास्तीत्यर्थः ॥८॥

यत्र मन्येत भूयिष्टं प्रावृषीव तृणोदकं ।
(अन्नोदकं) अन्नं पानं ब्राह्मणस्य तज्जीवन्नानुसंज्वरेत् ॥९॥

ननु प्राकृतैरज्ञानिभिर्ज्ञानिनां स्वरूपं नज्ञायते चेत्, तर्हि केषां स्वरूपज्ञानमित्याशङ्कायां ज्ञानिनामेव ज्ञानिस्वरूपज्ञानं, नेतरेषामित्यर्थः—यत्रेति । **यत्र** यस्मिन्ज्ञानिनि दृष्टे सति ज्ञान्येव पुरुषः **भूयिष्टं** महान्त-

निति मन्येत मया दृष्टोऽसौ ज्ञानिमेज्ञानिति जानाति ॥ तत्र दृष्टान्तमाह प्रावृषीति । **प्रावृषि** वर्षाकाले **तृणोदकमिव** वर्षाकाले तृणस्योदकस भूयस्त्वं यथा प्रत्यक्षतो जनैर्ज्ञायते, तथा ज्ञानिनि दृष्टे सति ज्ञानिभि तन्महत्वं प्रत्यक्षतो ज्ञायत इति । अयं दृष्टान्तः महत्वज्ञानविषय इति ज्ञातव्यं ॥ **तत्** तस्मात्, ज्ञानिनि महत्वमस्तीति हेतोः **जीवन्** गार्हस्थेन जीवमानः पुरुषः **ब्राह्मणस्य** ब्रह्मज्ञानसंपन्नस्य तथाविधस्य ज्ञानिनः **अन्नं** सदन्नं **उदकं** शुच्युदकं च दत्वा **नानुसंज्वरेत्** अभितप्तो न भवतीत्यभिप्रायः । सांसारिकतापत्रयाभितप्तो नभवेत्, "महत्सेवां द्वारमाहुर्विमुक्तेः" "सत्संगमो तदैव सद्गता" वित्यादिना महत्सेवायाः महाफलप्रापकत्वश्रवणात् । अनेन संसारिणां महत्सेवैव सर्वानिष्ट-निवर्तिनीत्यसूचि ॥९॥

यत्राकथयमानस्य प्रयच्छन्त्यशिवं भयम् ।
अतिरिक्तमिवाकुर्वन्स श्रेयान्नेतरो जनः ॥१०॥

महाफलप्राप्तये सर्वसाधनानां महत्सेवाया एव प्रथमसाधनत्वा-त्स्वविहितेमार्गे पुरुषेण "ऊर्ध्वं प्राणा उत्क्रामन्ति" "यूनः स्थविर आयाते" "अभ्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते" "दृष्टिं दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृतां । उत्थाय चासनं दद्यादेष धर्मः सनातनः" इत्यादि प्रमाणानुसारेण महत्सेवैव कार्या, न चेत्स्वात्मन एव महानर्थप्राप्तिरित्युपदिशति–यत्रेति

यत्र यस्मिन्ज्ञानिनि दृष्टे सति **अकथयमानस्य** तेन सह भक्त्या कुशलप्रश्नादिना संभाषणादिसेवामकुर्वाणस्य पुंसः **अशिवं**

आल्पायुष्वादिप्रदानादिना मरणादिरूपममङ्गलं **भयं** पारत्रिकनरकभयं **च प्रयच्छन्ति** देवा इति शेषः ॥ ननु यस्मिन्ज्ञानिनि दृष्टमात्र एव सत्कारमकुर्वतो महानर्थप्राप्तिः, सज्ञानी किं लक्षणक? इत्याशङ्कायां तल्लक्षणान्याह—अतिरिक्तमिति । यः ज्ञानी आत्मानं **अतिरिक्तं** परकृतावमानादिनोत्थकोपाद्यभिव्यक्तिकरणेनातिशयिनं **अकुर्वन्नेवास्ते** इति शेषः, **सः स एव** ज्ञानि **श्रेयान्** । पुण्याधिक्यवान् श्रेष्ठतम इत्यर्थः । **इतरः** मानापमानजनितसुखदुःखादिनोत्थरागद्वेषशीलः **जनः न** श्रेयान् । 'अनेनयएकंतक्षतोबाहुं चन्दनेनैकमुक्षतः । नाकल्याणं न कल्याणं चिन्तयीतोभयोस्तयो'रिति प्रमाणोक्तार्थानुसारिप्रवृत्तिमानेवापरोक्षज्ञनी, नान्य इति ज्ञानिनो लक्षणमित्यभिहितं ॥१०॥

यो वा कथयमानस्य ह्यात्मानं नानुसंज्वरेत् ।
ब्रह्मस्वं नोपहन्याद्वा तद्व्रतं (तदन्नं) संमतं सताम् ॥११॥

इतोपि "जनेनावमतो योगी योगसिद्धिं स विन्दति । "सन्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव ॥ असन्मानात्तपो वृद्धिं सन्मानात्तपसः क्षयः" इत्यादिप्रमाणोक्तानुसन्धानज्ञानसंपन्नो अभिमानशून्य एव ज्ञानीति तल्लक्षणान्येवानुवदति य इति । **यः** विषयालंबुद्धिसंपन्नो ज्ञानी **अकथयमानस्य** अन्यैः सह माहात्म्यस्तवनादिना ख्यातिरूपेण अनाख्यायमानस्य स्वात्मनो विषय इतिशेषः **नानुसंज्वरेत्** खेदादिना स्वमनो न संतापयेत्, **वा इति** समुच्चये । **ब्रह्मस्वं** ब्रह्मणः परब्रह्मणः स्वं स्वकीयं सर्वस्वातंत्र्यादिधर्मं च **नोपहन्यात्** न हिंस्यात् । अत्र ब्रह्मस्वहननं नाम "अहं ब्रह्मास्मीति परब्रह्मणस्तादात्म्येन

मिथ्योपासनैव ब्रह्मस्वहननमित्युच्यत इत्यर्थः ॥ **तत्** तस्य विषयालंबुद्धिविशिष्टब्रह्मज्ञानसंपन्नस्य ज्ञानिनो **दत्तं** "दानं ध्रुवं फलति पात्रगुणानुकूल्या"दित्यर्थानुसन्धानेन दत्तं समर्पितं अन्नादिद्रव्यं **सतां** ज्ञानिनां **सम्मतं** दातुर्महाफलापादकत्वेन सम्मतमिति । यद्वा, **तत्** तादृशब्रह्मज्ञानिना दत्तं अन्नमुदकं वा **सतां** ज्ञानिनां **संमतं** "पातके महति प्राप्ते प्रायश्चित्तविवर्जिते । याचयेद्वैष्णवस्यान्नं तदभावे जलं पिबेदि"त्युक्तत्वात् ज्ञानिदत्तान्नादिस्वीकारेण पातकिनां महापापनिवर्तकत्वेन संमतमिति वा ॥११॥

नित्यमज्ञातचर्या मे इति मन्येत ब्राह्मणः ।
ज्ञातीनां तु वसन्मध्ये नैव विन्देत किश्चन ॥१२॥

ज्ञानसहकारिणामेव श्रुतिस्मृत्युदितानां वर्णाश्रमधर्माणां मोक्षसाधनत्वं, नान्येषामिति ज्ञापनाय "गृहस्थोपि विमुच्यत" इत्यादि प्रमाणानुसारेण ज्ञानहीनसन्यासाद्याश्रमाद्यपेक्षया ज्ञानसंपन्ननिवृत्तधर्मानुष्ठानशीलग्रहस्थ एव श्रेयानिति तत्प्रवृत्तिमुपदिशति—नित्यमिति । **ब्राह्मणः** ब्रह्मज्ञानी गृहस्थः **नित्यं** सर्वदा **मे** ज्ञानिनो मम **अज्ञातचर्या** महिमागूहनेनान्यापरिज्ञातचर्या अस्त्व**ति मन्येत** जानीयात् । यद्वा **अज्ञातचर्या** अज्ञाते साकल्येन सर्वापरिज्ञाते विष्णौ चर्या प्रवृत्तिः **नित्यं मे** अस्त्विति वा **मन्येत** ॥ एवंविधो ज्ञानी **ज्ञातीनां** पुत्रकलत्रादीनां **मध्ये वसन्नपि** गार्हस्थ्यधर्मेणैव वसन्नपि **किश्चन** किञ्चिदपि पापादिकं **नैवविन्देत** नाप्नुयादेव । अनेन ज्ञानपूर्वककर्मानुष्ठानस्यैव मोक्षसाधनत्वं, नान्यस्येति निर्णय इति ॥१२॥

को ह्येवमन्तरात्मानं ब्राह्मणो हन्तुमर्हति ।
निर्लिङ्गमचलं शुद्धं सर्वद्वन्द्वविवर्जितम् ॥१३॥

ब्रह्मणो यद्यज्ञातता चोच्यते तर्हि शशविषाणवदनिर्वचनीयं च प्रसज्येतेति चेन्न " यतो वाचो निवर्तन्ते " "न ते विष्णो जायमानो न जातो देवामहिम्नः परमं तमापे"त्यादिश्रुतिस्मृतिषु सर्वान्तर्यामित्वादिगुणविशिष्टस्य ब्रह्मणः साकल्येना ज्ञेयत्वमेवाज्ञातत्वमित्युच्यते, न तु सर्वथाऽज्ञानविषयत्वमित्यतो न शङ्कावसर इति ज्ञापनाय अस्मिन्श्लोके ब्रह्मणो सर्वापरिज्ञेयत्वादिलक्षणान्याह क इति । **कः ब्राह्मणः** कोपि वा ज्ञानी पुरुषः **एनं** श्रुत्यादिषु अपरिज्ञेयमहिमावत्वेन प्रसिद्धं **अन्तरात्मानं** सर्वान्तर्यामिणं **निर्लिङ्गं** अनादितो लिंगसंबन्धशून्यं **अचलं** सर्वदैकप्रकारं **शुद्धं** निर्दुष्टं **सर्वद्वद्वनविवार्जितं** शीतोष्णादिद्वंद्वसंबन्धजनितसुखदुखादिलेपहीनं **एवंविधं** भगवन्तम् **मन्तुं** साकल्येन ज्ञातुं **अर्हति** समर्थो भवति ? न कोपीत्यर्थः ॥१३॥

योऽन्यथासन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥१४॥

एवमुक्तरीत्या नित्यस्वतंत्रत्व-दुःखाऽस्पृष्टत्व स्वाधीनसत्ताकत्व-साकल्येन सर्वाऽपरिज्ञेयत्वाद्यनेकसद्गुणपूर्णस्य हरेरस्वतंत्रत्व-दुःखस्पृष्टत्व पराधीनसत्ताकत्वाद्यनेकदोषदुष्टस्य जीवस्य च "द्वासुपर्णे"त्यादि श्रुत्युक्तकर्मफलाशनानशनभेदेन सर्वदा वैलक्षण्योपेतबिंबभावस्य अनादित एव सिद्धत्वाद्भगवतः स्वामिसेवकभावोपास्तिमपहाय "ब्रह्माहमस्मी"त्यैक्यो-

पासनशील :पुरुषः सर्वपापभागिति विवक्ते—**य इति**। यस्तथाऽधिकारी जीवः **अन्यथासन्तं** विरुद्धधर्माधिकरणत्वेन जीववैलक्षण्येन स्थितं **आत्मानं** सर्वान्तर्यामिणं भगवन्तं **अन्यथा** स्वात्मैक्यभावेन **[प्रतिपद्यते]** मनुते, **तेन [आत्मापहारिणा]** स्वातंत्र्यादिसर्वगुण-संपन्नेश्वरापहारापराधवता **चोरेण** स्वात्मन्यविद्यमानभगवन्निष्ठगुण-स्वीकाराच्चोरस्ताहशेन चोरेण पापिना **किं** कीदृशं **पापं** अन्धंतमःप्रापकं पापं **न कृतं** नाचरितं? किन्तु पापत्वावच्छिन्नं पापं सर्वमपि पाप कृतमेवेत्यर्थः। अनेनैक्योपासनायाः सर्वपापसाधनत्वेन अधिकारिणा सा सर्वथा न कार्येत्यभिप्रायोऽसूचीति ॥१४॥

अश्रान्तः स्यादनादाता संमतो निरुपद्रवः।
शिष्टोनाशिष्टवत् स्याद्ब्राह्मणो ब्रह्मवित्कविः ॥१५॥

एवं मिथ्याभूतजीवेशाभेदज्ञानस्य अन्धंतमःप्रापकमहापाप-साधनत्वान्मुमुक्षुणा विषयविरक्तिपूर्वकं मिथ्याज्ञानं न संपादनीयमेवे-त्याह—अश्रान्त इति। **अनादानात्** स्वात्मनि मिथ्याभूतपरब्रह्मैक्य-ज्ञानजनितेश्वरनिष्ठस्वातंत्र्यादिगुणास्वीकारात् **अश्रान्तः** मिथ्याज्ञानि-प्राप्यनियदुःखात्मकतमस्संबन्धिदुःखानुभवश्रमरहितः **स्या**दिति सर्वत्र संबध्यते ॥ यद्वा, **अनादानात्** "मात्रास्पर्शास्तु कौन्तेये" त्यादिषु दुःखदत्वेनोक्तविषयाणामस्वीकारात् **अश्रान्तः** तदनुभवोत्पन्न-श्रमरहितः **स्या**दितिवा। **संमतः** शिष्टसंमतसदाचाराचरणेन वेदशास्त्राणां संमतः स्यात्। **निरुपद्रवः** देहगेहादिष्वत्यासक्तिजनित-सांसारिकोपद्रवरहितःस्यात्। यद्वा, कामक्रोधाद्यरिषड्वर्गकृतोपद्रवरहितो वा स्यादिति। **शिष्टो** गुर्वादिभिः सर्वदा शिष्टोपि, 'अहं तु शिष्ट

एवास्मि, मया सर्वं ज्ञातमेवास्त्यतःपरमगुर्वादिभिः शिक्षणीयांशो नास्त्येवे'ति दुरहङ्कारमपहाय शिष्टसज्जनाननुसृत्य वारंवारं सच्छास्त्र-श्रवणादिविषयेऽ**नशिष्टवत्** कदाप्यशिक्षितवदादरवान्**स्यात्** । अनेन शिक्षितोपि पुनः शिक्षाविषये स्वोत्तमेषु शिक्षितवत्स्वात्मानं न प्रकाशयेदित्यभिप्रायः सूचितः ॥ **ब्राह्मणः** एवं विप्रो ब्राह्मण एव **ब्रह्मवित्** ब्रह्मज्ञानी, नान्यः **सः** स एव **कविः** स्वोद्धाराय चतुरः ॥१५॥

ये यथा वान्तमश्नन्ति श्वाला नित्यमभूतये ।
एवं ते वान्तमश्नन्ति स्ववीर्यस्योपभोजनात् ॥१६॥

परमहंसाचार्यः सर्वज्ञः सनत्सुजातमुनिः "काम्यानां कर्मणां न्यासं सन्यासं कवयो विदुः" "ससन्न्यासी च योगी च न निरग्निर्न चाक्रिय" इत्यादिप्रमाणोक्तसन्न्यासापरपर्याय काम्यकर्मन्यासरूपसंन्यास धर्मविशिष्टगृहाश्रम्यनुष्ठेयमोक्षसाधनीभूतभागवतधर्मानभिधायेदानीं परमहंसाश्रमधर्मान् अभिधातुकामस्त्वादौ चतुर्थाश्रमिणां स्वाश्रमोचित-धर्मापरिज्ञानेन स्वपूर्वाश्रमोपार्जितधनादिनोत्पन्नान्नादिना स्वयात्रा-चरणेन तेषां महानर्थप्राप्तिरिति सदृष्टान्तोपपादनेन'संन्यासिभिर्देहयात्रा-वशेषित' इत्यादिप्रमाणानुसारेण सर्वं परित्यज्य ज्ञानपूर्वकाऽनुष्ठानमेव कार्यं, नान्यथेत्युपदिशति—**य** इति । "मूढाः श्वालाइति प्रोक्ताः श्वा श्वाला इति चोच्यत" इत्यभिधानात् **ये श्वालाः** जात्या ये श्वानाः ते **अभूतये** स्वकृतपापफलभोगाय **नित्यं वान्तं** स्ववान्तमेवोद्गारितं स्ववमनमित्यर्थः, **अश्नन्ति** खादन्ति ; **एवं** तथा **ते श्वालाः** ते मूर्खाः, संन्यासं गृहीत्वा सन्यासधर्मानभिज्ञाः मूर्खसंन्यासिन इति

स्ववीर्यस्य चतुर्थाश्रमस्वीकारात् पूर्वमेव स्वशक्त्योपार्जितस्य हिरण्यादेः **उपभोजनात्** चतुर्थाश्रमस्वीकारानन्तरमपि तदुपभोगेनैव स्वदेहयात्राकरणात् **वान्तं** वमनमेवा**श्नन्ती**त्युच्यते । कुत इति चेत्, संन्यासग्रहणसमये सर्वं न्यस्तामिति पूर्वपरिगृहीतसर्ववस्तुनः परित्यागविधानात्, संन्यासग्रहणानन्तरं स्वदेहयात्रानिर्वाहाय पुनस्तत्स्वीकारे वान्ताशी भवतीति शास्त्रनिश्चयात् । भिक्षुणा पूर्वाश्रमार्जितहिरण्यादिस्वीकारो न कार्य इत्यभिप्रायः ॥१६॥

अनाढ्या मानुषे वित्ते आढ्या वेदेषु ये द्विजाः ।
ते दुर्धर्षा दुष्प्रकंप्या विन्द्यात्तान्ब्रह्मणस्तनुम् ॥१७॥

ननु यदि हि संन्यासिनां हिरण्यादिस्वीकारो न युक्तः तर्हि तदभावेन देहयात्रासंभवात् तेषांसंन्यासधर्माचरणोच्छेदप्रसंग इति चेत् "चीराणि किं पथि न संन्ति दिशांति भिक्षा"मित्यादौ विरक्तिभूषणनां मस्करिणां एवं प्रकारान्तरेण जीवनोपायस्योक्तत्वात्, "कस्माद्भजन्ति कवयो धनदुर्मदान्धा"निति धनोपार्जनस्य निषेधितत्वाच्च तत्परित्यज्य वैदिकधनोपार्जनमेव कार्यं, महापुरुषार्थहेतुत्वादिति तदुपपादयति— **अनाढ्या** इति **मानुषे** प्रवृत्तिमार्गवर्तिमनुष्यसंबन्धिनि **वित्ते** हिरण्यादिसंसारोपयोगिनि वित्ते **अनाढ्याः** निष्किञ्चनाः **वेदेषु** वेदयन्तीति वेदाः, "विद् ज्ञाने" इति धातोः, तेषु वेदसच्छास्त्रारण्यधनेषु **आढ्याः** तदध्ययनादिना संपन्नाः, एवंभूता **ये द्विजाः** ये संन्यासिनः, एवस्मिन्नेव जन्मनि ब्रह्मचर्याद्याश्रमत्रयंअनुभूय चतुर्थाश्रमस्वीकारसमये स्वोत्तमपरमहंसकरकमलसुजातत्वेन पुनर्जन्मा-

न्तरप्राप्त्या यतीनां द्विजत्वमिति यद्वा, ब्रह्मचर्याद्याश्रमविशिष्टाः द्विजाः वा । **ते** तादृशाः एवं द्विजाः **दुर्धर्षाः दुष्टै**र्वा मिथ्याज्ञानिभिर्वा न निग्राह्याः **दुष्प्रकंप्याः** निवृत्तिमार्गानुष्ठानाद्दुर्जनैश्चालयितुमशक्याः ॥ एवंविधा ये द्विजाः **तान् ब्रह्मणः** परब्रह्मणः तनून् "ज्ञानी त्वात्मैव मे मतं"इत्यादिप्रमाणानुसारेण विशेषसन्निधानपात्रत्वात्प्रतिमास्थानीयान् **विन्द्यात्** जानीयात् ज्ञानीति शेषः । "विद् ज्ञाने" इति धातुः ॥१७॥

सर्वान्स्विष्टकृतो देवान्विन्द्याद्य इह कश्चन ।
न समानो ब्राह्मणः स्याद्यस्मिन्प्रयतते स्वयम् ॥१८॥

नित्यं सर्वोत्तमत्वेन सर्वोपकारित्वेन सर्वस्वातंत्र्याद्यनन्तगुणपूर्णत्वेन नारायणं भजमानेन ज्ञानिना स्वात्मनः सर्वेन्द्रियाणां सन्मार्गप्रवृत्तौ प्रेरणात्तदधीनसत्तासंपन्नतदितररमादिसर्वतत्त्वदेवेष्वपि महोपकारित्वसंभवाद्विशेषतो भगवदनुग्रहप्राप्तये तेऽपि भजनीया इत्याह— **सर्वानिति** । अस्मिन्श्लोके "कश्चने"ति पदस्य 'कः च ने'ति पदच्छेदः । **यः कः** को ज्ञानी **इह** अस्मिन्स्वदेहे सर्वानशेषान्देवान् तत्त्वाभिमानिनो देवान् **स्विष्टकृतः** स्वस्येष्टकारिण इति **विन्द्यात्** जानीयात् सः **ब्राह्मणः** स एव ब्राह्मणः **समानः** "माङ् मान"इति धातोः मानेन ज्ञानेन सहितः **नेति न,** किन्तु ज्ञानसंपन्न एवेति । अनेन रमादिसर्वतत्त्वदेवेषु स्वात्मनो महोपकारित्वज्ञानपूर्वकं तारतम्यज्ञानवानेव ज्ञानी, न तु तूष्णीं शास्त्राध्ययनवानित्यभिप्रायो दर्शितः ॥ 'कश्चने'ति पदच्छेदः—**यः कश्चन** ब्राह्मणः स्वेष्टकारितत्त्वदेवान् तरतमभावनया विना **विन्द्यात्** जानीयात्, स **ब्राह्मणः** तत्तद्देवतातारतम्यज्ञानसंपन्न-ज्ञानिनः **समानः न स्यात्** ; तत्समानो न भवति, किन्तु नीच

इत्यर्थः ॥ कुत इति चेत्—**यतः स्वयं** स्वयमेव स ब्राह्मणः **यस्मिन्** आभिमानिकसंसारं **यतते**; देहगेहादावेव तदीयाभिमानेन तत्रैव प्रयत्नशीलो वर्तते । अतो विरुद्धधर्माधिकरणज्ञानिनो न समान इति पूर्वेण [संबन्धः] ॥ अनेन अभिमानिकसंसारसक्तिसंपन्नाज्ञानिब्राह्मणस्य संसारविमुक्तनिरभिमान्यपरोक्षज्ञानिनः कथं साम्यं स्यात् ? न कथमपी-त्यर्थो दर्शित इति ॥१८॥

यमप्रयतमानं तु मानयन्ति स मानिनः ।
तं मान्यमानो मन्येत नावमानेऽतु संज्वरेत् ॥२९॥

मानापमानज्ञानशून्य - देहाभिमानरहित असंप्रज्ञातसमाधिदृष्ट-भगवदपरोक्षसुखमग्न ज्ञानिसामान्यलक्षणमुक्त्वा इदानीं तस्यैव विशेष-लक्षणान्याह **यमिति** । **अप्रयतमानं** अन्येभ्यः स्वबहुमानाय प्रयत्नमकुर्वाणं **यं** ज्ञानिनं दृष्ट्वेति शेषः **मानिनः** ज्ञानिनः; "माङ् मान" इति धातुः, 'इण् गता'विति धातुद्वयबलात् मानेन ज्ञानेन इताः, मानिनो ज्ञानिन इति, यद्वा—मानिनः मानोऽहंकारस्तेन इताः, ऐश्वर्याद्यहंकारसंपन्ना राजानो **वा; मानयन्ति** नमनादिसत्कारं कुर्वन्ति **मान्यमानः** मान्यं ज्ञानिजनमान्यं मानं ज्ञानं यस्यासौ तथा सः एतादृशस्तदन्यो ज्ञानी **मन्येत तं** सर्वमानिनमेव ज्ञानिनं जानीयात् । यद्वा—अहमपि एवमेव देहाभिमानशून्यज्ञानी स्यामिति **तं** दृष्ट्वा **मन्येते**ति वा ॥ अनंतरं **अवमाने** स्वात्मन अन्येभ्यः असन्माने जातेपि **न संज्वरेत्** जनितक्लेशेन सन्तप्तो न स्यात् ॥ अनेन ज्ञानी स्वान्यदेहाभिमानशून्यज्ञानिदृष्टान्तेन स्वयमपि तथाविधाचारशीलः स्यादित्यर्थः सूचित इति ॥१९॥

लोकस्वभाव एषो हि निमेषोन्मेषवत्सदा ।
विद्वांसो मानयन्तीह इति मन्येत मानितः ॥२०॥

इदानीं द्वन्द्वसहिष्णुत्वमेव ज्ञानिनो मुख्यो धर्म इति ज्ञापयितुं ज्ञानिनोपि पुरुषसामान्यात्परकृत सन्मानादिजनितसुखाद्यनुभवस्य सत्वेपि स्वस्य ज्ञानित्वेन पामरजनकृतमानापमानयोः तात्कालिकत्वात् ज्ञानिना स्वनिष्ठज्ञानदार्ढ्येनैव सुखादिजनितविकासादिभावो न सन्दर्शनीयैवेत्याह—**लोकस्वभाव** इति । **एषः** सन्मानासन्मानकरणलक्षणः **लोकस्वभावः** लोकानां पामराणां जनानां स्वभावः स्वाभाविको धर्मः **निमेषोन्मेषवत्** अक्ष्णोर्निमेषोन्मेषवत **सदा** सर्वदा "सुखस्यान्तरं दुःखं दुःखस्यान्तरं सुख" मिति **इह** संसारदशायां **विद्वांसः** अपरोक्षज्ञानिनः **मानयान्ति** मानं ज्ञानं यन्ति प्राप्नुवन्ति, "या प्रापण"इति धातुः। सुखदुःखयोरन्योन्यानन्तर्येणानुभोक्तव्यत्वमनित्यत्वं च जानन्तीत्यर्थः ॥ अतः **मानितः** जनैः सन्मानितो, उपलक्षणतः असन्मानितोपि ज्ञानी **इह** संसारे **मन्येत** अन्यकृतयोः सुखदुःखयोरनित्यत्वं जानीयात् ॥२०॥

अधर्मविदुषो मूढाः लोके शास्त्रविवर्जिताः ।
न मान्यं मानयिष्यन्ति (इति) एवं मन्येदमानितः ॥२१॥

ननु सन्मानयोग्यानां ज्ञानीनां महद्भिरसन्मानकरणे को हेतुरित्याशंङ्कायां तेषां सच्छास्त्राभ्यासाकरणेन धर्मज्ञानशून्यत्वमेव हेतुरिति ज्ञात्वा ज्ञानी तैरवतो मानितोपि न क्लिष्टो भूयादिति तां परिहरति—**अधर्मविदुषः** इति। **लोके** मनुष्यलोके ये **शास्त्रविवर्जिताः** सच्छास्त्राध्ययनजन्यज्ञानहीनाः अत एवा**धर्मविदुषः** सच्छास्त्रजन्य-

ज्ञानहीनत्वेन अथर्मज्ञानसंपन्नाः ये अज्ञानिनस्त एव **मान्यं** सन्मानयोग्यं ज्ञानिनं **न मानयिष्यन्ति** न सन्मानयिष्यन्ति । **अमानितः** तैरेव सन्मानितोपि **इति** अज्ञत्वादेते मामवमन्यन्तेत्येव **मन्येत्** जानीयात् ॥२१॥

न वै मानं च मौनं च सहितौ वसतः सदा ।
अयं हि लोको मानस्य ह्यसौ मौनस्य तद्विदुः ॥२२॥

एवमज्ञानजनितदेहगेहादिनिष्टभूताभिमानशून्यज्ञानिलक्षणान्यभिधायेदानीं विरुद्धधर्माधिकरणयोर्दुरभिमानानभिमानयोर्विषयव्यवस्थां दर्शयति---**नेति** । **मानं** देहादिषु मदीयत्वरूपो दुरभिमानः । लिङ्गव्यत्ययः "छान्दसत्वान्न दोषाय"। **मौनं** संबंवप्राप्तसुखादिजनितविकासाद्यऽप्रदर्शनरूपतूष्णींभावः **चेति** परस्परसमुच्चये, उभौ मानमौनाविति धर्मौ **सहितौ** एकाधिष्ठान एव मिलितौ, भूत्वेति शेषः **सदा** कदापि **न वसतः** न तिष्ठतः ॥ ननु तर्हि मानमौनयोरेकाधिष्ठानावस्थानाभावे कस्य किमधिष्टानमित्यतो विवेकमाह— **अयमिति** । अयं प्रत्यक्षगोचरः **लोकः** संसारी जनः **मानस्या**भिमानस्याधिष्टानमिति शेषः **असौ** निवृत्तिमार्गवर्त्यपरोक्षसंबंधि **लोकः** ज्ञानिजनः । लोक इत्युभयत्र संबध्यते । **मौनस्य** द्वंद्वसहनरूपतूष्णींभावस्य अधिष्टानमिति **तत्** तदेत**द्विदुः** कथयो विदुरिति ॥२२॥

श्रीर्हि माना(कामा)र्थसंजाता सा चापि परिपन्थिनी ।
ब्राह्मी सुदुर्लभा श्रीर्हि प्रज्ञाहीनेन क्षत्रिय ॥२३॥

अतिप्रयत्नसाध्यविषयविरक्तिविशिष्टनिरभिमानपूर्वकभगवदर्पणानुसन्धानोपेतसंन्यासाद्याश्रमधर्माचरणं स्वरूपसुखाभिव्यक्तये खलु

कार्यमिति विधीयते चेत्तर्हि तस्य विषयोपरक्तिपूर्वकदुरभिमानसहकारि-अल्पायाससाध्यकाम्यकर्मानुष्ठानेनापि स्वर्गादिसुखप्राप्तिश्रवणात् अन्यतरयोः अतिक्लेशकरंपूर्वोक्तधर्माचरणमेव सुखेप्सुना किमर्थमनुष्ठेयं इत्याकाङ्क्षायां "हित्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्कोथ पतेत्ततो यदि । यत्र क्व वा भद्रमभूदमुष्य को वार्थ आप्तो भजतां स्वधर्म"मिति भागवतोक्तरीत्या साभिमानचरितकर्मणां मोक्षमार्गपरिपन्थित्वेनानित्यत्वेन च पतनानन्तरं दुःखसाधनत्वात्काम्यकर्मसाध्यस्वर्गादिकस्य पामराणां सुखवदवभासमानत्वेपि मुमुक्षुणस्तत्तद्धेयमित्युपदिशन्साभिमान्यन-भिमानिकृतसुकृतजनितपारत्रिकफलस्य वैलक्षण्यमप्याह—**श्रीरिति** । **मानार्थसंजाता** मानो दुरभिमानः अर्थ्यत इत्यर्थो विषयवर्गस्ताभ्यां संजाता समुत्पन्ना, यद्वा—कामार्थसंजाता कामाः विषयास्तेषामर्थे सञ्जातेति वा; आभिमानिकविषयाभिलाषकृतकाम्यकर्म जनितस्वर्गा-दिस्थेत्यर्थः, **श्रीः** स्वर्गादि श्रीः **परिपन्थिनी** अनित्यत्वा-द्दोषदुष्टत्वान्मोक्षविरोधिनी । **हीत्यनेन** तस्याः सदोषित्वेन हेयत्वं सूच्यते । **ब्राह्मी** ब्रह्मज्ञानप्राप्त **श्रीः** मोक्षश्रीः **प्रज्ञाहीनेन** निरहंकारपूर्वकविष्णुसर्वोत्तमत्वज्ञानशून्येन पुरुषेण **दुर्लभा** दुष्प्रापा । अत्रापि **हीत्यनेन** ब्राह्मलक्ष्म्याः नित्यसुखात्मत्वेन तस्या एवापाद्यत्वं सूच्यते ॥२३॥

द्वाराणि सम्यक्प्रवदन्ति सन्तो बहुप्रकाराणि दुराचराणि ।
सत्यार्जवे ह्रीर्दमशौचविद्या षण्मानमोहप्रतिबन्धकानि ॥२४॥

सर्वज्ञः सनत्सुजातः "प्रमादं वै मृत्युमहं ब्रवीमी" (अ. १ श्लो. ४) त्यारभ्य यावदध्यायान्तं (१) मिथ्याज्ञाना ज्ञानयोरेवानर्थप्रदत्वं,

(२) तत्परिहारसाधनविष्णुसर्वोत्तमत्वज्ञानस्यैव मोक्षसुखप्रदत्वं, (३) परिहारसाधनविष्णुसर्वोत्तमज्ञानं ब्रह्मागमप्रमाणैः संसाध्योपसंहरन् पुनरपि प्रश्नबीजमुत्पादयितुं मिथ्याज्ञानऽज्ञानशब्दपर्यायवाच्ययोर्मानमोहयो-र्विनाशाय स्त्रीशूद्रादिसर्वाधिकारिसाधारणसाधनानुष्ठानषट्कमुपदिशति—द्वाराणीति । **सन्तः** शास्त्रार्थाभिज्ञाः ज्ञानिभिः **मानमोहप्रतिबन्धकानि**—मानो देहादौ मदीयत्वरूपः मिथ्याहङ्कारः, देहगेहादिषु अनित्यत्वं प्रत्यक्षेण पश्यन्नपि न पश्यन्निव प्रवृत्तिर्मोहः, एवं विधयोर्मान-मोहयोः प्रतिबंधकानि स्तंभकानि **षट्** षट्सङ्ख्याकानि साधनानीति संतः **प्रवदन्ति ।** तानि साधनानि कीदृक्लक्षणानि ? **दुराचाराणि** श्रमसाध्यानि । षण्णां नामान्यह—सत्यार्जव इत्यादिना (१-२) **सत्यार्जवे** सत्यं यथार्थभाषणं, भूतहितं वा, आर्जवं ऋजुमार्गवर्तित्वं, एवंविधे सत्यार्जवे चेति (३) **ह्रीः** निषिद्धाचरणे लज्जा (४) **दमो** इन्द्रियनिग्रहः (५) **शौचं** मृज्जलाभ्यां कृतं बाह्यं, भावशुद्धिस्तथांतरमिति द्विविधं शौचं (६) **विद्या** पराऽपरविषया ब्रह्मविद्या । इत्येते षट् मानमोहनाशकानीत्यर्थः ॥४॥

इत्युद्योगपर्वणि सनत्सुजातोक्तदुर्बोधार्थप्रकाशिकायां वादिराजीययां

द्वितीयोऽध्यायः

अथ तृतीयाऽध्यायः ॥

धृतराष्ट्र उवाच—

कस्यैष मौनः कतरन्नु मौनं प्रब्रूहि विद्वन्निह मौनभावं ।
मौनेन विद्वानुपयाति मौनं कथं मुने मौनमिहाचरन्ति ॥१॥

एवं धृतराष्ट्रः "असौ मौनस्ये"त्यादिना श्रुतमौनविषयज्ञानिलक्षणोपि पुनस्तदेव विशेषतो ज्ञातुकामो मौनादिस्वरूपं विविच्य पृच्छति—**कस्येति** । हे **विद्वन्** सर्वज्ञ सनत्सुजात ! **एषः** "असौ मौनस्ये"त्यादिना त्वया अभिहितः **मौनः कस्य ?** कथंभूतस्य ब्राह्मणस्य विषयः ? **मौनं कतरत्** कस्य पक्षपाती ? अथवा मौनं किं लक्षणकमिति वा । **मौनभावं** मौनस्वभावं, मौनस्य विद्यमानत्वं **मौनेन** येन मौनानुष्ठानेन **विद्वान्** ज्ञानी **मौनं** मुनिप्राप्यं भगवन्तं, पुण्यसाधनीभूतप्रसिद्धमौनं वा, **उपयाति** प्राप्नोति । हे **मुने** मौनाख्यधर्मनिष्ठसनत्सुजात ! **मौनं** महापुरुषार्थसाधनं त्वदभिमतं मौनं **कथं** केन प्रकारेण इह साधनानुष्ठानसमये आचरन्ति ज्ञानिन इति शेषः । मौनादीनां अवश्यवेद्यत्वज्ञापनाय **प्रब्रूहीत्यवोचि** । न चेद्ब्रूहीत्यनेनैव चरितार्थत्वात्प्रेत्युपसर्गसंबन्धोनस्यादिति ॥१॥

सनत्सुजात उवाच—

यतो न वेदा मनसैव हीनमनुप्रविशंति ततो न मौनम् ।
यत्रोत्थितो वेदशब्दस्तथाऽयं स तन्मयत्वेन विभाति
राजन् ॥२॥

ऋचो यजूंषि वा पापात्कर्मणः तत्कृतपापकर्मणः सकाशात् **न त्रायन्ते हि ॥** वेदपाठजनितसुकृतस्य महापापहरत्वात् पापान्न त्रायन्त इति कथं सङ्गच्छतेति मा शङ्किथाः इत्युपदिशति—**नेति । अहं ते** तव अस्मिन्विषये, **मिथ्या** असत्यं **न ब्रवीमीति** । ऋगादीनां स्वस्वावान्तरशाखाभेदविवक्षयात्र बहुवचनोक्तिरिति ॥४॥

न छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्तमानम् ।
छन्दांसि तं प्रजहन्त्यन्तकाले नीडं शकुन्ता इव जातपक्षाः ॥५॥

ननु तर्हि पठिता वेदाः पठितारं पापात्कर्मणो न त्रायन्ते चेत्तर्हि किं कुर्वन्तीत्याशङ्कायां "यस्तं न वेद किमृचा करिष्यती"ति श्रुतिबलात् मुख्यतः प्रतिपाद्यवस्तु ज्ञानार्थशून्यपाठमात्रनिष्टमोहाचारशीलमिथ्याज्ञानसंपन्न दुष्टज्ञानब्राह्मणकृतपापपरिहारमकृत्वैव पुनरन्तकाले तं विहाय गच्छन्तीत्याह—नेति । **ने**त्यनेन अत्र **छन्दांसी**त्यनेन वर्णात्मकानां छन्दसां जडत्वात्तदुपलक्षितास्तच्छन्दवाच्यास्तदभिमानिनोदेवा एव ग्राह्याः । छन्दांसि ऋगादीनामभिमानिनो तन्नामानो देवाः **मायाविनं** मिथ्याज्ञानिनं, धर्मध्वजिनं वा, **मायया** वेदार्थानभिज्ञया स्वप्रज्ञया **वर्तमानं** कर्मसु प्रवर्तमानं ब्राह्मणं **वृजिनात्** पापात् **न तारयन्ति** तत्कृतनरकादिभ्य इति शेषः । अपितु **अन्तकाले** मरणकाले **तं** पापिनं ब्राह्मणं तन्निष्टस्वाभिप्रेतापरिज्ञानकृतकोपात् **प्रजहन्ति** तं परित्यज्यान्यत्र गच्छन्ति । तत्र दृष्टांतमाह—**नीडमिति जातपक्षाः** उत्पन्नपक्षाः **शकुंताः** पक्षिणः **नीडमिव** स्वोत्पत्तिस्थानमिव ॥ अनेन वेदार्थानुसन्धानज्ञानहीन वेदपाठसंपत्ति-

संपन्नस्य ब्राह्मणस्य स्वपठितवेदजनितसुकृतेन स्वाचरितदुष्कृतप्राप्त-नरकाद्यनर्थनिवृत्तिर्नास्तीति निर्णायीति ॥५॥

धृतराष्ट्र उवाच—

न चेद्वेदा वेदविदं त्रातुं शक्ता विचक्षण ।
अथ कस्मात्प्रलापोऽयं ब्राह्मणानां सनातन ॥६॥

ननु यदि अध्ययनादिना ब्राह्मण्यापादकानां वेदानां स्वाध्येतृ-ब्राह्मणकृत-पापपरिहारसामर्थ्याभावेना पुरुषार्थहेतुत्वाद्वेदपाठस्यारण्य-रोदनवद्वैयर्थ्यं स्याच्चेत्तर्हि किमर्थं ब्राह्मणैर्निरर्थकवेदपाठायासः क्रियते ? इति शङ्कते धृतराष्ट्रः—**न चेत्यनेन** । हे **विचक्षण** विशेषेण चक्षते प्रेक्षते भगवन्तमिति विचक्षणः, विशेषज्ञानसंपन्नसनत्सुजात ! **वेदाः** ऋगादयो वेदाः **वेदविदं** वेदपाठमात्रज्ञानसंपन्नं ब्राह्मणं **त्रातुं** नरकादि-भ्यस्त्रातुं न **शक्ताश्चेत्, अथ** तर्हि **अयं सनातनः** अनादितः प्राप्तः **ब्राह्मणानां प्रलापः** अरण्यरोदनवद्वेदविषयको वृथापाठरूपो वाग्व्यव-हारः **कस्मात्** कस्माद्धेतोः क्रियत ? इति ॥६॥

सनत्सुजात उवाच—

तस्यैव नामादिविशेषरूपैरिदं जगद्भाति महानुभाव ।
निर्दिश्य सम्यक्प्रवदन्ति वेदास्तद्विश्ववैरूप्यमुदाहरन्ति ॥७॥

भवेदेतदेवं—यदि वेदपाठस्यारण्यरोदनवत्सर्वथा निरर्थकत्वमेवोप-पाद्यतेऽस्माभिरिति चेन्न तथा, किन्तु "अत्मन आकाशः सम्भूतः" "यतो वा इमानि भूतानि जायन्ते" "जन्माद्यस्य यत" इत्यादिभिः साकल्येन भगवत एव जगज्जन्मादिकारणत्वप्रतिपादकानां ऋगादिकानां

सर्वेषां वेदानां, भगवति समन्वयानुसन्धानज्ञानपूर्वकपाठस्यानादित एव शिष्टपरिगृहीतत्वात्तत्पाठस्य सार्थक्योपपत्तेश्च सिद्धत्वादज्ञानपूर्वकानुष्ठानस्यैव वैयर्थ्यस्योदितत्वात्, न सर्वथा वेदपाठस्य वैयर्थ्यमित्युपदिशन् सनत्सुजातमुनिरादौ भगवत्परसर्वाभिप्रेतार्थमनुवदति—तस्यैवेति । **वेदाः** सर्ववेदाः **तस्यैव** मूलरूपस्यैव विष्णोः **नामादिविशेषरूपैः** नामादयो वासुदेवादयस्त एव विशेषबलाद्भेदवत्वेन रूप्यन्ते निरूप्न्त इति तथा तैः, यद्वा—नामादयो आनन्दादयोगुणाः, विशेषाकारेण रूप्यन्ते निरूप्यन्ते येषु वासुदेवादिरूपेषु, तैरवतारविशेषैरिति वा, **निर्दिश्य** वासुदेवाद्यनन्तरूपैरित्येवं निर्दिश्य **इदं** प्रत्यक्षादिसिद्धं **जगद्भाति** सृष्ट्यादिकाले उत्पाद्यत्वादिना प्रकाशत इति **सम्यक्** निस्संशयतया **प्रवदन्ति** "स इदं सर्वमसृजते"त्यादिना प्रवदन्ति । **तत्त**स्मान्नानारूपैः स्वातंत्र्येण जगत्सृष्ट्यादिकर्तृत्वादिहेतोस्त एव **वेदाः विश्ववैरूप्यं** जगद्वैलक्षण्यं भगवति **उदाहरंति** वदन्ति **महानुभावेति** धृतराष्ट्रसंबुद्धिः । **महति** भगवति **अनु** आनुपूर्व्येण **भावो** भक्तिर्यस्य स तथा ॥७॥

तदर्थमुक्तं तप एतदिज्या ताभ्यामसौ पुण्यमुपैति विद्वान् ।
पुण्येन पापं विनिहत्य पश्चात्स जायते ज्ञानविदीपितात्मा ॥८॥

सर्ववेत्ता सनत्सुजातमुनिर्भगवदनुसन्धानविशिष्टभावनयाऽधीतानामेव वेदानां सार्थक्यमिति संसाध्याधुना नित्यनैमित्तिकादिभेदेन "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" (गीता ४।३८) इत्यादि वेदविहितानां ब्राह्मणादिभिरनुष्ठेयानां सर्वेषां कर्मणामन्तः करणशुद्धिद्वारा भगवदपरोक्षज्ञानहेतुत्वात्परंपरया मोक्षसाधनत्वमिति वदति—

तदर्थमिति । **एतत्** ज्ञानिभिराचर्यमाणं **तपः** उपवासादिरूपं तपः **इज्या** च अग्निहोत्रादिरूपा यजनक्रिया च **तदर्थं** भगवत्प्रीत्यर्थमिति **उक्तं** वेदेषु प्रतिपादितं । **ताभ्यां** भगवत्प्रीतिसाधनीभूताभ्यां वेदविहिततपोयज्ञाभ्यां **असौ** साधको **विद्वान्** 'कर्मणा ज्ञानमातनोती'ति प्रमाणबलात् **पुण्यं** पुनं पावित्र्यापादकं यं ज्ञानं **उपैति** प्राप्नोति, प्रसिद्धपुण्यं चोपैति । **पुण्येन** भगवत्प्रीत्यापादक-वेदविहितकर्मानुष्ठान-कृतशुद्धान्तःकरणजनित——परोक्षापरोक्षरूपपुण्यशब्दवाच्यपवित्रज्ञानेन **पापं** परोक्षापरोक्षदशायामार्जितं स्वपापं **विनिहत्य** अश्लेषविनाशभावेन संहत्य **पश्चात्सर्व**पापक्षयानन्तरं **सः** अधिकारी **ज्ञानाविदीपितात्मा** ज्ञानेन निर्दुष्टापरोक्षज्ञानेन विदीपितः प्रकाशितः आत्मा स्वरूपाख्यः यस्यासौ तथोक्तः **जायते** भवति । "आत्मा (प्राणे) देहे धृतौ जीवे स्वभावे परमात्मनी"त्यभिधानं ॥ अनेन वेदविहितनिष्काम्यकर्मा-नुष्ठनद्वारा शुद्धान्तःकरणस्याधिकारिणो अपरोक्षप्राप्तिरिति ॥८॥

ज्ञानेन चात्मानमुपैति विद्वान्*थान्यथा वर्गफलानुकाङ्क्षी ।
अस्मिन्कृतं तत्परिगृह्य सर्वममुत्र भुङ्क्ते पुनरेति मार्गम् ॥९॥

एवंविधसाधनप्राप्तज्ञानविदीपितात्मनोधिकारिणस्तदनंतरं प्राप्य-स्वान्तर्यामिभगवद्रूपापरोक्षाख्यमहाफलमाह——ज्ञानेनेति । **विद्वान्** स ज्ञानी **ज्ञानेन** यथायोग्यस्वबिंबापरोक्षज्ञानेन **आत्मानं** स्वांतर्यामिणं भगवन्त**मुपैति** प्राप्नोति । यथास्वयोग्यतामनतिक्रम्य अनन्तरं नित्ययुक्तो भवतीत्यर्थः । अन्य**था** सर्वेषां वेदानां, वेदोदितानां कर्मणां

(* अथेति पक्षान्तरे)

च, भगवदर्पणान्यथाभूतविपरीतानुष्ठानेन **त्रर्गफलानुकाङ्क्षी** वर्ग
विषयवर्गः इन्द्रियवर्गो वा, तेषां फलं सुखं (तत्साधनंदेहगेहादि,) अ
प्रतिक्षणं काङ्क्षत इति स तथोक्तः, स कामी पुरुष इत्यर्थः **अस्मिन्मनु**
ष्यलोके **कृतं** सकामनयाऽऽचरितं **तत्** पुण्याख्यकर्म **परिगृह्य** गृहीत्व
अमुत्र स्वर्गादिशब्दवाच्ये परलोके **सर्वं** समग्रं **भुङ्क्ते** अनुभवति
काम्यपुण्यजनितसुखमिति शेषः । **पुनः** पुण्यक्षयानन्तरं **मार्गं** मनुष्य
लोकमार्गं **एति** आगतोभवति, । " ते तं भुक्त्वा स्वर्गलोकं विशाल
क्षीणे पुण्ये मर्त्यलोकं विशन्ती"त्येतन्मानम् ॥९॥

अस्मिँल्लोके तपस्तप्तं फलमन्यत्र भुज्यते ।
ब्राह्मणानां तपस्त्वृद्धमन्येषां तावदेव तत् ॥१०॥

ननु तर्हि प्रवृत्तिनिवृत्तिकर्मणोरामुष्मिकफलसाम्यात्किमित्यत्या
याससाध्यनिवृत्तिधर्मानुष्ठानस्यैवावश्यकत्वमितिचेन्न, कर्मणः तत्तदधिका
रिकृतकाम्यादिभेदेनामुष्मिकनश्वरानश्वरफलदातृत्वनियमादनश्वरफल
दानसमर्थनिवृत्तिधर्मानुष्ठानस्यैवावश्यविधेयत्वमुपदिशन्नादौ तावदधिका
रिद्वैविध्यं तदीयपुण्यलक्षणं तत्फलवैलक्षण्यं चोपदिशति—अस्मिन्निति
अस्मिन्लोकेकर्मभूमौ **तपः**, तप इत्युपलक्षणं, यागादिकर्म **तप्तं** चेत
फलं तज्जं फलं **अन्यत्र** परलोके **भुज्यते** अनुभूयते । नुनु "अस्मिँ
ल्लोकेतपस्तप्तं फलमन्यत्र भुज्यत" इत्येतत्सकामनिष्कामभेदेन विविधा
नामप्यधिकारिणां समानमेव किं विशिष्योच्यते, निष्कामाधिकारिणा
माधिक्यमित्यतस्तदुपपादयति—**ब्राह्मणानामिति** । **ब्राह्मणान**
ब्रह्मण्येव अणंते दर्शनस्पर्शनादिना चेष्टावन्तो भवन्ति इति ब्राह्मणाः

"अण चेष्टायामि"ति धातुः, तेषां संबन्धीति शेषः, **तपः** यागादिरूपं तपः, **ऋद्धं तु** समृद्धमेवभवति तुना सूचितोऽयमर्थः—अनुष्ठानकाल एव अनंतं सत्, मुक्तिदशायां उक्तफलादप्यधिकफलदं। **अन्येषां** ब्रह्मज्ञानहीनानां **तत्** तदेवतपआदिकं **तावदेव** यस्यकर्मणः परलोके यावत्फलमुक्तं तावदेव, नाधिकं भवति। अत्र "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यतरं भवती"ति *श्रुतिसिद्धोऽयमर्थ इति। अनेन ज्ञान्याचरितस्यैव कर्मणः महाफलदातृत्वमिति सिद्धं ॥१०॥

धृतराष्ट्र उवाच—

कथं समृद्धमप्यृद्धं तपो भवति केवलम्।
सनत्सुजात तद्ब्रूहि कथं विन्द्यामहं विभो ॥११॥

"ब्राह्मणानां तपस्त्वृद्ध" मित्यनेन ज्ञान्याचरितानामेव तपआदीनां परलोके फलातिशयत्वमिति श्रुत्वा यथोक्तविधिनाऽनुष्ठितानामेव तप आदीनां ऋद्धत्वात्पुनरपि तेषमेव केवलं समृद्धत्वं कथमिति धृतराष्ट्रः पृच्छतीत्याह—कथमिति। हे **सनत्सुजात ऋद्धं** उक्तविधिनाऽनुष्ठितेन कर्मणा अतिशयतां प्राप्तं अपि **तपः** तदेवतपः पुनः **केवलं समृद्धं कथं** केन प्रकारेण **भवती**ति शेषः। **विभो** प्रश्नार्थप्रवचनसमर्थसनत्सुजात ! **अहं तत्** एकस्यैव तपसः ऋद्धत्वं, केवलसमृद्धत्वं **च, कथं** केन प्रकारेण **विन्द्यां** जानीयां, तथा ब्रूहि इति धृतराष्ट्रः पृष्टवानिति ॥११॥

सनत्सुजात उवाच—

निष्कल्मषं तपस्त्वेतत्केवलं परिचक्षते।
एतत्समृद्धमप्यृद्धं तपो भवति नान्यथा ॥१२॥

---

* छां. उ. ५-१०-५, १-१-१०.

उक्तविधिनानुष्ठितस्य तपसः किं तत्केवलत्वमिति पृष्टः सनत्सुजातः "आमयोयं हि भूतानां जायते येन सुव्रत। तदेव ह्यामयद्रव्यं तत्पुनाति चिकित्सित" मित्यादावुक्तस्यैकस्यैवामयकारकस्य कदल्यादिद्रव्यस्य द्रव्यान्तरसंयोगेनातिशयत्वप्राप्त्या यथा आमयनिवर्तकत्वेन महाफलप्रदत्वं दृष्टचरं, तथैवात्रापि साङ्गोपाङ्गतयाऽनुष्ठित-तपआदिकर्मणां उक्तस्वर्गादिनश्वरफलप्रदत्वेनानर्थप्रदत्वस्य सत्वेपि तेषामेव भगवदनुसन्धानाख्यद्रव्यान्तरसंयोगेन अनश्वरफलप्रदज्ञान-साधनीभूतत्त्वात्तेषामेव केवलसमृद्धत्वमित्युपदिशन्नादौ स्वोक्तदृढीकरणाय ज्ञानिजनसंमत्यनुवादमुखेन तच्छङ्कामपनुदति—**निष्कलमषमिति**। **एतद्**सद्विषयीभूतमीदृक् **तपः निष्कलमषंतु** वक्ष्यमाणकल्मषरहितमेव **'तु'** इत्यनेन तदेव **केवलं** समृद्धमिति **परिचक्षते** ज्ञानिन इतिशेषः। **एतदपि** भगवदनुसन्धानहीनविषयरागान्वितज्ञानसंपृक्तं यथाविध्यनुष्ठितमपि **तप ऋद्ध**मिति परिचक्ष इति पूर्वेणान्वयः। **अपी**त्यनेन केवलं समृद्धमिति नोच्यत इत्यपि च वक्ष्यमाणत्वात्। कुत इति चेत् **नान्यथेति**। **अन्यथा** विधिना स्वानुष्ठानजनितसुकृतजन्यक्षसफलस्यातिशयकरणाख्यान्यथाभावकरणाय **न भवति** समर्थं न भवतीत्यर्थः ॥१२॥

तपोमूलमिदं सर्वं यन्मां पृच्छसि क्षत्रिय।
तपसा वेदविद्वांसः परेत्यामृतमाप्नुयुः ॥१३॥

एवमेकस्यैव तपसो द्वैविध्यापादकक्रियाविशेषमभिधायेदानीमैहिकामुष्मिकसमस्तफलापादकं तप एवेति तपस्तौति—तपोमूलमिति। **हे क्षत्रिय! इदं सर्वं** प्रत्यक्षाप्रत्यक्षविषयमैहिकामुष्मिकं अनेकविधं सुखं **यत्** यथा प्राप्यत इति **मां** यत्**पृच्छसि** तत्सर्वं **तपोमूलं** तपोबीजं

तपःकारणमिति विद्धीत्यर्थः॥ "तपसैव सर्वं विन्दन्ते"त्यत्र "तस्मात्तपसि रमन्ते"त्याद्युपनिषत्सिद्धविद्वत्समाख्यामाह—तपसेति । **विद्वांसः** विशेषेण जानन्तीति विद्वांसः ज्ञानिनः **तपसा** स्वानुष्ठिततपःकारणक-श्रेयसा **परेत्य** लिङ्गभङ्गाख्यमरणं प्राप्य **अमृतं** "अमृतं क्षेममभय-मि"ति श्रीमद्भागवतप्रमाणानुसारेण अमृतशब्दवाच्यं वैकुण्ठाख्यं भगवन्तं, वैकुण्ठलोकंच **आप्नुयुः** प्राप्नुवन् । अनेन मोक्षप्रदभगवत्प्राप्ति-र्मोक्षप्राप्तिश्च तपसैवेति निर्णायि ॥१३॥

धृतराष्ट्र उवाच—

कल्मषं तपसो ब्रूहि श्रुतं निष्कल्मषं तपः ।
सनत्सुजात येनेदं विन्द्यां गुह्यं सनातनं ॥१४॥

एवं सनत्सुजातमुखात्ज्ञातनिष्कल्मषकेवलसमृद्धतपोविभवोपि धृतराष्ट्रः तपसः कल्मषाज्ञानेन पुनरपि तं पृच्छति—कल्मषमिति । हे **सनत्सुजात !** मुने ! मया त्वन्मुखात् **निष्कल्मषं** निर्दुष्टं **तपः** तपसो लक्षणं **श्रुतं** । तपसः कल्मषं न श्रुतं **तपसः कल्मषं** किंतत **ब्रूहि** । **येन** निष्कल्मषेण चीर्णेन तपसा **गुह्यं** गोप्यं **सनातनं,** ब्रह्मेति शेषः, **विन्द्यां** अहंजानीयां । फलितार्थस्तु—यतो निष्कल्मषेणैव तपसा ब्रह्मापरोक्षज्ञानमतस्तपसः कल्मषज्ञानाभावे निष्कल्मषकेवल-तपसोनुष्ठानानुपपत्तेः, तपसः कल्मषज्ञानमावश्यकमिति हेतोस्तपसः कल्मषं ब्रूहि इत्यभिप्रायः ॥१४॥

सनत्सुजात उवाच—

क्रोधादयो द्वादश यस्य दोषास्तथा नृशंसानि च सप्त राजन् ।

ज्ञानादयो द्वादश चाततानाः शास्त्रे गुणा ये विदिता द्विजानाम् ॥१५॥

एवं धृतराष्ट्रेण पृष्टः सनत्सुजातः भगवदनुसंधानहीनतपसो बहून्दोषाननुवदति—**क्रोधादय** इति। **यस्य** तपसः **क्रोधादयः द्वादश** सङ्ख्याः कल्मषाः **तथा** यथा क्रोधादयो बहवो दोषास्तद्वत्तपस एव नृशंसबाहुल्यमप्यस्तीत्यस्मिन्नर्थे 'तथे'ति शब्दः **तथा नृशंसानि,** सप्तसङ्ख्ययेति शेषः **सप्त चे**ति 'च'शब्दस्समुच्चये। पुनर्वक्ष्यमाणैरन्यैः षड्भिःनृशंसैः सहेति संबन्धः; एवं त्रयोदश नृशंसानीति। **ज्ञानादयः** सङ्ख्यया **द्वादश** गुणाः **आततानाः** तस्यैव तपसः आततानाः सम्यग्विस्तारकरणपटवः, "तनु विस्तार" इति धातुः। एवं विधाः **द्विजानां** ब्राह्मणानां **गुणाः** तन्निष्ठधर्माः इति **शास्त्रे** धर्मशास्त्रे **विदिता** प्रतिपादिताः **ये** ज्ञानादयस्ते तपसः अतिशयापादका इति **आतताना** इत्यनेनैव सम्बन्धः ॥१५॥

क्रोधः कामो लोभमोहौ विवित्साऽकृपाऽसूया मानशोकौ स्पृहा च।
ईर्ष्या जुगुप्सा च महागुणेन सदा वर्ज्याः द्वादशैते नरेण ॥१६॥

'क्रोधादय' इति सम्बुद्धाकारेणोक्तानामसत्सेव्यानां द्वादशसङ्ख्याकानां क्रोधादीनां दोषाणां सतामसेव्यत्वज्ञापनायास्मिञ्श्लोके तेषां नामान्याह—क्रोध इत्यादिना। **क्रोधः** कामादिहेतुकोऽन्तःकरणविक्षोभो गात्रस्वेददेहकम्पनादिनोत्थभ्रुकुटीकरणादिलिङ्गः, ताडना-

दिनिमित्तमनोवृत्तिविशेषो वा ॥१॥ **कामः** स्त्र्याद्यभिलाषः ॥२॥ **लोभः** सत्यां शक्तौ, सत्पात्रे स्वद्रव्याप्रतिपादनं, 'लुभ गार्ध्ये' इति धातुः ॥३॥ **मोहः** कृत्याकृत्यशून्यता, स्वहिताज्ञानं वा ॥४॥ **विवित्सा** विविधैरुपायैर्विशेषेण विषयान्वेषणेच्छा ॥५॥ **अकृपा** निष्ठूरता, दयाशून्यता वा ॥६॥ **असूया** सतां गुणेषु दोषाविष्करणं, परगुणेष्वसहिष्णुता वा ॥७॥ **मानं** स्वात्मनि महत्वज्ञानं ॥८॥ **शोकः** गतानुस्मरणजन्यदुःखविशेषः ॥९॥ **स्पृहा** विषयेऽछारूपतृष्णा ॥१०॥ **ईर्ष्या** परश्रियामसहिष्णुता ॥११॥ **जुगुप्सा च** बीभत्सा, परगुणाच्छादनेच्छा वा ॥१२॥ **एते द्वादश** क्रोधादयो दोषाः तपसः कल्मषरूपाः **सदा** यावज्जीवं **महागुणेन नरेण** ब्रह्मज्ञानिना, ब्राह्मणेनेति शेषः। ब्राह्मणस्य महागुणित्वं नाम "महद्ब्रह्मेतियत्प्रोक्तं महत्वान्महतामपि। तत्प्राप्तिगुणसंयुक्तो महागुण इतिस्मृत" इति मानं। यद्वा ब्राह्मणानां महागुणित्वप्राप्तौ उक्तं च भगवद्गीतायां— (१८-४२) "शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावज"मित्युक्तत्वात्। एवंविधगुणसम्पन्नेन ब्राह्मणेन **वर्ज्याः** त्याज्याः। तप आद्यनुष्ठानसमये एतेषामवश्यवर्ज्यत्वस्य कैमुत्यद्योतनाय **'सदे'** त्युक्तिः ॥१६॥

एकैकमेते राजेन्द्र मनुष्यं पर्युपासते।
लिप्समानोऽन्तरं तेषां मृगाणामिव लुब्धकः ॥१७॥

क्रोधादीनां सर्वदा त्याज्यत्वे को हेतुरित्याशङ्कायां यथा पान्थस्य कान्तारे सिंहव्याघ्रादयो मृगाः उपद्रवकराः तद्वत् "क्रोधाद्या दुःखदानृणा"मित्यनेन क्रोधादीनां मोक्षमार्गपरिपन्थित्वेन महानर्थ-

हेतुत्वात्तेषां त्याज्यत्वमिति सदृष्टान्तमाह–**एकैकमिति राजेन्द्र!** **एते** क्रोधादयः **एकैकं** प्रत्येकशः एकं एकं **मनुष्यं** देहिनं **पर्युपासते** सर्वत्र देहं व्याप्य तिष्ठन्ति, तच्छिद्रान्वेषणपराः भूत्वेति शेषः। दृष्टान्तार्थपरतया दार्ष्टन्तिकेपि शेषपूर्तिः। तत्र दृष्टान्तमाह–**लिप्समान इति। तेषां** स्वदृष्टिपथं प्राप्तानां **मृगाणां** हरिणादिनां **अन्तरं** प्रहर्तुमवकाशं वै **लिप्समानः** अपेक्षमाणः **लुब्धकः इव** मृग-मारको व्याधः वृक्षादीनवलम्ब्य यथा **पर्युपासते** तिष्ठति तथेति ॥१७॥

विकत्थमानः स्पृहयालु र्मनस्वी बिभ्रत्कोपं चपलोऽरक्षणश्च।
एते प्राप्तापट्परान्पापधर्मान्प्रकुर्वते नोत सन्तः सुदुर्गे ॥१८॥

इदानीं क्रोधादिवित्तपसः कल्मषभूतानां पूर्वोक्तानां त्रयोदश-नृशंसानामपि त्याज्यत्वमस्तीति ज्ञापनाय श्लोकद्वयेन तेषां नामान्याह **विकत्थमान इति। विकत्थमानः** असंबद्धवाग्व्यवहारशीलः ॥१॥ **स्पृहयालुः** विषयलोलुपः ॥२॥ **मनस्वी** स्वेच्छाप्रवृत्तिमान् ॥३॥ **कोपंबिभ्रत्** सर्वदा कोपात्मकः ॥४॥ **चपलः** चञ्चलः ॥५॥ **अरक्षण** स्वधर्मरक्षणशून्यः ॥६॥ **एते षट्** नृशंसाः **परान् पापधर्मान्** पापनिष्ठान्, तामसजीवानित्यर्थः **प्राप्ताः** तन्निष्ठतां प्राप्ताः, तेषामेव विषया इत्यभिप्रायः ॥ नन्वत्र नृशंसादिदोषधर्मस्वरूपकथनमपहाय धर्मिस्वरूपकथनं कोपयुज्यत इति चेत्, 'पापधर्मान्प्राप्ता' इत्यनेन तामसजीवानां तादात्म्यज्ञापनायोक्तमिति न विरोधः। न चेन् 'नोत सन्तः सुदुर्गे' इत्येतदनन्वितं स्यात्। ये **सन्तः** सात्विकजीवाः सज्जनपुरुषाः **ते सुदुर्गे** महापद्यपि **न प्रकुर्वते** विकत्थादीन्नाचरन्ति। 'उते'त्यनेन जीवानां तामससात्विकादिभेदोप्यादर्शि ॥१८॥

**संभोगसंविद्विषमेधमानो दत्तानुतापी कृपणोऽबलीयान् ।
वर्गप्रशंसी वनिताविरोधी एते परे सप्त नृशंसरूपाः ॥१९॥**

उर्वरितसप्तनृशंसस्वरूपानाह—**संभोगेति संभोगसंवित्** संभोगे विषयानुभवविषये संवित् सम्यक् ज्ञानं यस्य सः १ **विषमेधमानः** विषमेवा पातहेतुत्वेन स्वनाशहेतुत्वान्मिथ्याप्रज्ञा तत्र मानः तत्प्रामाण्यपादकदुष्टप्रमाणसंपन्नः । यद्वा मिथ्याज्ञाने प्रामाण्यज्ञानवान्वा । अथवा स्वोत्तमेषु विषं द्वेषं एधमानः वर्धमानः २ **दत्तानुतापी** सत्सु हिरण्यादिदत्वा पश्चात्तापकारी ३ **कृपणः** अल्पलाभाय महान्तमपमानं सहमानः ४ **अबलीयान्** वबयोरभेदात् "वा गतिगन्धनयो"रिति धातोः, गत्यर्थानां ज्ञानार्थत्वात् सच्छास्त्रीयज्ञानहीनः ६ **वर्गप्रशंसी** वर्गस्य स्त्र्यादिविषयवर्गस्य प्रसंसी, स्तवनशीलः ६ **वनिताविरोधी** वनितां पातिव्रत्यादिशीलसम्पन्नां, स्वस्त्रियमन्यां वा, विरुध्यत इति स तथा ७ **परे** पूर्वमुक्तेभ्यः अन्ये **एते** शृङ्गिग्राहकतया उक्ताः **सप्त** सप्तधाविभक्ताः **नृशंसरूपाः** नृशंसात्मकाः ॥ अत्रापि धर्मस्वरूपकथनं परित्यज्य धर्मिस्वरूपकथनं पूर्ववदेवेति ज्ञेयं । एवं त्रयोदशनृशंसानीति ॥१९॥

**ज्ञानं च सत्यं च दमः श्रुतं च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया ।
यज्ञश्च दानं च धृतिश्शमश्च महाव्रता द्वादश ब्राह्मणस्य ॥२०॥**

एवं स्वनुष्ठितस्यापि तपसो ह्रासकारिणां क्रोधादीनां स्वरूपमभिधायेधानीं "ज्ञानादयो द्वादश चाततानाः" इति पूर्वोक्तानां स्वनुष्ठितस्यैव तपसः केवलसमृद्धित्वप्रकाशकानां सन्निष्टधर्माणां द्वादश-

सङ्ख्याकानां ज्ञानादीनां स्वरूपकथनपूर्वकं तेषां नामानिनिर्दिशति—**ज्ञानमिति** । **ज्ञानं** परापरतत्त्वविषयं १ **सत्यं** यथार्थभाषणं, भूतहि वा २ **दमः** इन्द्रियनिग्रहः ३ **श्रुतं** भारतादिमहाशास्त्रश्रवणं ४ **अमा त्सर्यं** गुणिषु स्वोत्तमेषुस्नेहः ५ **ह्रीः** निषिद्धाचरणेलज्जा ६ **तितिक्ष** द्वन्द्वसहिष्णुता ७ **अनसूया** महात्मसु दोषानाविष्करणं ८ **यज्ञ** नित्यमनुष्ठीयमानोब्रह्मयज्ञादिः, ज्योतिष्टोमादिर्वा ९ **दानं** सत्पात्रे द्रव्यत्यागः १० **धृतिः** विषयसन्निधावविन्द्रियनिग्रहशक्तिः ११ **शम** भगवन्निष्टबुद्धिमत्वं १२ एते **द्वादश ब्राह्मणस्या**धिकारिब्राह्मणस्य **महाव्रताः**, लिङ्गव्यत्ययः छान्दसत्वान्न दोषाय, मोक्षापादकज्ञान साधनानि व्रतानि ॥२०॥

यस्त्वेतेभ्यः प्रवसेद्द्वादशभ्यः सर्वामिमां पृथिवीं स प्रशिष्यात्
त्रिभिर्द्वाभ्यामेकतो वा विमुक्ताः क्रमाद्विमुक्ताः मौनभूता भवन्ति ॥२१॥

एवमपरोक्षपरोक्षज्ञानिब्राह्मणसाधारणज्ञानादिद्वादशमहागुणान-भिधायेदानीं तेषां महिमास्तवनपूर्वकं तत्सामर्थ्यप्राप्यमुक्तिफल-मुपदिशति—**य इति** । **'द्वादशभ्य'** इत्यर्थ्ये चतुर्थी, द्वादशसङ्ख्या-विशिष्टानां **एतेभ्यः** ज्ञानादिनां लाभार्थं **य** अधिकारि **प्रवसेत्** प्रकृष्टानां गुरूणां कुले वसेत्, उत्तमगुरुकुलवासं कुर्यादित्यर्थः **सः** अधिकारी ब्राह्मणः यथायोग्यज्ञानादेर्लब्ध्यनन्तरं **सर्वां** स्वयोग्यतानु-सारेण संपूर्णा**मिमां** प्रमाणसिद्धां **पृथिवीं प्राशिष्यात्** प्रशासिष्यति;

'तु'नात्र प्रसिद्धपृथिवीप्रशासनं नाभिमतं, तस्यान्यदेवतोद्देशिककाम्यकर्मप्राप्यत्वात्; अपितु "ब्रह्मविदाप्नोति परं," "ज्ञानेनानन्दी भवती" त्यादिप्रमाणोक्तार्थानुसारेण ज्ञानादीनां तत्तद्योग्यतानुसारिमोक्षफलदातृत्वनियमस्यैवोक्तत्वादत्रोक्त'पृथिवीं प्रशिष्या'दित्यस्य **"तस्येयं** पृथिवी सर्वा वित्तस्य पूर्णास्या" दित्यानन्दमीमांसाश्रुत्युक्तयथायोग्यं 'प्रशिष्या'दिति शब्दवाच्यस्वयोग्यानन्दानुभवरूपमोक्षप्राप्तिरेवेति ग्राह्यं। नचेत्—"नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जन" मित्याद्युक्तर्थानुसारेण "ज्ञानवान्मां प्रपद्यत" इत्यादिज्ञानादि प्राप्यमोक्षफलश्रावकवाक्यानां वैयर्थ्यापत्तेः तुना सूचित स्त्वयमेवार्थो नान्य इति ॥ नन्वेवं तर्हि ज्ञानादिद्वादशगुणसम्पत्तिसम्पन्नानामेव मोक्षप्राप्तिर्नतूक्तसमग्रगुणसामग्रिभिः किञ्चिद्धीनानामिति चेन्नायं नियमः, किन्त्वधिकारियोग्यतानुसारेण येषु मुख्यवृत्त्यैकद्वित्र्यादिसंख्याविशिष्टानामपि ज्ञानादीनां स्वान्तर्भूतोर्वरितान्यगुणसम्पत्तिमतः या यथायोग्यमुक्तिफलदानशक्तिरस्तीत्युपदिशन्शङ्कामपनुदति—**त्रिभिरिति**। **'वे'** ति विकल्पः, प्रत्येकं सम्बध्यते। **त्रिभिर्वा** ज्ञानसत्यदमादिभिर्वा **द्वाभ्यां वा** ज्ञानसत्याभ्यां वा **एकतो वा** ज्ञानमात्रेण वा। प्रत्येकं 'वे'त्यनेन अधिकारिविवक्षा सूचितेति ज्ञेयं। **विमुक्ताः** इह जीवन्मुक्ताः भूत्वा **क्रमात्** अपरोक्षोत्तरसाधनानुष्ठानक्रमात्। यद्वा "ब्रह्मणा सह मुक्तिगा" इत्यनेन अपरोक्षोत्तरसाधनपूर्त्यनन्तरं प्राप्यतत्तत्स्वोच्चदेवतानुप्रवेशक्रमाद्वा **विमुक्ताः** "वि निषेधे विशेषे च पतत्रिणि हरावपी"ति वचनात् अतिनिषिद्धलिङ्गसम्बन्धात् **मुक्ताः** विमुक्ताः भूत्वा अनन्तरं **मौनभूताः** मुनिप्राप्यो मौनस्तन्नामद्वारभूताः 'भू सत्ताया' मिति

धातोः सायुज्यभावेन वा, सामीप्यभावेन वा, सारूप्यभावेन वा, सालोक्यभावेन वा, स्थिताः **भवन्ती**ति ॥२१॥

दमस्त्यागोऽप्रमादश्च एतेष्वमृतमाहितम् ।
तानिसत्यमुखान्याहुर्ब्राह्मणा ये मनीषिणः ॥२२॥

एवं पूर्वोक्तमहाधिकारिनिष्ठनिर्दुष्टगुणादिद्वादशगुणेषु निर्दुष्ट-दमादिगुणत्रयाणामेवात्यावश्यकत्वमुर्वरितज्ञानादिगुण--नवकस्य च दमादित्रिकद्वारैव बलीयस्त्वकथनेन विदुषा त एवादौ संपादनीयाः इत्युपदिशन् तेषामसाधारणलक्षणमाह—**दम इति । दम** इन्द्रिय निग्रहः **त्यागः** विषयाभिलाषत्यागः **अप्रमादः** "प्रमादोऽनवधानते" त्यभिधानात्तदभावो अप्रमादः, स एव शम इति प्रोक्तः **एतेषु** निर्दोषेषु दमादि **गुणेषु अमृतं** ब्रह्म **आहितं** स्थापितं, स्थितमित्यर्थः । अनेन निर्दुष्टत्व, जितेन्द्रियत्व, विषयविरक्तिमत्व, भगवन्निष्ठत्वागुणशालिनि ब्राह्मणे ज्ञानादिमहागुणदातृत्वेन **भगवांस्थितो** भवतीत्यभिप्रायसूचने-नादौ ज्ञानादिकमहागुणप्राप्तये यदि दमादयस्त्वादौ संपादनीयास्तर्हि दमादिप्राप्तये तत्पूर्वसाधनं किमित्याशङ्कायमाह—**तानीति । तानि** ज्ञानादिगुणसाधनानि दमादीनि **सत्यमुखानि** "यत्सतां हितमत्यन्तं तत्सत्यमिति चोच्यते" त्यनेन स्वोत्तमसज्जनहिताचरणजनिततदनुग्रहाख्य सत्यमेव मुखं मुख्यं साधनं येषां दमादीनां तानि तथा । अनेन दमादिप्राप्तये सत्सेवैवसाधनमित्यर्थः सूचितः । किमत्र नियामकमिति चेत् शिष्टवचनमेवेत्याह—**ब्राह्मणा इति । ब्राह्मणाः** "ब्रह्म वेदस्तप-स्तत्व" मित्यभिधानात् वेदशास्त्रसम्पन्ना **ये मनीषिणः** ज्ञानिनः ते **आहुः** इत्याहुः । अनेनास्मिन्नर्थे सनत्सुजातेन स्वोक्तदृढीकरणाय शिष्टसम्मतिरप्यदर्शीति सूचितं ॥२२॥

दमोऽष्टादशदोषः स्यात्प्रातिकूल्यं कृतेर्भवेत् ।
पैशुन्यमनृतं तृष्णा प्रातिकूल्यं तमोऽरतिः ॥२३॥

मुक्तिसाधनभगवदपरोक्षज्ञानादिमहागुणप्रापकदमादित्रयाणामपि दोषदूराणामेव तथाविधसामर्थ्योपेतत्वं, न तु सद्दोषाणामिति ज्ञापयन् आदौ प्रथमपठितत्वाद्दमदोषान् श्लोकत्रयेणाह—**दम इति । दमः** इन्द्रियनिग्रहरूपो दमः **अष्टादशदोषः** अष्टादशदोषापादक इति वा **स्यात्** यतः यस्माद्दोषवर्गात् **कृतेः** ज्ञानादिगुणसाधनस्य दमाख्यकर्मणः **प्रातिकूल्यं** स्वानुष्ठानजनितसुकृतप्राप्यज्ञानादिमहागुणोत्पत्तौ सामर्थ्यं, भावरूपप्रतिकूलत्वंवा, **भवेत्** । यद्वा येषामन्यतमे दमे कृते दमस्य प्रतिकूलता भवेदिति वा । तर्हि दमदोषाः के त इत्याशङ्कायां तानाह—**पैशुन्यमिति** । (१) **पैशुन्यं** परदोषोक्तिः विवादादिपञ्चकान्यत्र उपक्षिलतानि (२) **अनृतं** अयथार्थभाषणं (३) **तृष्णा** विषयाकाङ्क्षा (४) **प्रातिकूल्यं** स्वोत्तमहिताचरणविरोधकरणं, यद्वा—सर्वेषां प्रतिकूलता वा (५) **तमः** शास्त्रजन्यज्ञानहीनता (६) **अरतिः** यदृच्छालाभाऽसन्तुष्टिः, सर्वत्रानलंबुद्धिर्वा ॥२३॥

लोकद्वेषोऽभिमानश्च विवादः प्राणिपीडनम् ।
परिवादोऽतिवादश्च परितापोऽक्षमाऽधृतिः ॥२४॥

(७) **लोकद्वेषः** स्वोत्तमज्ञानिजनद्वेषः (८) **अभिमानः** स्वात्मनि महत्वज्ञानं (९) **विवादः** निषिद्धवाक्प्रलापः, यद्वा—विशिष्टेषु वितण्डा (१०) **प्राणिपीडनं** स्ववर्गपोषणाय परपीडाचरणं, कलियुगदावविहितवाजपेयाद्याचरणेन अजादिपशुपीडनं वा (११) **परिवादः** स्वोत्तमनिन्दा,

सर्वलोकनिन्दा वा (१२) **अतिवादः** निरर्थकातिप्रलापः, शास्त्रविरुद्धादिकोक्तिर्वा (१३) **परितापः** वृथा दुःखाभिध्यानं (१४) **अक्षमा** द्वन्द्वा असहिष्णुता, स्वोत्तमेष्वसहिष्णुता वा (१५) **अधृतिः** विषयेषु चपलता ॥२४॥

असिद्धिः पापकृत्यं च हिंसा चेति प्रकीर्तिताः ।
एतैर्दोषैर्विमुक्तो यस्स दमः सद्भिरुच्यते ॥२५॥

(१६) **असिद्धिः** आरब्धकर्मणोऽरन्तगामित्वं (१७) **पापकृत्यं** निषिद्धकर्माचरणं (१८) **हिंसा** प्राणिहिंसा, अविहितहिंसा वा **एतैः** उक्तैरष्टादशभि**र्दोषैः विमुक्तः** अश्लिष्टः **[यः] सः** स एव **दमः** दमाख्यो गुण इति **सद्भिः** सज्जनै**रुच्यत** इति । 'सद्भिरुच्यत' इत्यनेन सत्सम्मत्यनुकृतस्यैव दमस्य विशिष्टत्वमिति सूचितम् ॥२५॥

शमोऽष्टादशदोषः स्यात्यागो भवति षड्विधः ।
विपर्ययात्स्मृता एते दमदोषा उदाहृताः ॥२६॥

एवं दमदोषानभिधायेदानीं अप्रमादाख्यशब्दपर्यायपठितशमाख्यगुणस्य तानष्टादशदोषानाह—**शम इति शमः** शमाख्यो अप्रमादः **अष्टादशदोषः** पूर्वोक्तदमसम्बन्ध्यष्टादशदोषविशिष्टः **स्यात्** । **त्यागः** पूर्वोक्तस्त्यागः **षड्विधः** षट्प्रकारः **भवति** ॥ श्रुत्यादिषु दमशमयोर्दोषित्वोपपादकत्वेन प्रसिद्धैः पैशुन्यादिभिरेतैरेव दोषैस्तयोः स्वव्यतिरेकाचरणेन निर्दोषित्वापादकत्वं चाप्युदितमस्तीत्याह—**विपर्ययादिति** । ये पैशुन्यादयो दमशमयोर्दोषा इति **स्मृताः** शास्त्रेषु ज्ञाताः त एव **विपर्ययात्** अपैशुन्य-सत्यभाषण-अतृष्णा-अप्रातिकूल्य-अतमो-रति-

लोकाद्वेष - अनभिमान-अविवाद-अप्राणिपीडा-अपरिवाद - अनतिवाद-अपरिताप-क्षमा-धृति-सिद्धि-अपापकृत्या-ऽहिंसेति विपर्ययात् व्यतिरेकाचरणात्, विपरीताचरणादित्यर्थः **दमदोषाः** शमादयो दोषाः 'दो अवखण्डन' इति धातोः निर्दोषापादकत्वेन पापखण्डका **इत्युदाहृताः** शास्त्रेषु पठिताः ॥ अनेन पैशुन्यादीनामुभयविधशक्तिरस्तीत्युक्तं भवतीत्यभिप्रायः ॥२६॥

श्रेयांस्तु षड्विधस्त्यागस्तृतीयः षट्सु दुष्करः ।
तेन दुःखं तरन्त्येव भिन्नं तस्मिञ्जितं कृते ॥२७॥

एवं दमशमयोर्दोषा एव त्यागगुणदोषा इति त्यागगुणस्याष्टादशदोषानुक्त्वा तेषामेव व्यतिरेकाचरणेन श्रेयःसाधनत्वमुक्त्वा इदानीं निर्दोषस्यापि त्यागगुणस्य पात्रे दानादेर्वितरणवाचित्वेपि तस्य मुख्यतया कामाद्यरिषड्वर्गत्यागस्यैव महाश्रेयःसाधनत्वात् "श्रेयांस्तु षड्विधस्त्याग" (३३२७) इत्यस्मिन्श्लोके षण्णामपि त्यागानां सामान्यतः सामर्थ्यमभिधाय "अर्हते याचामानाये"(३१२८)त्युत्तरश्लोके एकैकस्मिन्नेव वाक्ये, त्यागद्वैविध्यार्थगर्भितस्वबुद्धिगोचरत्यागत्रैविध्यकथनेन क्रमात् प्राप्ततृतीयसङ्ख्यापर्यवसायित्याग द्वैविध्यार्थगर्भिततार्तीयत्वं कामत्यागस्येति वदिष्यमाणस्त्वस्मिञ्श्लोके तस्यैव दुःखकरत्वं साधयति—**श्रेयानिति । त्यागः** त्यगाख्यो गुणः **षड्विधः** कामादिषट्शत्रुसम्बन्धित्वेन षट्प्रकार **श्रेयान्** 'श्रि श्रये' इति धातोः परित्यागभावेन आश्रयितुं योग्य एव । तु इत्यवधारणे । अनेन देवादिभिर्महता प्रयासेन षडरयो जेतुं शक्या इति गर्भार्थो दर्शितः ॥ सामान्यमुक्त्वा विशेषमाह—**षड्विति ।**

पृष्टोसि तत् तदपि प्रमेयं **संक्षेपात्** संकोचात् **ते** तुभ्यं **प्रब्रवीमि** ॥ सनत्सुजातमुनिरेवं वक्ष्यमाणार्थकथने प्रब्रवीमिति प्रतिज्ञायोक्तार्थ-श्रवणादेः फलश्रुतिमुदाहरति—**एतदिति** । **एतत्** मृत्युसद्भावासद्भाव-विषयकत्वदीयप्रश्नोत्तररूपं "प्रमादं वै मृत्युमहं ब्रवीमी"त्यारभ्य "दोषैरेतै"रित्यन्तेन मयोक्तमेतत्प्रमेयं **शुद्धं** निर्दुष्टं · **पापहरं** पापपरि-हारकं **जन्ममृत्युजरापहं** च जननमरणजरात्मकसंसारमपहन्तीति तत्तथा, श्रवणमननादिकुर्वतामिति शेषः ॥३५॥

इन्द्रियेभ्यश्च पञ्चभ्यो मनसश्चैव भारत ।
अतीतानागतेभ्यश्च मुक्तश्चेत्स सुखी भवेत् ॥३६॥

ननु कथमेतस्य त्वदुक्तस्य प्रमेयस्य श्रवणादिना जननाद्यात्मकसंसार निर्भूलनेन पापाद्यनिष्टनिवर्तकत्वमित्याशङ्कय न तपोऽनशनात्तुल्यमित्या-दिषूक्तरीत्या मदुक्तानशनादिना विषयोपरक्तसर्वेन्द्रियजयद्वारा विषय विरक्तिमत्वेनानुष्ठितश्रवणादिसाधनेन सुप्रीतभगवदपरोक्षोत्तरकाल एवा-श्लेषविनाशभावप्राप्तोत्तरपूर्वाघद्वारा जीवन्मुक्तत्वप्रापणेनेत्युक्त्या परि-हरति—**इन्द्रियेभ्यश्चेति हे भारत!** मदुक्तनिर्दुष्टतप आदेरनुष्ठाता चेत् **सः** तपस्वी पुरुषः **पञ्चभ्यः** पञ्चसङ्ख्याकेभ्यः **इन्द्रियेभ्यः** चक्षुरादिज्ञा-नेन्द्रियेभ्यः चेत्यनेन कर्मेन्द्रियाणामप्रधानत्वेन ज्ञानेन्द्रियेष्वन्तर्भावः सूचितः । **मनसश्च** नानावासनात्मकमनसः सकाशाच्च **अतीताना-गतेभ्यः** सञ्चितागामिशब्दवाच्येभ्यः कर्मभ्यः **च**-शब्दबलादनिष्टपुण्य-पापेभ्य इति सूचितं, **मुक्तः** विमुक्तः सन् **सुखी** स्वरूपसुखवान् **भवेत्** । अत्र इन्द्रियादिभ्यो विमोचनं नाम मुक्तिदशायां प्राकृतत्वाद्धे-

न्द्रियाणां स्वरूपतोविनाशित्वेन स्वस्वरूपेन्द्रियैःअवस्थाननियम एव मुक्तिरिति ॥३६॥

धृतराष्ट्र उवाच—

आख्यानपञ्चमैर्वेदैर्भूयिष्टं कथ्यते जनः ।
तथा चान्ये चतुर्वेदास्त्रिवेदाश्च तथापरे ॥३७॥

एवं सनत्सुजातमुखाच्छ्रुतमोक्षसाधनीभूततपोमहिमा धृतराष्ट्रः इदानीं ब्राह्मणानां वेदाध्ययनज्ञानादिनैव सत्पात्रत्वं, नान्येनेति सामान्यतोज्ञातपात्रापात्रास्वरूपोपि विशेषविवित्सया अर्थतो नित्यैर्भारतादिभिः सह पञ्चसङ्ख्यागतैश्चतुभिरधीतैर्वेदैरेव ब्राह्मणानां पात्रोत्तमत्वमिति महाजनवादस्तथापि, न हि लोके सर्वेपि ब्राह्मणाः पञ्चवेदिन एव सन्ति, अपितु स्वशक्त्यानुसारेण पञ्चचतुस्त्रिकद्विकैकवेदाध्यायिनामपि सत्वात्किमु पञ्चवेदिनामेव पात्रत्वं, नान्येषामित्येव नियम उत योग्यतानुसारेणान्येषामिति विवेकाज्ञानेन पृच्छतो ममैतेष्वधिकपात्रस्वरूपकथनेन शङ्कामपाकुर्विति स्वाभिप्रेतं विविच्य श्लोकद्वयेन पृच्छति **आख्यानपञ्चमै**रिति । [**आख्यानपञ्चमैः**] आख्यानमितिहासपुराणानां पञ्चत्वसङ्ख्याप्रापकं येषां ते तथा, तै**र्वेदैः**, तदध्ययनादिसम्बन्धैरित्यर्थः, **जनः ब्राह्मणवर्गः**, जन्यत इति जनो ब्राह्मणदेहो वा, **भूयिष्टं** अत्यर्थम् **कथ्यते** "कत्था श्लाघायामि"ति धातोरात्मानं पञ्चवेदाध्यायित्वेन महत्वबुध्या श्लाघते । 'कथ्यते' त्येतत् सर्वत्र सम्बध्यते । **तथे**त्यनेन अन्ये पञ्चवेदिभ्योन्ये केचन, **चतुर्वेदाः**

अप्रमादस्याष्टगुणमाह— सत्यमिति। (१) **सत्यं** यथार्थभाषण
सज्जनहिताचरणं वा (२) **न्यूनं** "न्यूनंस्यादनगर्ह्ययो"रित्यभिधानात
ऊनशब्दवाच्यं गर्ह्यं कर्म न भवतीति न्यूनं, अनिन्दितकर्माचरणमित्यर्थ
(३) **समाधानं** भगवति मनसः सम्यगाधानं स्थापनं (४) **चोद**
संशयनिरासाय गुरुकुलं गत्वा तत्त्वविषयकः प्रश्नः। "परिप्रश्नेन सेवये
त्युक्तत्वात् (५) **वैराग्यं** विषयविरक्तिमत्ता (६) **अस्तेयं** स्वात्मनि
परब्रह्मत्वज्ञानास्वीकारः। उक्तं च—"योन्यथासन्तमात्मानमन्यथा
प्रतिपद्यते। किं तेन न कृतं पापं चोरेणात्मापहारिणे"ति (७) **ब्रह्मच**
अष्टाङ्गमैथुनत्यागः। उक्तं च—'दर्शनं स्पर्शनं केलिः कीर्तनं गुह्य
भाषणं। सङ्कल्पोऽध्यवसायश्च क्रियानिवृत्तिरेव च॥ एतन्मैथुनमष्टाङ्ग
प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षण'मिति। (८
केलिः रागोपरक्तविनोदः। **असङ्ग्रहः** सजीवनवृत्त्यतिरिक्तधनादेरसङ्ग्रयः
एवमष्टगुणकोऽप्रमादगुण इति ॥३०॥

एवं दोषा दमस्योक्तास्तान्दोषान्परिवर्जयेत् ।
दोषत्यागोऽप्रमादः स्यात्सचाप्यष्टगुणो महान् ॥३१॥

ननु "दमोऽष्टादोषःस्या"दित्यारभ्य "सत्यं न्यूनमित्यन्तेन
दमशमादीनां गुणदोषकथनेन किं प्रयोजनमित्याशङ्कायां ज्ञातगुणदोषस्यैव
पुंसो दोषवर्जनेन गुणस्वीकारस्योक्तत्वात्तद्ज्ञानात्तदपदेशः सम्भाव्यत
इत्याह— **एवमिति** एवमुक्तरीत्या **दमस्य** दमाख्यगुणस्य ये **दोषाः**
[उक्ताः] तान् पूर्वोक्तान् दोषान् **परिवर्जयेत्** ज्ञात्वा सर्वत्र सर्वदा त्यजेत्
अधिकारी पुरुष इति शेषः। **अष्टगुणः** सत्याद्यष्टभिर्गुणैर्विशिष्टो यः
अप्रमादः अप्रमादाख्यो गुणः **सः [च]** सोपि दोषत्यागः दमादिगुण

सम्बन्धिनां दोषाणां हेयत्वज्ञानपूर्वकं परित्याग एव, नान्य इति । अनेन उक्तगुणेभ्यस्त्वन्यस्त्वप्रमादाख्यो गुणोस्तीति शङ्का निरस्तेति ज्ञायते, दमादिदोषवर्जनस्यैवाप्रमाद इत्युक्तत्वात् ॥३१॥

तांस्तु सत्यमुखानाहुः सत्ये ह्यमृतमाहितं ।
सत्यात्मा भव राजेन्द्र सत्ये लोकाः प्रतिष्ठिताः ॥३२॥

इदानीं सज्जनहिताचरणशीलः सनत्सुजातः धृतराष्ट्रनामक-महाधिकारिगन्धर्वावतारत्वेपि वैचित्रवीर्यधृतराष्ट्रस्य प्रारब्धवशात्प्राप्तदुष्पुत्रसङ्गादिजनितकल्यावेशवशादुद्भूताज्ञानेन स्वोद्धरणसमर्थश्रीकृष्णपक्षपातिदेवोत्तमावतारिपाण्डवविरोधजनितापराधेन अप्राप्ता निर्वृतिस्तदनुग्रहेणैवास्य भविष्यतीत्यतस्तदनुग्रहप्राप्तये तद्धिताचरणरूपा सेवैव त्वया कार्येत्युपदेशगर्भितसत्यप्रशंसां विधत्ते---**तानिति** । **तान्** पूर्वोक्तान् ज्ञानादिगुणान् **सत्यमुखान्** "यत्सतां हितमत्यन्तं तत्सत्यमिति चोच्यते । यत्सतां धारको धर्म"इत्यादिषूक्तसद्धिताचरणरूपसत्यशब्दवाच्यधर्म एव, मुखः मुख्यत्वापादको येषु ते तथा तान् **आहुः**, ज्ञानिन इति शेषः, इत्याहुः । अनेन "सतामनिष्टकरणाद्धर्महानिः पदे पदे । तेषामेवेष्टकरणाद्धर्मवृद्धिः पदे पदे" इति वाक्यं प्रमाणयति ॥ ननु सर्वेषां धर्माणां सत्यमुखत्वे को हेतुरित्याशङ्कायां आह---**सत्येति** । **सत्ये** सद्धिताचरणाख्ये धर्मे **अमृतं मोक्षमाहितं** स्थापितं, तदधीनत्वेन स्थितमित्यर्थः । "सत्येन न सुवर्गाल्लोकाच्च्यवन्तं तस्मात्सत्यं परमं वदन्ति""महत्सेवां द्वारमाहुर्विमुक्ते"रित्यादिश्रुतिस्मृतिषु तथोक्तत्वात् । अतोमहाफलेच्छुना पुरुषेण महत्सेवैव कार्येत्यभिप्रायः सूचितः ।

यद्वा—**सत्ये** यथार्थभाषणरूपसत्याख्ये धर्मे च **अमृतं** स्वर्गादिकं **आहित**मित्याहुरिति वा । एवं सत्याख्य धर्मस्यैव सर्वधर्ममुख्यत्व-मभिधाय इदानीं तदनुष्ठानेन तवापि सज्जनोत्तमपाण्डवद्वेषोत्थमहानिष्ट-निवृत्तिःस्यादिति स्वहार्दाभिप्रायं व्यञ्जयन्निव साक्षात्तमेवोपदिशति– । **राजेन्द्रेति** हे **राजेन्द्र** राजश्रेष्ठ धृतराष्ट्र ! त्वमपि **सत्यात्मा** सद्धिताचरणशीलमनाः **भव** ॥ मयोक्तोऽयं धर्मः शिष्टपरिगृहीतत्वा-दनुष्ठेय एवेत्युपदिशन् स्वोक्तदृढीकरणाय एतस्य शिष्टाचारं दर्शयति — **सत्ये** मयोक्ते सत्याख्ये धर्मे **लोकाः** "लुक्प्रकाश" इति धातोः ज्ञानप्रकाशिनो ज्ञानिजनाः **सत्ये** सद्धिताचरणाख्ये धर्मे **प्रतिष्ठिताः** "ष्ठा गतिनिवृत्ता"विति धातोः प्रकृष्टतया अचाञ्चल्यभावेन स्थिताः, तस्यैवाचरणेस्थिता इति शेषः । अतः सर्वैरनुष्ठेयोऽयं धर्म इति ॥३२॥

निवृत्तेनैव दोषेण तपोव्रतमिहाचरेत् ।
एतद्धात्रा (एतन्मया) कृतं वृत्तं सत्यमेव सतां मतम् ॥३३॥

एवं तपःशीलानां तपसो गुणदोषज्ञानाय तानुक्त्वा इदानीं निर्दुष्टगुणसम्पन्न तपस एव सद्भिर्विधेयत्वमिति विवक्ते–**निवृत्तेनेति** । **इह** ब्राह्मणजन्मनि **तपः** तप आख्यं **व्रतं** आचरणनियमं **निवृत्तेन** परिहृतेन **दोषेण आचरेत्** निर्दोषतपसेत्यर्थः ॥ स्वोक्तार्थे शिष्टसम्मतिं दर्शयति–**एतादिति** । **एतत्** मयोक्तमेतत् **वृत्तं** तपसो वर्तनं आचरण-मित्यर्थः **धात्रा कृतं** । "मया कृतमि"ति पाठे तु स्वात्मनोपि ऋषि-त्वात्स्वाचारस्यापि सर्वऋष्यनुसारित्वमिति ज्ञापनाय मया कृतमिति । यद्वा—'मया' इत्यत्र सनत्सुजातनाम्ना मयापि कृतं आचरितं ।

स्वात्मनोपि ऋष्येकत्वाहषीणां च सद्धर्मप्रवर्तकत्वात्स्वसम्मतेरपि प्रामाण्यापादनाय 'मये'त्युक्तमिति वा। अतः सर्वैरनुष्ठेयमिति 'मया कृतमि'ति। तव सम्मतिः कोपयुक्तेति चेत् मत्सम्मतेरेव शिष्टपरिगृहीतत्वेन विशिष्टत्वान्नास्ति शङ्कावसर इत्युपदिशन् शिष्टसम्मतिं दर्शयति--**सत्यमिति**। **सतां** सज्जनानां **मतं** सम्मतं **एव सत्यं** यथार्थरूपं। मन्मतमेव सज्जनानां सम्मतमित्यर्थः ॥३३॥

दोषैरेतैर्विमुक्तं तु गुणैरेतैः समन्वितम्।
एतत्समृद्धमप्यृद्धं तपो भवति केवलम् ॥३४॥

एवं सकलशास्त्रार्थसम्मत्या निर्दुष्टगुणविशिष्टतपस एवोत्तमत्वं संसाध्याधुना पुनरुपसंहारमुखेनापि केवलऋद्धस्यैव तपसो विधेयत्वं विवक्ते--**दोषैरिति**। **एतैः** पूर्वोक्तैर्**दोषैः** क्रोधादिभिर्**विमुक्तं**, **गुणै**-र्ज्ञानादिभिर्द्वादशैर्गुणैः **समन्वितं** संयुक्तं **एतत्** एतदेव **केवलं** दोषयोगव्यवच्छिन्नं **तपः** तप एव **समृद्धमपि** यावदुक्तफलापादकमपि तत्तप आदिकर्मणा तत्तत्कर्मण्यधिकृततत्तद्देवतानां च भगवत्समर्पण-भगवदधीनताभावनारूपानुसन्धानपूर्वकानुष्ठानबलाज्ज्ञानिनां **ऋद्धं भवति** मुक्तौ ब्रह्मानन्दातिशयापादकं भवतीति ॥३४॥

यन्मां पृच्छसि राजेन्द्र सङ्क्षेपात्प्रब्रवीमि ते।
एतत्पापहरं शुद्धं जन्ममृत्युजरापहम् ॥३५॥

प्रश्नार्थप्रवचनस्य समाप्तत्वादितःपरमुपरम्यते किमिति शङ्का मा भूदिति धृतराष्ट्रस्य हार्दं चोद्यं परिहरति—**यन्मामिति**। हे **राजेन्द्र** धृतराष्ट्र! इतःपरं **मां** प्रति **यत्** यादृशं प्रमेयं **पृच्छसि**

पृष्टोसि तत तदपि प्रमेयं **संक्षेपात्** संकोचात् **ते** तुभ्यं **प्रब्रवीमि** ॥ सनत्सुजातमुनिरेवं वक्ष्यमाणार्थकथने प्रब्रवीमिति प्रतिज्ञायोक्तार्थश्रवणादेः फलश्रुतिमुदाहरति—**एतदिति** । **एतत्** मृत्युसद्भावासद्भावविषयकत्वदीयप्रश्नोत्तररूपं "प्रमादं वै मृत्युमहं ब्रवीमी"त्यारभ्य "दोषैरेतै"रित्यन्तेन मयोक्तमेतत्प्रमेयं **शुद्धं** निर्दुष्टं · **पापहरं** पापपरिहारकं **जन्ममृत्युजरापहं** च जननमरणजरात्मकसंसारमपहन्तीति तत्तथा, श्रवणमननादिकुर्वतामिति शेषः ॥३५॥

इन्द्रियेभ्यश्च पञ्चभ्यो मनसश्चैव भारत ।
अतीतानागतेभ्यश्च मुक्तश्चेत्स सुखी भवेत् ॥३६॥

ननु कथमेतस्य त्वदुक्तस्य प्रमेयस्य श्रवणादिना जननाद्यात्मकसंसार निर्मूलनेन पापाद्यनिष्टनिवर्तकत्वमित्याशङ्क्य न तपोऽनशनात्तुल्यमित्यादिषूक्तरीत्या मदुक्तानशनादिना विषयोपरक्तसर्वेन्द्रियजयद्वारा विषय विरक्तिमत्त्वेनानुष्ठितश्रवणादिसाधनेन सुप्रीतभगवदपरोक्षोत्तरकाल एवाश्लेषविनाशभावप्राप्तोत्तरपूर्वाघद्वारा जीवन्मुक्तत्वप्रापणेनेत्युक्त्या परिहरति—**इन्द्रियेभ्यश्चेति हे भारत!** मदुक्तनिर्दुष्टतप आदेरनुष्ठाता चेत **सः** तपस्वी पुरुषः **पञ्चभ्यः** पञ्चसङ्ख्याकेभ्यः **इन्द्रियेभ्यः** चक्षुरादिज्ञानेन्द्रियेभ्यः चेत्यनेन कर्मेन्द्रियाणामप्रधानत्वेन ज्ञानेन्द्रियेष्वन्तर्भावः सूचितः । **मनसश्च** नानावासनात्मकमनसः सकाशाच्च **अतीतानागतेभ्यः** सञ्चितागामिशब्दवाच्येभ्यः कर्मभ्यः **च**-शब्दबलादनिष्टपुण्यपापेभ्य इति सूचितं, **मुक्तः** विमुक्तः सन् **सुखी** स्वरूपसुखवान् **भवेत्** । अत्र इन्द्रियादिभ्यो विमोचनं नाम मुक्तिदशायां प्राकृतबाह्ये-

न्द्रियाणां स्वरूपतोविनाशित्वेन स्वस्वरूपेन्द्रियैःअवस्थाननियम एव मुक्तिरिति ॥३६॥

धृतराष्ट्र उवाच—

आख्यानपञ्चमैर्वेदैर्भूयिष्ठं कथ्यते जनः ।
तथा चान्ये चतुर्वेदास्त्रिवेदाश्च तथापरे ॥३७॥

एवं सनत्सुजातमुखाच्छ्रुतमोक्षसाधनीभूततपोमहिमा धृतराष्ट्रः इदानीं ब्राह्मणानां वेदाध्ययनज्ञानादिनैव सत्पात्रत्वं, नान्येनेति सामान्यतोज्ञातपात्रापात्रास्वरूपोपि विशेषविवित्सया अर्थतो नित्यैर्भारतादिभिः सह पञ्चसङ्ख्यागतैश्चतुभिरधीतैर्वेदैरेव ब्राह्मणानां पात्रोत्तमत्वमिति महाजनवादस्तथापि, न हि लोके सर्वेपि ब्राह्मणाः पञ्चवेदिन एव सन्ति, अपितु स्वशक्त्यानुसारेण पञ्चचतुस्त्रिकद्विकैकवेदाध्यायिनामपि सत्वात्किमु पञ्चवेदिनामेव पात्रत्वं, नान्येषामित्येव नियम उत योग्यतानुसारेणान्येषामिति विवेकाज्ञानेन पृच्छतो ममैतेष्वधिकपात्रस्वरूपकथनेन शङ्कामपाकुर्विति स्वाभिप्रेतं विविच्य श्लोकद्वयेन पृच्छति **आख्यानपञ्चमै**रिति । [**आख्यानपञ्चमैः**] आख्यानमितिहासपुराणानां पञ्चत्वसङ्ख्याप्रापकं येषां ते तथा, **तैर्वेदैः**, तदध्ययनादिसम्बन्धैरित्यर्थः, **जनः ब्राह्मणवर्गः**, जन्यत इति जनो ब्राह्मणदेहो वा, **भूयिष्ठं** अत्यर्थम् **कथ्यते** "कत्थ श्लाघायामि"ति धातोरात्मानं पञ्चवेदाध्यायित्वेन महत्वबुध्या श्लाघते । 'कथ्यते' त्येतत् सर्वत्र सम्बध्यते । **तथे**त्यनेन अन्ये पञ्चवेदिभ्योन्ये केचन, **चतुर्वेदाः**

वेदचतुष्टयाध्यायिनश्च; तथेतिदृष्टान्तकथनेन पञ्चवेदिवत्तेऽपि स्वात्मनि महत्वबुद्धचास्वात्मश्लाघां कुर्वन्तीति ज्ञायते, अपरे केचन त्रिवेदाः, चेति समुच्चयेन ते त्रिवेदाध्यायिनोपि तथा पञ्चवेदिचतुर्वेदिवत्स्वात्मनि महत्वबुद्धचा वयमेव महान्त इति स्वात्मश्लाघां कुर्वन्त्येव । प्रत्येकं 'चे'त्येतदत्राऽपिशब्दार्थे ॥३७॥

द्विवेदाश्चैकवेदाश्च ह्यनृचश्च तथाऽपरे ।
एतेषु मेऽधिकं ब्रूहि यमहं वेद्मि ब्राह्मणम् ॥३८॥

द्विवेदाः वेदद्वयाध्यायिनश्च तेपि, तथा **एकवेदाः** केचन एकवेदाध्यायिनश्चापि तथेति । अत्र सर्वत्र 'वेद'शब्दः अध्येतुर्महत्वापादने, 'वेद ज्ञान' इति धातोः, तदर्थविचारणपरः, न तु पाठमात्रपर इति । अपरे केचन **अनृचश्च,** अनृच इत्यनेन वेदबाह्याः इत्यर्थो न विवक्षितः, किन्तुतद्विशिष्टत्वेपि तत्प्रवचनादिकं विहाय भगवद्धचानैकपराः तेपि **तथा** स्वात्मानं बहु मन्यन्त एव ॥ **एतेषु** एवं बहुधाविभक्तेषु पात्रेषु मध्ये **मे** पात्रस्वरूपेच्छावतः मम **अधिकं** पात्रोत्तमं **ब्रूहि** 'ब्रूञ् व्यक्तायां वाचि'ति धातोः निःसंशयेनाख्याहि । **अहं एनं** त्वदुपदिष्टज्ञानेन **ब्राह्मणं** अयमेव पात्रोत्तम इति पात्रोत्तमलक्षणसम्पन्नं ब्राह्मणं **वेद्मि** जानीयामिति । ३८॥

सनत्सुजात उवाच—

एकवेदस्य चाज्ञानाद्वेदास्ते बहवोऽभवन् ।
सत्यस्यैकस्य राजेन्द्र सत्ये कश्चिदवस्थितः ॥३९॥

एवं पात्रोत्तमब्राह्मणस्वरूपविचारशीलेन धृतराष्ट्रेण पृष्टः सनत्सुजातः पञ्चेत्यादिसङ्ख्याविशिष्टवेदाध्ययनादिना ब्राह्मणस्य नोत्तमत्वं, अपि तु वेदमुख्यार्थप्रतिपाद्यभगवदनुसन्धानज्ञानपूर्वकाध्ययनादिशालिन एवोत्तमपात्रमित्युत्तरग्रन्थेनोपदिशन्नादौ उपोद्घातसङ्गत्या "अनन्ता वै वेदा" इति प्रमाणानुसारेणैकराशित्वं प्राप्तानां "त्रयोऽर्थाः सर्ववेदेष्वि"ति प्रमाणबलादमुख्यमुख्यपरममुख्यभेदेन तत्तत्कर्म तत्तदधिकृतदेवतानां च भगवतश्च प्रतिपादकानां "ऋ गतौ" "यज् पूजाया" मित्यादिधात्वर्थबलाज्ज्ञानादिप्रतिपादकानामल्पाधिकारिजनबुध्यगोचराभिप्रायाणां सर्वेषामप्यनन्तानां वेदानां परममुख्यार्थापरिज्ञानेनानवाप्तस्वयोग्यज्ञानादिधर्मसम्पन्नाल्पमतिजनोद्धाराय परमदयालुभिर्ब्रह्मादिभिरर्थितो भगवान् नारायणो व्यासत्वेनावतीर्य तत्तदधिकारियोग्यभगवदपरोक्षज्ञानोदयाय ऋगादिशब्दपदार्थगर्भितैकगतऋगादिशब्दभेदभिन्न वेदचतुष्टयांशेन शाखाचतुष्टयमचीक्लृपदित्युपदिशति––**एकवेदस्येति एकवेदस्य** मूलविवक्षया अविभक्तऋगादिलक्षणकस्यैकस्य वेदस्य **अज्ञानात्** अधिकारिणामपि ज्ञानशक्त्यभावात्,एकत्वसङ्ख्याविशिष्टास्त एव **वेदाः बहवः** ऋगादिशब्दवाच्यत्वेन बहुत्वसङ्ख्याविशिष्टाः **अभवन् । चेत्यनेन** अल्पाधिकारिणां ऋगादिभेदभिन्नत्वेऽप्येकत्वेनावस्थितानामनन्तानां वेदानामध्ययनाद्याचरणायाशक्ताल्पमतिजनदयालुना भगवता बादरायणेन अवतीर्य बहुशाखाभेदभिन्न ऋगादि भेदभिन्नचतुर्धाविभक्तवेदतरुशाखोद्धारः कृत इत्यर्थः सूचितः । तदुक्तं–"ऋचः स ऋच उद्धृत्य ऋग्वेदं कृतवान्विभुः । यजूंषि निगदाच्चैव तथा सामानि सामत" इति । भारतस्य **वेदान्तःपरिगणने** प्रमाणं

च—"भारतब्राह्मणादीनि वेदार्थपरिवित्तये"। इत्यादि नन्वस्त्वेवं वेदानां बहुधाविभक्तत्वं तेषामध्ययनादेः साध्यप्रयोजनानवश्यकत्वं किं न स्यादित्याशङ्कय तदध्ययनस्य भगवदपरोक्षज्ञानसाधनत्वेन महाप्रयोजनस्य सत्त्वादावश्यकत्वमित्याह—**सत्यस्येति**। **राजेन्द्र !** हे धृतराष्ट्र ! **एकस्य** समाधिकरहितस्येत्यर्थः, स्वगतभेदशून्यस्येति वा, **सत्यस्य** उक्तं च छान्दोग्ये—"तस्य ह वा एतस्य ब्राह्मणो नाम सत्य" मिति, "तानि ह वा एतानि त्रीण्यक्षराणि"इत्यादि। स्मृतिश्च— "उत्तमानन्दसंविद्भ्यां पूर्णत्वादनिशं हरिः। सत्य इत्युच्यते वेदैः सत्यसङ्कल्पतः सदे"ति प्रमाणबलात्सत्यशब्दवाच्यस्य श्रीनारायणस्य, ज्ञानर्थमिति शेषः॥ ननु तर्हि वेदाध्ययनादिना प्राप्तापरोक्षज्ञानेन भगवन्निष्ठावान्क इत्याशङ्कायां ब्रह्मादिमनुष्योत्तमान्ताः सर्वेपि सात्विकजीववर्ग इत्याह—**सत्ये इति**। **सत्ये** निर्दुष्टस्वज्ञानानन्दपूर्णे भगवति **कश्चित्** कं सुखं, चित् ज्ञानं, कश्च चिच्च कश्चित्, सुखज्ञानस्वरूपः सात्विकजीवकोटिरित्यर्थः, **अवस्थितः** अवेत्युपसर्गेण अचाञ्चल्येन तदेकनिष्ट इति॥ यद्वा, नन्वेवं चेद्वेदाध्ययनादिसम्पत्तेर्बहुष्वपि सत्वात्तेषां सर्वेषामपि भगवदपरोक्षज्ञानप्रसङ्ग इति चेन्न, किन्तु वेदाधिकारिषु साधनपूर्तिमान्यः कश्चिदेवेत्यतो वा आह--**काश्चिदिति** **कश्चित्** भगवद्ज्ञानार्थं यततांमध्येसाधनपूर्तिमान्यः कश्चिदिति वा। उक्तं च **गीतायां**--"यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः" इत्यदिना। अथवा, "मारुते वेधसि ब्रध्ने पुंसि कं शिरोऽम्बुनी"त्यभिधानात् को वायुः, चेतयतीति स्थावरंसर्वमिति चित; कश्चासौ चिच्चेति विग्रहः; कश्चित् मुख्यप्राणः **सत्ये** निर्दुष्टज्ञानानन्दादि पूर्णे

भगवति **स्थितः** अनन्तवेदानां भगवत्परार्थपरालोचनया अखण्डभक्तिमत्वेन स्थित इति वा ॥३९॥

सत्यात्प्रच्यवमानानां सङ्कल्पा वितथाऽभवन् ।
ततः कर्म प्रभासेत सत्यस्यानवधारणात् ॥४०॥

ननु "स्वर्गकामो यजेते"त्यादिवेदवाक्यैस्तदनुष्ठानप्रीततत्तद्यज्ञाविकृतेन्द्रादिदेवताप्रसादात् प्राप्यस्वर्गादिपुरुषार्थस्य प्रकारान्तरेणापि प्राप्यत्वश्रवणात्किमत्यायाससाध्यसत्यशब्दवाच्यभगवत्प्रसादप्राप्तापरोक्षज्ञानजनितापवर्गपुरुषार्थप्रयासेनेति चेत्——विष्णुसर्वोत्तमत्वज्ञानशून्यान्यदेवतोपासकस्वर्गाद्यभिलाषिमिथ्याज्ञानिजनानुष्ठितज्योतिष्टोमादियागोत्थसुकृताप्राप्यसाङ्कल्पिकफलविघातेन तादृशानुष्ठानस्य वैयर्थ्यात्सत्योपासनस्यैव विधेयत्वमुपदिशामीत्याह——**सत्यादिति सत्यात्** उत्तमानन्दज्ञानपूर्णाद्विष्णोः सकाशात्, विष्ण्वैकनिष्ठलक्षणज्ञानादित्यर्थः-**प्रच्यवमानानां** च्युतिभावं प्राप्यमाणानां पुरुषाणां **सङ्कल्पाः** "यदि पितृलोककाम" इत्यादिनोक्ताः श्रौतसङ्कल्पाः **वितथाः** मोघाः **अभवन् । ततः** उक्तसङ्कल्पवैयर्थ्यानन्तरं **सत्यस्य** सत्यशब्दाभिध्येयस्य ब्रह्मणः **अनवधारणात्** वितथाभिनिवेशाद्धेतोः **कर्म** काम्यफलापादकं काम्यकर्म **प्रभासेत** अज्ञानात्मना रूपेण प्रकाशेत् । "प्रकाशो ज्ञानमालोकोलोको भासश्च कथ्यत" इत्यभिधानात् । "अनेवंवित्पुण्यं कर्म करोति तद्धास्यांततः क्षीयत एवे"ति, "यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिता" इत्याद्यनुसारेण अज्ञानाद्यनर्थप्रदमेव भवतीत्यर्थः ॥४०॥

विद्याद्बहुपठन्तं तु बहुवागिति ब्राह्मणम् ।
य एष सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ॥४१॥

एवंवक्ष्यमाणप्रमाणप्रश्नोत्तरस्य श्लोकद्वयेनानन्तवेदप्रतिपाद्या नन्दचिद्घनविष्णुसर्वोत्तमज्ञानिन एव महापुरुषार्थकथनेन दिङ्मात्रेण प्रदर्शितब्राह्मणोत्तमस्वरूपोपि सनत्सुजातस्त्विदानीं धृतराष्ट्रप्रश्नोत्तरत्वेन तल्लक्षणकथनपूर्वकं पात्रोत्तमं स्पष्टी कुर्वन्नादौ बहुवागित्यादि भेदेनानेकविधं ब्राह्मणं कथयति—**विद्यादिति** । **बहुपठन्तं** बहु त्रित्वाद्यनेकसङ्ख्याविशिष्टत्वेन बहुधा पठन्तं पठमानं, **तु** शब्दोत्रार्थ ज्ञानं विच्छिनत्ति, अर्थज्ञानशून्यत्वेन त्रित्वादिबहुसङ्ख्याक वेदान पाठमात्रशीलनमित्यर्थः, एतादृशं तं **ब्राह्मणं बहुवाक्** अत्र वाक् शब्दः "यावद्ब्रह्मविष्टितं तावती वागी"तिश्रुत्युक्तप्रयोगेन वेदपरः, न त्वपभ्रष्टवचनपरः । बह्वी त्रित्वादिसङ्ख्याका पाठरूपेण वाक् वेदो यस्यासौ स तथा, बहुवेदपाठकोऽयमित्येव **विद्यात्** जानीयात, पात्रस्वरूपविचारशीलः पुरुषः इति शेषः । 'बहुवागि'त्युक्त्या तस्य पात्रोत्तमत्वाभावोपि सूचितः ॥ ननु तर्हि तस्य अर्थज्ञानाभावेन बहुधा वेदपाठित्वेपि 'बहुवागि'ति शब्दवाच्यत्वे ब्राह्मणशब्दवाच्यं कं वा जानीयामित्यत आह—**य** इति **यः** ब्राह्मणः **सत्यात्** ज्ञानानन्द-पूर्णाद्विष्णोः सर्वोत्तमत्वज्ञानेन, वैष्णवदीक्षाग्रहणाच्चेति शेषः, **नापैति** अपयातो न भवति । अत्रापयानं नाम विष्णुसर्वोत्तमज्ञानपूर्वकं तदीयत्वज्ञापनाय तप्तमुद्राधारणादिवैष्णवदीक्षापरित्याग एव ॥ **एषः** एवंलक्षणकः **सः** स वैष्णव एव **त्वया** धृतराष्ट्रनामकेन त्वया **ब्राह्मणः** ब्राह्मणशब्दवाच्य इति **ज्ञेयः** ज्ञातुं शक्यः । 'स'इत्यनेन

वेदपाठित्वाभावेपि "अण चेष्टया"मिति धातोः ब्राह्मं ब्रह्मसुम्बन्धि-वेदविहितं नित्यनैमित्तिककर्मानुष्ठनात्मककर्मकलापमणते चेष्टत इति तस्यैव ब्राह्मणशब्दवाच्यत्वं नान्यस्येति ॥ ननु तर्हि बहुवागिति ब्राह्मणमिति बहुधा वेदपाठिनो वैष्णवदीक्षाराहित्येन अवैष्णवशब्द-वाच्यस्यापि "ब्राह्मण"मित्युक्तया ब्राह्मणशब्दस्योभयत्रापि साम्या-दस्यैवेति नियमानवकाश इति चेन्न; अत्रापि 'ब्रह्म वेदस्तपस्सत्य' मित्यभिधानात् ब्रह्म वेदः, तत्रा "ण चेष्टाया"मिति धातुबलादणति पाठसमये अपस्वरादिपाठदोषपरिहाराय उदात्तानुदात्तादि चेष्टत इति ब्राह्मणः इति तच्छब्दवाच्यत्वमित्युक्त्योक्तमेव समञ्जसम् । उक्तं च पद्मपुराणे——"अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा । ब्राह्मणस्य तथा वेदात्तप्तमुद्राधिकारिता" इति । ब्रह्मवैवर्त्ते–"तप्तचक्रधरं दृष्ट्वा यो वै निन्दति मूढधीः । स याति नरकं घोरं यावदाभूतसम्प्लुत"—मिति । तत्रैव——"उच्चवर्णोपि यो विप्रो वेदवेदाङ्गपारगः । सदा-चाररतोपि स्याद्विष्णुदीक्षाविवर्जितः । स चोरवद्बहिष्कार्यस्तस्मै दत्तं च निष्फल"मिति । तथा च शतपथश्रुतिश्च——"स होवाच याज्ञ-वल्क्यः । तस्मादात्महिताय हरिं भजेत् । सुश्लोकमौलेर्वर्माण्यग्निना सन्दधाती"त्यादि श्रुतिस्मृतिभ्यो उक्तमेव सत्यम् ॥४१॥

छन्दांसि नाम द्विपदां वरिष्ठ स्वच्छन्दयोगे न भवन्ति तत्र ।
छन्दोविदस्तेन च तानधीत्य गता हि वेदस्य च वेद्यमार्याः ॥४२॥

एवं बहुधावेदपाठिनोपि पठितवेद प्रतिपाद्यमुख्यवस्तुस्वरूपा-ज्ञानात् ब्राह्मणशब्दानभिधेयत्वमभिधायेदानीं ब्राह्मणोत्तमस्वरूपं वक्तुं "सत्यस्यैकस्य राजेन्द्रे" त्यनेन सत्यशब्दवाच्यभगवद्ज्ञानार्थमेव

सर्वेषां वेदानां प्रवृत्तिरिति पूर्वोक्तवेदवर्गप्रवृत्तेर्भगवत्परत्वं दर्शयति— **छन्दांसीति** ॥ सर्वेषां वेदानां सत्यपरत्वात्सत्यपरित्यागेन कृतसुकृतस फलानुदयाच्च सत्यज्ञानमेवाश्यकमित्यतो वाऽऽह—**छन्दांसीति** । हे **द्विपदां वरिष्ठ!** मनुष्यश्रेष्ठ धृतराष्ट्र ! **छन्दांसि** सर्वे वेदाः **स्वच्छन्द-योगे** **गुरूपदेशं** विना स्वच्छन्देन स्वेच्छयैव योगे पाठाद्युपायप्रयत्ने क्रियमाणे सतीति शेषः **तत्र हरौ न भवन्ति नाम** न भवन्ति किल । अत्र नामशब्दः किलार्थे । अनेन स्वेच्छयैव वेदपाठदेर्भग वज्ज्ञानजनकत्वं च नास्तीति दर्शितम् ॥ **छन्दोविदः** ये छन्दस वेदानां गुरुमुखेनैव ज्ञानादिप्रदत्वं, नान्येनेति विदः जानमानाः **आर्याः** ज्ञानवृद्धाः **तेन** गुरुद्वाराभावे भगवत्प्रसाद प्राप्त्यभावाख्येन तेन निमित्तेन **तान्** वेदान् **अधीत्य** वेदमुख्यार्थविषयीभूतविष्णुसर्वोत्तमत्वज्ञानपर्यन्त सद्गुरुभ्य एवाधीत्य, अत्र **च** शब्द एवार्थे, **वेदस्य** समस्तवेदवर्गस्य **वेद्यं** ज्ञेय भगवन्तमेव, अत्रापि **चेत्येतदवधारणे, गताः** ज्ञातवंतः अभवन् यद्वा—"गम्ऌ गता"—विति धातोः भगवन्तं गता इति वा । अत्र हीत्यनेन "आचार्यादेव विद्या विदिता साऽधिष्ठं प्रापत्"ति श्रुतिप्रसिद्धि प्रमाणयति ॥

अथवा—हे **द्विपदां वरिष्ठ!** धृतराष्ट्र ! छन्दांसि वेदा **स्वच्छन्दयोगेन** स्वच्छन्दो मुख्यवृत्तिः तस्याः योगः सम्बन्धः तेन, मुख्यया वृत्त्येति यावत् **तत्र** भगवति **भवन्ति नाम** माहायोगेन, विद्वद्रूढ्या च भगवत्प्रतिपादका एव भवन्तीति । **तेन** सर्वेषां वेदाना भगवत्परत्वाख्येन तेन निमित्तेन कारणेन **छन्दोविदः** वेदाना भगवत्परत्ववेत्तारः ये **आर्यास्ते तान्** वेदा**नधीत्य** पाठतोऽर्थ

तश्चाधीत्य **वेदस्य** "विद् ज्ञाने", "वेदो नारायणः साक्षा"दित्यादिना ज्ञानरूपस्य विष्णोः **वेद्यं** ज्ञानैकगम्यं, स्वरूपमिति शेषः, **गताः** प्राप्ता इति वा । **हीति** प्रसिद्धिः ॥

यद्वा—सर्वेषां वेदानां बह्वर्थपरिबृंहितत्वेन रुचिजननाय बहिर्मुखजनाभिप्रेतार्थोपि प्रतिपाद्यत इत्यतो वा तमर्थं दर्शयन्नाह—**छन्दांसीति ! हे द्विपदां वरिष्ठ ! स्वच्छन्दयोगेने** स्वेच्छया पाठादेर्योगेन संयोगेन **छन्दांसि** "इन्द्र ! श्रेष्ठानी"त्यादयो वेदाः **तत्र** तत्तत्कर्माधिकृतेषु अमुख्यया वृत्यातत्तत्सूक्तप्रतिपाद्यदेवेषु **नाम,** नामेति जातावेकवचनं, "सप्तमु प्रथमे"ति प्रथमा षष्ठ्यर्थे, इन्द्राग्न्यादिनाम्नामेव **भवन्ति** मुख्यत्वज्ञापका भवन्ति । **छन्दोविदः** पाठादिना वेदवेत्तारोपि, **चे**त्यप्यर्थः, **ते** बहिर्मुखाः **आर्याः** वयसा आर्याः अपि **तान्** अमुख्यया वृत्या इन्द्रादिनामपरान्वेदान् **अधीत्य** असद्गुरुमुखादधीत्य **वेदस्य** सर्वस्य वेदवर्गस्य **वेद्यं** मुख्यत्वेन ज्ञातुं योग्यं भगवन्तं **न गता हि** न ज्ञातवन्तो हि ॥४२॥

न वेदानां वेदिता कश्चिदस्ति वेदेन वेद्यं न विदुर्हि वेदम् ।
यो वेद वेदं स च वेद वेद्यं यो वेद वेद्यं न स वेद सत्यम्(वेद्यम्) ४३

ननु यदि वेदपाठैर्वेदार्थपरिज्ञानेन च भगवत्प्राप्तिस्तर्हि वेदानां वेदार्थानां च सर्वदा सर्वत्र सत्वात्सर्वेषामपि तत्प्राप्ति प्रसङ्ग इति चेन्न बह्वधिकारिविवक्षया विश्वतोमुखस्य वेदस्य विवक्षितार्थपरिज्ञानादिनैव प्राप्तिश्रवणाद्विवक्षितार्थपरिज्ञानस्य च दुरधिगमत्वात् वेदपाठमात्रस्य सर्वत्र सर्वदा सत्वेपि तद्वारा तदप्राप्तिरित्याह—**नेति** । **वेदानां** "वेदयतीति वेदा" इति प्रमाणात्सर्वार्थपरिज्ञापकानां वेदानां, विवक्षितार्थमिति शेषः

वेदिता परिज्ञाता **कश्चित्** यः कश्चिदपि पुमान **नास्ति** प्राग
नास्ति॥ लक्षणज्ञानपूर्वकं वेदवेत्तृणां प्रत्यक्षसिद्धत्वात्कश्चिदपि नास्त्ती
कथमुच्यतइति --वेदैः वेद पाठकानां वेदविवक्षितार्थविषयीभूतवस्तुन
अपरिज्ञाना"न्न वेदानां वेदिता कश्चिदस्ती" त्युक्तिर्न सर्वथा तदपि
ज्ञानादिति वदति—**वेदेनेति। वेदेन** लक्षणज्ञानवत्तया पठित
वेदेन **वेद्यं** वेदैकवेद्यं........वेदो नारायणः साक्षात्। वेदो वेदवि
व्यज्ञो"इत्यादिप्रमाणाद्वेदं नारायणं **न विदुर्हि** न ज्ञातवन्तो हि
नन्वेवं चेत्तर्हि कस्यापि ब्रह्मज्ञानानुदयप्रसङ्ग इति चेत्, "आत्मन
वा अरे दर्शनेन श्रवणेनमत्याविज्ञानेनेदं सर्वं विदित"मिति श्रुतेः
"ततो मां तत्वतो ज्ञात्वा विशते तदनन्तर"मित्यादिना बहुष्वेक
कश्चिदधिकारीभगवदनुग्रहप्राप्तश्रवणादिसाधनपरिपाकेन विदितवेद्यो
भवतीत्याह—**य** इति। **यः** "येति ज्ञानं समुद्दिष्ट"मिति वचना
यः कश्चिद्ज्ञनात्मा अधिकारिजीवः **स च** स एव वेदैकगम्
वेदं नारायणं **वेद** स्वयोग्यतानुसारेण जानाति॥ यद्वा--**यः** वे
ऋगादिशब्दशब्दितानां वेदानां मध्ये एकं वा वेदं **वेद, सः** वे
वेदतिवा॥ तर्हि "नाहं वेदैर्न तपसा न ज्ञानेने"त्यादिना केना
साधनानुष्ठानेन ज्ञातुमशक्यं विष्णुं कथमुच्यते अधिकारी जीव
जानाति? इति चेत्—"यतो वाचो निवर्तन्ते अप्राप्य मनस
सहे"त्यादि श्रुतिबलात्साकल्येनैव तद्ज्ञानाभावस्योक्तत्वान्न सर्वथ
तद्विषयकज्ञानाभावः, किन्तु "नभः पतन्त्यात्मसमं पतत्रिण" इति
वत्स्वस्वयोग्यतानुसारेण वेदेत्याह—। **यः** अधिकारी **वेद्यं** भगवन्त
वेद, सः सत्यम् निर्दुष्टज्ञानानन्दाद्यनन्तगुणघनं नारायणं **न** वेद
साकल्येन न ज्ञातवानेव। "स वेद वेद्यमि"त्यपि पाठेऽप्ययमेवार्थः॥४३॥

यो वेद वेदान्स च वेदवेद्यं न तं विदुर्वेदविदो न वेदाः ।
तथापि वेदेन विदंति वेदं ये ब्राह्मणा वेदविदो भवंति ।।४४।।

पूर्वस्मिञ्श्लोके 'वेदेन वेदे'ति वेदस्यैकवचनोक्त्या अनेक शाखात्मकवेदतरुप्रतिपाद्यस्य श्रीनारायणस्य तद्गतैकशाखाध्ययन मात्रेणैव मोक्षसाधनीभूतपरोक्षाअपरोक्षज्ञानप्राप्तिरिति प्रतीयते। न च तद्युक्तं। ज्ञानादिप्रतिपादकऋगादिसर्वशाखाध्ययनजन्यज्ञानस्यैव "सर्ववेदान्त-प्रत्ययं चोदनादी"त्यादिषु तत्प्रापकत्वश्रवणात् जातिविवक्षयोक्तैकवचना-भिप्रायं विविच्यास्मिन्श्लोके दर्शयति–**य इति । यः** अधिकारी **वेदान्** ऋगादीन्सर्वान्वेदान् **वेद** पाठतोऽर्थतश्च जानाति, **स च** स एव **वेद्यं** वेदैकगम्यं भगवन्तं **वेद** । नन्वेवं चेद्वेदैकदेशज्ञानेन भगवत्प्राप्त्यभावेपि सर्ववेदाध्ययनेन तत्प्राप्तिप्रसक्तिः स्यादिति चेन्न साकल्येन सर्वापरि-ज्ञेयमहिम्नो हरेर्गतिः केनापि ज्ञातुं न शक्येत्याह––**नेति । वेदविदः** ऋगादिवेदपञ्चकवेत्तारोपि **तं** परिच्छेदशून्यं भगवन्तं **न विदुः** साकल्येन न विदुः । तर्हि शाख्यपेक्षया शाखनामप्रधानत्वाच्चतुः शाखाध्यायिनामपि भगवद्विषयकसाकल्यज्ञानाभावेपि बहुशाखिनोर्वेद-तरोर्वा तत्संभवादित्यत आह–नेति । **वेदाः** अनन्त वेदाभिमानिनोऽपि **तं न विदुः** "यतोवाचोनिवर्तन्ते अप्राप्य मनसा सहे"ति श्रुतिः, "शब्दो न यत्र पुरु कारकावान् क्रियार्थो मायापरेत्यभिमुखे च विलज्जमाने"त्यादि बहुश्रुतिस्मृतिभ्यः साकल्येन न विदुरिति । ननु यदि सर्वेषां वेदानां भगवद्विषयकज्ञानाभावस्तर्हि भगवतो वेदैकगम्य-त्वनियमो न स्यादिति चेत्, अनन्तानां वेदानां (वेदाभिमानिनां) साकल्येन भगवत्स्वरूपज्ञानाभावेपि स्वयोग्यतानुसारेणैव भगवान्ज्ञेय

इत्याह—तथापीति। **तथापि** वेदाभिमानीनां भगवज्ज्ञानसाकल्याभा
इत्यर्थः **ये ब्राह्मणाः** परब्रह्मविचारशीलाः वेदविदः वेदार्थज्ञानि
भवंति त एव ब्राह्मणाः **वेदेन** वेदनिर्णीतज्ञानेन **वेदं** नारा
विदन्ति लभन्ते; यथायोग्यं जानन्तीतिवा ॥४४॥

धर्मांशभाजश्च तथा हि वेदा यथा च शाखाहि महीरुहस्य।
संवेदनेनैव यथामनन्ति तस्मिन् हि सत्ये परमात्मनोऽर्थे ॥४५

"अनन्ता वै वेदा" इत्यनेन भगद्गुणप्रतिपादकानां वेदानामानन्त्ये
"विष्णोर्नुकं वीर्याणि"त्यादिषु तैरेव विष्णोः स्वानुक्तानन्तगु
गणपूर्णत्वकथनात्तेनाप्यपरिज्ञातामितगुणगणभरितस्य विष्णोर्गुणानुव
वेदैर्लेशत एव क्रियते, न साकल्येनेतीमर्थमस्मिन्श्लोके दृष्टान्तमुखेन
प्युपपादयति—**धर्मांशभाज** इति। **वेदाः** अनन्ता अपि वे
अस्य अनन्तगुणपूर्णस्यास्य विष्णोः **धर्मांशभाजः** तादात्म्योपे
'ऐश्वर्यस्य समग्रस्ये"त्यनेनोक्ता ये धर्माः भगवद्धर्माः, ऐश्वर्याद
भगवन्निष्ठगुणा इत्यर्थः, तेषामंशो माहात्म्यलेशः, तं भजन्ते अनुवा
रूपेण सेवन्त इति ते तथा। अनेनापरिमितगुणपूर्णस्य विष्णोरे
देशगुणानुवादकाः, न तु समग्रानुवादकाः सर्वे वेदा इत्यर्थो दर्शित इति
तत्र दृष्टान्तमाह—**तथेति**। **शाखाः** विटपाः **महीरुहस्य** विटपि
धर्मांशभाजः अङ्कुरोत्पत्तिमत्व-पादपत्व-जीवविशिष्टत्वादयो ध
अंशिनो ये धर्माः स्वाभाविकाः गुणाः, तेषामंशः जडत्वाद्येकदेशगुण
वर्गस्तं यथा भजन्ते चेत्येवार्थे॥ एवं वेदानां धर्मांशभाक्त्वेनाधिकारिण
भगवत्स्वरूपज्ञापकत्वं तेषामेव, नान्येषामित्याह—**संवेदनेनेति**
यथा सर्वेषामधिकारिणां योग्यतामनतिक्रम्य **परमात्मनः** सर्वस्वामिन

विष्णोः संवेदनेन भगवत्स्वरूपज्ञापनाख्यत्वेन स्वगतेन हेतुना विष्णोः अविनाशिनि **अर्थे** अर्थ्यते सर्वैरित्यर्थः **तस्मिन्विष्णावेव समाऽऽमनन्ति** पदवाक्यादीनां समन्वयं आमनन्ति प्रतिपादयन्ति ॥ अनेन सर्वेषां वेदानां विष्णावेव समन्वयो, नान्यत्रेति दर्शितमिति ॥४५॥

अभिजानामि ब्राह्मणं व्याख्यातारं विचक्षणं ।
परं हि तत्परं ब्रह्म जानात्यैवहि ब्राह्मणः ॥४६॥

एवमपरिमितानन्तगुणगणमण्डितस्य विष्णोरेव सर्वात्मनाप्रतिपादका वेदाः, नान्येषामिति सर्वेषां वेदानां भगवत्परत्वं समर्थ्याधुना तेषामेवाऽर्थत्रैविध्यविशिष्टत्वेन बहिर्मुखानामनधिकारिणां मुख्यया वृत्यां ब्रह्मेन्द्राद्यन्यदेवतानामेव प्रतिपादकवत्प्रतीयमानानां सर्वेषां वेदवाक्यानां परममुख्यया वृत्त्या भगवद्गुणप्रतिपादकतया प्रवचनशील एव ब्राह्मणोत्तमत्वेन मम सम्मत इति स्वसम्मतिप्रदर्शनपूर्वकं पात्रोत्तमब्राह्मणस्वरूपं कथयति–**अभिजानामीति** । अहं सनत्सुजाताख्योहं **व्याख्यातारं** भगवत्परतया वेदव्याख्यानशक्तिसम्पन्नं **विचक्षणं** वि विशेषेण चक्षते ज्ञानचक्षुषा सर्वान्वेदार्थान्भगवत्परतया प्रेक्षत इति विचक्षणस्तमेव **ब्राह्मणं अभिजानामि** अभीत्यव्ययबलाब्राह्मणोत्तमं जानामीत्यर्थः ॥ ननु अन्येषामपि ब्राह्मणानां सत्वात्किमिति वेदव्याख्यातुरेव ब्राह्मणोत्तमत्वमाख्यास्यसीत्यत आह––**परमिति** । **ब्राह्मणः** भगवत्परतया वेदव्याख्यानशीलो ब्राह्मणः **तत्** व्याप्तं **परंब्रह्म** **पर**मिति सर्वोत्कृष्टमिति **जानाति** । **एवे**त्यवधारणबलात्तस्यैव ब्रह्मज्ञानसंम्पन्नत्वेनोत्तमब्राह्मणत्वं नान्यस्येत्यर्थः सूचित इति ॥४६॥

तस्य पर्येषणं गच्छ प्रत्यार्थिषु कथंचन ।
अविचिन्वन्निमं वेदे ततः पश्यति तं प्रभुम् ॥४७॥

एवं पात्रोत्तमब्राह्मणस्वरूपमभिधायेदानीं "अहं वेद्मि ब्राह्मण (अ. ३, श्लो ३८) मिति धृतराष्ट्रप्रश्नं परिहरति—**तस्येति** । धृतराष्ट्र: ! त्वं **तस्य** भगवदनुसन्धानज्ञानपूर्वकवेदव्याख्यानशील तस्य ब्राह्मणस्य **पर्येषणं** अन्वेषणं, अन्वेषणलक्षणं सेवनं, **गच्छ** प्राप्नुहि । **प्रत्यर्थिषु** तादृशब्राह्मणविरोधिषु अवैष्णवेषु, 'कथंचने त्यत्र पदच्छेदः—कथं, च, नेति; **कथं** दाक्षण्येन वा, अर्थलोभादिन वा, यथाकथं वा प्रकारेण, **पर्येषण** मित्येतदत्राप्यन्वेतव्यं **न गच्छ** अवैष्णवभजनं न कुरु **वेदे** वेदज्ञानसम्पन्नत्वेन पात्रोत्तमे ब्राह्मणे **इम** श्रीनारायणं **अविचिन्वन्** अन्वेषणमकुर्वन् । अनेन भगवत्स्वरूपा न्वेषणं सत्सङ्गतिद्वारैव कार्यमिति गभार्थः सूचितः ॥ यद्वा—'अत्रै मृग्यः पुरुषो नेति नेतीत्यतत्यजन्" । **अत्रैव** वेदभारतपञ्चरात्रेष्वे पुरुषः पूर्णषड्गुणः श्रीनारायणः **मृग्यः** अन्वेषणीयः । **अन्यत्र** पाशु पताद्यागमेषु **नेति नेति** अन्वेषणीयो न भवति, न भवत्येवेति **अतत्** मिथ्याभूतपाशुपतादिकुशास्त्रभ्यासं **त्यजन्,** प्रथमा तृतीयार्थे, मिथ्या- शास्त्रं परित्यक्तवता पुरुषेणेत्यर्थः । इत्यादिप्रमाणानुसारेण **वेदे** ऋगादि- पञ्चके **इमं** श्रीनारायणं **अविचिन्वन्** अविचारयन् **प्रत्यर्थिषु** सच्छास्त्रप्रतिपक्षिभूतपाखण्डपाशुपतादिकुशास्त्रेषु **पर्येषणं** तदर्थश्रवणादि परिकरणेच्छां **कथंच** कथंचित्प्रकारेणापि **न गच्छ** मा गाः । **ततः** कुशास्त्रानभ्यासाद्धेतोः **तं** वेदगम्यं **प्रभुं** सर्वसमर्थं नारायणं **पश्यति,** अपरोक्षेणेति शेषः ॥४७॥

तूष्णींभूत उपासीत नचेच्छेन्मनसापि च ।
अभ्यावर्तेत ब्रह्मास्मै बह्वनन्तरमाप्नुयात् ॥४८॥

एवं सर्वपुरुषार्थसाधनभगवदपरोक्षज्ञानप्राप्तये वेदान्तशास्त्राभ्यासजन्यविष्णुसर्वोत्तमत्वज्ञानसम्पन्नब्राह्मणोत्तमसेवैव मुख्यसाधनं, नान्यदिति यदुक्तं तदपि वैराग्यसहकृतमहाफलदमिति विधत्ते—तूष्णींभूतेति । साधकः पुरुष**स्तूष्णींभूतः** फलाभिसन्धिरहितः सन् **उपासीत** सेवेत, श्रीनारायणं, विद्योपदेष्टारं गुरुं वेति शेषः, **मनसाऽपि नेच्छेत्**, फलानि नेच्छेत् ; 'मनसाऽपि नेच्छेत् इत्यनेन वाचनिकादौ कैमुत्यन्यायो दर्शितः चेत्यनेन दुर्विषयानपि इति च संबध्यते । **अस्मै** एवंविधायोपासकाय **ब्रह्म** परब्रह्माख्यं वस्तु **अभ्यावर्तेत** अनुग्रहकरणाय अभिमुखेन प्रवर्तते **अनन्तरं** भगवता अनुग्रहणाय अभिमुखीकरणानन्तरं **बहु** पूर्णं ब्रह्म वा, यथेष्टानन्दं वैकुण्ठादिकं धाम वा **आप्नुयात्** आप्नोति । "किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने"त्यादिप्रमाणानुसारात् ब्रह्मप्राप्त्यनन्तरं करतलामलकवदनायासेन सर्वपुरुषार्थावाप्तिश्च सूचि ॥

अथवा ज्ञानेच्छोः पुरुषस्य गुरूपसत्तिद्वारेणैव ज्ञानप्राप्तिरिति- र्नान्येनेति नियमात्सोपसत्तिरेवादौ कार्येति तत्करणप्रकारमाह—**तूष्णींभूतेति । तूष्णींभूतः** विद्यार्थी गुरुकुलवासी स्वानुभूतसुखदुःखादिकमकत्थमानः सन्नेव **उपासीत** सेवेत, गुरुमिति शेषः, **मनसापि नचेच्छेत्** गुरोरप्रियं नेच्छेत; 'मनसापीत्यनेन अत्रापि कैमुत्यमेव सूच्यते ; **अस्मै एवं** गुरूपसत्तिं कुर्वाणायास्मै ब्राह्मणाय **ब्रह्म** वेदविद्या

अभ्यावर्तेत अनायासेन स्वात्मानं दातुं अभिमुखेन निवर्तेत, निवर्तत इत्यर्थः **अनन्तरं** वेदाभिमानिदेवताप्रसादप्राप्यवेदविद्याप्राप्त्यनन्तरं **बहु** आद्यन्तशून्यं ब्रह्म, तद्विषयकज्ञानं वा **आप्नुयात्** प्राप्नोतीति ॥४८॥

मौनाद्धि स मुनिर्भवति नारण्यवसनान्मुनिः ।
अक्षरं तु तपो वेद स मुनिः श्रेष्ठ उच्यते ॥४९॥

ननु "ये वा गृहं परित्यज्य वनमेव समाश्रिता" । विषयेषु विरागाद्याः मुनयस्ते समीरिताः" "पूज्यास्ते मुनयो लोके ब्राह्मणा न्यासिनश्च ये" इत्यादिनाऽरण्यवासिनामेव पूज्योत्तमत्वनियमात्कि-मित्युच्यते विषयविरक्त्युपेतवेदविद्यासम्पन्नब्राह्मणस्य पूज्योत्तमत्वमिति चेत्—"विष्णुभक्तिपरो यस्तु सदाचाररतः सदा । वेदान्तपरिनिष्णातो गार्हस्थ्यपरिपोषकः ॥ विविक्तसेवी लघ्वाशी पूज्यो ब्राह्मणसत्तमः । नारण्यवासी दुष्टात्मा विप्रः स्वाध्यायशील्यपी" त्यादिना मनोनै-र्मल्यहीनवन्यपेक्षया भावशुद्धज्ञानसम्पन्नगृहाश्रमी ब्राह्मण एव श्रेयानि-त्याह—**मौनादिति । अरण्यवसनात्** अरण्यसम्बन्धिषु निवसनात् **सः** मनोदोषयुक्तो अरण्यवासी ब्राह्मणः **मुनिः** मुनिशब्दवाच्यो **न भवति** ॥ तर्हि अरण्यवासिनो ब्राह्मणस्य मुनिशब्दवाच्यत्वाभावे गृहवासिनो ब्राह्मणस्य मुनिशब्दवाच्यत्वं केन हेतुनेति चेत्, मौनादेव मुनिरित्याह— **सः** गृहवासी ब्राह्मणः **मौनात्** मुनिप्राप्याद्विष्णोः सम्बन्धात् **मुनिः** मुनिशब्दवाच्यः **भवति** । अनेन ब्रह्मज्ञानशून्य-स्यारण्यवासमात्रेण ब्राह्मणस्य मुनिशब्दवाच्यत्वमपहसितमिति सूचितं ॥ यद्वा **मौनात्** वाङ्नियमनरूपात् तूष्णींभावात्, **हीति** समुच्चये, अरण्य-

वसनाच्च गृहादिषु निवसनाच्च **सः** मौनेनारण्यवासशीलो **मुनिः** मुनिशब्दवाच्यो **न भवति** ॥ तर्हि मुनिशब्दवाच्यः क इति तत्राह— **अक्षरमिति** । यः ब्राह्मणः "विष्णुमुद्दिश्य यत्कर्म विष्णुप्रीत्यर्थमेव च । क्रियते कार्यमित्येव तदानन्त्याय कल्प्यते"त्युक्तविधिनाचरितस्यैव कर्मणो अक्षरतपः शब्दवाच्यत्वं, "तपो भवति केवल" मित्यपि चोक्तत्वादेवंविध **मक्षरं तपः वेद,** कर्तुमिति शेष, **सः** स एव ब्रह्माणः **मुनिश्रेष्ठः** मुनिशब्दवाच्यानां, श्रेष्टः, मुनिश्चासौ श्रेष्ठश्चेतिवा **उच्यते** शास्त्रेषु मुनिश्च पठ्यत इति ॥४९॥

सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते ।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ॥५०॥

लोके शब्दशास्त्रचतुराणामेव सर्वशब्दार्थव्याकरणाद्यधिकरणोक्तेरभावाच्च वैयाकरणशब्दवाच्यत्वेन तेषामप्युत्तमब्रह्मणत्वात्कथमक्षरतपोवेदिनामेवोत्तमत्वमित्यर्थः तदपि वैयाकरणशब्दार्थनिष्पत्तिकथनेनेत्येतदपाकरोति—**सर्वार्थानामिति** । ननु शब्दशास्त्रपटूनां वैयाकरणानामपि ब्राह्मणोत्तमत्वस्योक्तत्वात्कथमुच्यते अक्षरतपोवेदिनामेवोत्तमत्वमिति **चेन्न** चे न्नशब्दशास्त्राभ्यासमात्रेण ब्राह्मणस्योत्तमत्वं; अपितु "शब्दस्य हि ब्रह्मणः एष पन्था" इत्याद्यनुसारेण सर्वस्यापि शब्दब्रह्मणः परब्रह्मविषयीकरणसमर्थानामेव वैयाकरणानां ब्राह्मणानामुत्तमत्वमिति कथनेन वैयाकरणानामपि अक्षयतपोवेदिष्वेवान्तर्भाव इति सूचयन् शङ्कामपाकरोति—सर्वार्थानामिति । **सर्वार्थानां** सर्वशब्दार्थानां **व्याकरणात्** "विः पक्षिपरमात्मनो" रित्यभिधानात् वौ हरौ आ

सम्यक् करणात् विषयीकरणात् **वैयाकरण इत्युच्यते,** न ह
शब्दशास्त्रमात्राध्ययनबलाच्छब्दमात्रव्याकरणात् ॥ कोऽयं नियम
इति चेत्, सर्वशब्दार्थनिष्पत्तीकरणसमर्थव्याकरणशब्दवाच्यशब्द
शास्त्रस्यापि वेदैकमूलत्वादित्याह—**तन्मूलत इति** । **व्याकरण**
सर्वशब्दानां यथास्थितार्थस्पष्टीकरणं, शब्दशास्त्रस्येति शेषः, 'शब्दे
न यत्र पुरुकारकृतान्क्रियार्थं' इत्यादिना **तन्मूलतः** शब्दब्रह्माख्यवेद
मूलत एवेति हेतोरयं नियम इत्यर्थः । तस्मात् **तत्** वेदाख्यं शब्दब्रह्मै
तथा मुख्यतया व्याकरणशब्दवाच्यं, नान्यदिति । अनेनानन्तत्वा
न्मुख्यतया सर्वशब्दार्थनां स्पष्टीकरणसामर्थ्युपेतत्त्वात्तदितरव्याकरण
शब्दवाच्यशास्त्रस्य तन्मूलत्वात्सर्वत्र विष्णवैकविषयत्वाच्च मुख्यते
व्याकरणशब्दवाच्यत्वं वेति हेतोस्तदर्थज्ञानवानेव ब्राह्मणोत्तमो
व्याकरणशब्दशब्दितो, न तु तद्राहित्येन प्रसिद्धव्याकरणशब्दवाच्य
शास्त्राभ्यासपाटवेन शब्दार्थव्याकरणशीलो ब्राह्मणो वैयाकरणीति
निर्णायीति ॥५०॥

प्रत्यक्षदर्शी लोकानां सर्वदर्शी भवेन्नरः ।
सत्ये वै ब्रह्मणस्तिष्ठंस्तद्विद्वान्सर्वविद्भवेत् ॥५१॥

ननु ब्राह्मणस्य व्याकरणशब्दवाच्यवेदार्थानां भगवत्परतय
प्रतिपादनेन किं फलमुदेष्यतीति चेत्, स्वबिम्बापरोक्षज्ञानपूर्वकस्वस्व-
रूपाभिव्यक्तिद्वारा यथायोग्यसर्वापरोक्षज्ञानफलमुदेष्यतीत्याह—**प्रत्य-**
क्षदर्शीति । **प्रत्यक्षदर्शी** साक्षात्कारेण भगवन्तं पश्यतीति प्रत्यक्षदर्शी
अपरोक्षज्ञानीत्यर्थः **नरः** "रीङ् क्षये" इति धातोः नरीयत इति नरः
अहीयमानो ज्ञानी पुरुषः **लोकानां** "लोकस्तु भुवने जने" इत्यभिधानात्

अज्ञजनानां **सर्वदर्शी** विषयोपरक्तमनस्कत्वेन क्रियामाणं सर्वं समग्रं यदशुभजातं तद्ज्ञानचक्षुषा पश्यतीति सर्वदर्शी **भवेत्** एवं विधो भवेत् ॥ यद्वा **प्रत्यक्षदर्शी** स्वात्मनः प्रत्यक्षेषु चक्षुः श्रोत्रादिप्रतिप्रतीन्द्रियेषु "बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षितो ये"त्यादिना भगवदाराधनत्वेनैव पश्यति, न तु भोगसाधनत्वेनेति प्रत्यक्षदर्शी **लोकानां** जनानां, अन्तर्यामित्वेनेति शेषः **सर्वदर्शी** "सर्वं समाप्नोषि ततोऽसि सर्वः" "सर्वः शर्व" इत्यादिना सर्वशब्दवाच्यं भगवन्तं "सर्वत्र विदितात्मनामि"त्यनेन स्वात्मनो अपरोक्षज्ञानित्वात्सर्वाधिष्ठानगतभगवदाराधनयोग्यत्वेन "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित" इत्यनुसारेण सर्वशब्दवाच्यं सर्वान्तर्यामिणं श्रीनारायणं पश्यतीति सर्वदर्शी **भवेत्** ॥ वैयाकरणः स एव भवेत् नान्य' इति यस्मात्सर्ववेदार्थानां भगवत्परार्थकथनेनैव प्रत्यक्षदर्शित्वादिप्राप्तिः **तत्** तस्माद्धेतोः **सत्ये** "सत्यं परं धीमही"ति सत्यशब्दवाच्ये भगवत्येवेति, वा इत्यवधारणे, **तिष्ठन्** "एकान्तानां न कस्य चित्। अर्थे नारायणो देवः सर्वमन्यत्तदर्थक"मित्येवंभावनया तिष्ठन् **विद्वान्** ज्ञानी **ब्राह्मणः सर्ववित्** भूतभविष्यदादित्रैकालिकयथायोग्यसर्वविषयकज्ञानवानपि **भवेत्** ॥९१॥

ज्ञानादिषु स्थितोऽप्येवं क्षत्रियः ब्रह्म पश्यति ।
वेदानां चारपूर्वेण एतत्विद्वान् ब्रवीमि ते ॥५२॥

न केवलमेवंविधभगवद्विषयिकज्ञानभक्त्यादिसाधनानुष्ठाने ब्राह्मणानामेव महानिष्टनिवर्तकत्वं, अपितु एवं क्षत्रियोपीति कथनेन क्षत्र-

ज्ञात्युत्पन्नस्यापि महानर्थनिवर्तये इदमेव साधनं, नान्यदितिहेतोस्तव सद्गन्धर्वाशित्वेन महाधिकारित्वात्त्वोत्तमयुधिष्ठिरादिद्वेषजनितमहान निवर्तये मयोक्तमेव साधनं, नान्यदिति ज्ञात्वैतदेव सम्पादयेत्युपसंहा मुखेनाध्यायान्ते धृतराष्ट्रमुपदिशति—**ज्ञानादिष्विति** । **ज्ञानादि** ज्ञानं परोक्षापरोक्षविषयं, तदेव आदिर्येषु भक्तिवैराग्यादिषु **स्थि** निष्णातः **एवं** ज्ञानादिगुणसम्पन्नब्राह्मणवत् **विद्वान्** स्वविहितज्ञानव **क्षत्रियः** क्षत्रियकुलोत्पन्नोपि, ब्राह्मणापेक्षया क्षत्रियस्यनैच्यत्वद्य नायात्रापिशब्दः, **वेदानां** सर्वेषां वेदानां **चारपूर्वेण** "चर ग भक्षणयो" रितिधातोः चारो वेदार्थविचारः, स एव पूर्वः सक साधनाग्रवर्ती यस्य कर्मणस्तेन साधनानुष्ठानेन **ब्रह्म** परंब्रह्म **पश्यं** अपरोक्षयेति शेषः ॥ **एतत्** इदमेव साधनं **ते** धृतराष्ट्रनाम्नस्तवा **ब्रवीमि** महानर्थकृत्वेनावश्यविधेयमित्युपदिशामीति ॥९२॥

इति श्रीमन्महाभारते उद्योगपर्वणि सनत्सुजातीये
वादिराजयतिविरचितायां दुर्बोधार्थ प्रकाशिकायां
तृतीयोऽध्यायः समाप्तः

॥ अथ चतुर्थोऽध्यायः ॥

हरिः ॐ ॥ धृतराष्ट्र उवाच—
सनत्सुजात ! यदिमां परार्थां ब्राह्मीं वाचं वदसि विश्वरूपां ।
परां हि कार्येषु सुदुर्लभां कथां प्रब्रूहि मे वाक्यमेवं (वाच्यमेकं)
कुमार ! ॥१॥

श्रीः ॥

॥ अथ चतुर्थाध्यायटीका ॥

ॐ ॥ सर्वेषामाश्रमाणां तद्धर्माणां च ब्रह्मचर्याश्रममूलत्वाद्ब्रह्मचर्यस्याश्रमेषु प्राथमिकत्वाद्गुरुकुलवासादिना ब्राह्मणादीनां ब्रह्मज्ञानसाधनं प्रथमो ब्रह्मचर्याश्रमधर्मानुष्ठानमेवेति तत्प्रतिपाद्यतेऽस्मिन्नध्याये । तत्राद्यावतीताध्याये सनत्सुजातोक्तिप्रशंसापूर्वकं स्वाभिप्रेतं पुनस्तमेव पृच्छति धृतराष्ट्र इत्याह—सनत्सुजातेति हे **सनत्सुजात ! कुमारे**ति तस्यैव विशेषणं, कुं कुत्सितं, संसारमन्यथाज्ञानं च स्वोपदिष्टब्रह्मज्ञानेन मारयतीति कुमार ! पञ्चवार्षिककौमारवयोविशिष्टवद्दृश्यमानत्वाद्वा कुमारेति । तत्र प्रमाणं—"पञ्चषडायनार्थाभाः पूर्वेषामपि पूर्वज' इति । **इमां** परापरतत्त्वविषयां **परार्थां** "परोऽरिपरमात्मनो" रित्यभिधानात् परो विष्णुः स एव मुख्यप्रतिपाद्यार्थविषयो यस्याः सा तथा तां **विश्वरूपां** बह्वर्थप्रतिपादनसामर्थ्युपेतत्वेन विश्वतो मुखां **कार्येषु** कर्तुं योग्येषु नित्यनैमित्तिकादिषु श्रौतकर्मसु **परां** अन्यार्थविषयां **सुदुर्लभां** अल्पज्ञेष्वसदादिषु सुखेन लब्धुमशक्यां एवंविधां **ब्राह्मीं** ब्रह्मशब्दवाच्यवेदार्थसम्बन्धिनीं **वाचं** उपदेशरूपवाचं **वदसि** मां प्रति वदसि **यत्** इति यत् अतो **एवं** सुखसाध्यमेवंविधं **वाक्यं प्रब्रूहि,**

ममेतिशेषः । "वाच्यमेकमिति" पाठे तु—**वाच्यं** मादृशानामज्ञानां वक्तुं योग्यं **एकं** निर्णीतार्थविषयत्वे अन्ययोगव्यवच्छेदशून्यं वाच्यं **मे प्रब्रूहीति** ॥१॥

सनत्सुजात उवाच—

नैतद्ब्रह्म त्वरमाणेन लभ्यं यन्मां पृच्छस्यनु (स्याभि) षङ्गेण राजन् ! ।
बुद्धौ प्रलीने मनसि प्रचिन्त्या विद्याऽहिंसाब्रह्मचर्येण लभ्या ॥२॥

एवं बहुना कालेन बह्वायाससाध्यब्रह्मज्ञानस्याल्पायाससाध्योपायं धृतराष्ट्रेण पृष्ठः सनत्सुजातमुनिः ब्रह्मज्ञानं ब्रह्म च त्वरावता न लभ्यं, किन्तु "मनएव मनुष्याणां कारणं बन्धमोक्षयो"रित्यनेन भगवन्निष्टसंपन्नस्वमनोजयपूर्वकअहिंसासहकारिब्रह्मचर्याख्यसुलभप्रयत्नप्राप्यमिति वक्ति—**नेति** । हे **राजन् !** धृतराष्ट्र ! **अनुषङ्गेण** स्नेहेन, "स्नेहो भक्तिरिति प्रोक्त"इत्युक्तत्वाद्भक्त्येति यावत्, **ब्रह्म पृच्छसि,** त्वरया प्राप्तुमिति शेषः । **एतत्** त्वया प्राप्यत्वेन पृष्टं अतत् **ब्रह्म** परंब्रह्म **त्वरमाणेन** त्वरां कुर्वता पुरुषेण **न लभ्यं** न प्राप्यं, किन्त्वत्वरारूपप्रयत्नेनैव । यथा ब्रह्मप्राप्तौ महान्प्रयत्नस्तथा ब्रह्मविद्याप्राप्तवपीत्याह— **बुद्धाविति** । **बुद्धौ** बोधरूपत्वाद्बुद्धिर्विष्णुस्तस्मिन्**मनसि** स्वमनसि **लीने** प्रत्यक्षविषये सति **प्रचिन्त्या** अनवरतविचारेण विचारणीया **विद्या** । ब्रह्मविद्या ब्रह्मविद्याप्राप्तौ साधनान्तरं चाह—अहिंसेति ! **अहिंसाब्रह्मचर्येण** अहिंसाकृतब्रह्मचर्याख्यप्रयत्नेन **लभ्या** लब्धुं योग्या, नान्येन प्रयत्नेनेति ॥२॥

आद्यां विद्यां वदसि हि सत्यरूपां या प्राप्यते ब्रह्मचर्येण साद्भिः ।
यां प्राप्यैनां मर्त्यलोकं त्यजन्ति या वै विद्या गुरुवृद्धेषु नित्या॥३॥

"विद्ययाऽमृतमश्नुते" ज्ञानवान्मां प्रपद्यते" इत्यादिना परब्रह्म-प्राप्तौ विद्यैव मुख्यसाधनं तत्साधनं ब्रह्मचर्यमित्यादि कथयति— **आद्येति** । हे धृतराष्ट्र ! **सत्यरूपां** सत्योविष्णुः, तं रूपयति, निरूपयतीति सत्यरूपा, तां, अविनाशिस्वरूपामिति वा, **आद्यां** आ समन्तात् द्योतत इति आद्या, तां **विद्यां** एवंविधां विद्यां **वदसि** उपदिशेति कथयसि **या** सा विद्या **सद्भिः** सज्जनैः **ब्रह्मचर्येण** ब्रह्मचर्याश्रमधर्मेण **प्राप्यते** लभ्यते **एनां** मयोच्यमानां **यां** यां विद्यां **प्राप्य** लब्ध्वा **मर्त्यलोकं** मनुष्यलोकं, मानुषदेहं वा **त्यजन्ति** परित्यजन्ति ॥ तर्ह्येवंविधा विद्या केषु निष्ठेत्यत आह— **येति** । **या** मयोच्यमाना विद्या **गुरुवृद्धेषु** गुर्वनुग्रहेणोत्तमत्वं प्राप्तेषु, गुर्व-नुग्रहाभिवृद्धेष्वित्यर्थः **नित्या** सनातना ॥३॥

धृतराष्ट्र उवाच—

ब्रह्मचर्येण या विद्या शक्यते वेदितुमञ्जसा ।
तत्कथं ब्रह्मचर्यं स्यादेतद्ब्रूहि महामुने ॥४॥

परब्रह्मप्राप्तिसाधनीभूतायाः ब्रह्मविद्यायाः ब्रह्मचर्याचरणेन प्राप्तिरिति श्रुतब्रह्मचर्यमहिमा धृतराष्ट्रस्त्वादौ ब्रह्मचर्यलक्षणं पृच्छति— **ब्रह्मचर्येणेति** । हे **महामुने !** सनत्सुजात ! त्वयोदिता **विद्या** ब्रह्मविद्या **ब्रह्मचर्येण** ब्रह्मचर्याख्योपायेन **अञ्जसा** सम्यक्त्वेन **वेदितुं** परिज्ञातुं **शक्या,** चेदिति शेषः, तर्हि ब्रह्मविद्यासाधनीभूतस्य

ब्रह्मचर्यस्येव लक्षणमादौ विनिज्ञास्यामीति पृच्छति—**तदिति तत्** त्वयोदितं ब्रह्मविद्यासाधनं **ब्रह्मचर्यं कथं** केन प्रकारेण **स्यात्** ब्रह्मचर्याख्यं सद्विद्याप्रापकं स्यात् ? तथा **एतत्** ब्रह्मचर्यलक्षणं **ब्रूहि मे** ब्रूहीति ॥४॥

सनत्सुजात उवाच—

आचार्ययोनिमिह ये प्रविश्य भूत्वा गर्भं ब्रह्मचर्यं चरन्ति ।
इहैव ते शास्त्रकारा भवन्ति विहाय देहं परमं यान्ति सत्यम् ॥५॥

एवं धृतराष्ट्रेण पृष्टः सनत्सुजातः ब्राह्मणकुलोत्पन्नस्य पुरुषस्य वैदिक-संस्कारसम्बन्धिब्राह्मणत्वप्रापक" मैत्रो ब्राह्मण उच्यत" इत्यादिप्रमाण-प्रमितमित्रदेवताकगायत्र्युपदेशलक्षणककेवलब्रह्मचर्याश्रमप्राप्तिमात्र एव परविद्याप्रापकब्रह्मचर्यप्राप्तिर्न, ह्यपितु ब्राह्मणत्वप्राप्त्यनन्तरं गुरुकुल-वासद्वारा सेवाप्रसन्नगुर्वनुग्रहसम्पादनपूर्वकं जितेन्द्रियत्वादिना यावद्वर्ष वेदादिसकलशास्त्राभ्यासेनैव तत्प्राप्तिर्नान्येन साधनेनेति कथनपूर्वक-मादौ ब्रह्मचर्यप्राप्तिसाधनं तत्फलं चाह—**अचार्ययोनिमित्यादिना इह** अधिकारिवर्गे **ये अचार्ययोनिं**[1] **प्रविश्य, गर्भं भूत्वा** गर्भवत्प्रियतमोभूत्वा **ब्रह्मचर्यं** गुह्येन्द्रियनियमनादिव्रतं **चरन्ति, त इहैव** एतस्मिन्नेवजन्मनि **शास्त्रकाराः** शास्त्रकर्तारः सर्ववेदाद्यर्थप्रति-पादकग्रन्थकर्तारो **भवन्ति ।** **ते देहं** चरमदेहं **विहाय परमं** उत्तमं, निर्दोषज्ञानानन्दानुभवं **सत्यं** परब्रह्म **यान्ती**ति यावत् ॥५॥

---

१ योनिः स्थानं, आचार्यसमीपं गत्वेत्यर्थः ।

अस्मिँल्लोके विजयन्तीह कामान् ब्राह्मीं स्थितिमनु-
तितिक्षमाणाः ।
त आत्मानं निर्वहन्तीह कामात् मुञ्जादिषीकामिव
धीरभावात् ॥६॥

किंच ते **अस्मिँल्लोके कामान्** विषयान् **विजयन्ति** प्राप्नुवन्ति **ब्राह्मीं स्थितिं** परब्रह्मविषयां स्थितिं, ब्रह्मचर्यमिति यावत् **अनुतितिक्षमाणाः** प्रतिदिनं सहमानाः **ते आत्मानं** जीवं, परमात्मानं वा, देहेन्द्रियादिसङ्घातं **निर्वहन्ति** निष्कृष्य जानन्ति । कस्मात् ? **कामात्** स्वेच्छया **धीरभावात्** धैर्याच्च ॥ तत्र दृष्टान्तमाह—मुञ्जादिति । **मुञ्जात्** तृणविशेषात् यथा **इषीकां** अन्तस्थां निर्वहन्ति तथेत्यर्थः ॥६॥

शरीरमेतौ कुरुतः पिता माता च भारत !
आचार्यतश्च यज्जन्म तत्सत्यं यथाऽमृतम् ॥७॥

आचार्ययोनिमिति आचार्यस्य जनकत्वमभिहितं, तन्मातापितृसाधारणं नेत्याह—**शरीरमिति । अचार्यतः** आचार्याद्य**ज्जन्म** ज्ञानरूपं **तत्सत्यं** अविनाशि, विनाशाभावसम्पादकमितियावत् ॥ तत्र दृष्टान्तमाह—यथेति ॥७॥

य आस्तृ(णा)णोत्यमृतं संप्रयच्छंस्तस्मै नद्रुह्येत्कृतमस्य
जानन् ।
गुरुं शिष्यो नित्यमभिवादयीत स्वाध्यायामिच्छेच्च
सदाऽप्रमत्तः ॥८॥

य आस्तृणोतीति अमृतं न विद्यते मृतं मरणं यस्मात्तदमृतं, परब्रह्मविषयकं ज्ञानं **संप्रयच्छन्** सन् **यः आस्तृणोति**

विस्तारयति। यद्वा **अमृतं** नित्यं वेदं **संप्रयच्छन्** शिष्येभ्यो उपदिशन् सन् **यः** ज्ञानेन **आस्तृणोति** ज्ञानं विस्तारयति **तस्मै** गुरवे **न द्रुह्येत्। अस्य कृतं,** तृतीयार्थे षष्ठी, अनेन कृतं आत्मनः उपकारं जानन् ॥८॥

शिष्यवृत्तिक्रमेणैव विद्यामाप्नोति यः शुचिः।
ब्रह्मचर्यव्रतस्यास्य प्रथमः पाद उच्यते ॥९॥

इदानीं ब्रह्मचर्यस्य चतुष्पादत्वमभिप्रेत्य प्रथमं पादमाह— **शिष्य इति। यः शुचिः** शुद्धः सन् **शिष्यवृत्तिक्रमेण** आचार्याणामनुवृत्तिक्रमेण **विद्यामाप्नोति**ति यत् सः **ब्रह्मचर्य व्रतस्य प्रथमः पाद उच्यते ॥९॥**

यथा नित्यं गुरौ वृत्तिर्गुरुपत्न्यां तथाऽऽचरेत्।
तत्पुत्रे च तथा कुर्वन् द्वितीयः पाद उच्यते ॥१०॥

द्वितीयं पादमाह—**यथेति। तत्पुत्रे** गुरुपुत्रे **तथा** गुरुवत् वृत्तिं **कुर्वन् शिष्यः गुरुपत्न्यां तथा** गुरुवद्वृत्ति**माचरेत्** इति यत् अयं **द्वितीयः पाद उच्यते ॥१०॥**

आचार्येण कृतं ज्ञात्वा भावितोस्मीति मन्यते।
तं गुरुं प्रतिहृष्टः सन् तृतीयः पाद उच्यते ॥११॥

तृतीयपादमाह—आचार्येणेति। **भावितोस्मीति** अनेन ज्ञानदानेनोत्पादितोस्मीति ॥१२॥

आचार्याय प्रियं कुर्यात्प्राणैरपि धनैरपि।
कर्मणा मनसा वाचा चतुर्थः पाद उच्यते ॥१२॥

अथ चतुर्थपादमाह—आचार्येति । स्पष्टार्थोऽयं ॥१२॥

कालेन पादं लभते तथार्थं ततः पादं गुरुसंयोगतश्च ।
उत्साहयोगेन च पादमृच्छेच्छास्त्रेण पादं च ततो-
ऽभियाति ॥१३॥

विद्याया अपि चतुष्पादत्वं वदन् एकैकं प्राप्त्युपायमाह—**कालेनेति** । अत्र क्रमो न विवक्षितः । तथा च **गुरुसंयोगतः** गुरुप्रसादलक्षणोपायात् प्रथमं **पादं लभते** । **ततः उत्साहयोगेन** उत्साहः प्रयत्नं, तेन तत्साध्यो बुद्धिविशेषो लक्ष्यते, तथा च बुद्धिविशेषेण द्वितीयं **पादमा**दत्ते । **ततः कालेन** सब्रह्मचारिसमागमनकालेन तृतीयं । **शास्त्रेण** शास्त्रशासनं, शिष्यान् प्रति व्याख्यानमिति यावत् । यद्वा **शास्त्रेण** शिष्यान्प्रत्युपदिश्यमानेन चतुर्थपाद**मभियाति** । कीदृशं ? **तथार्थं** तथाभूत "एवं वसन्" इत्यादिना वक्ष्यमाणोऽर्थो यस्मात्तत्तथार्थं । तदुक्तं—"आचार्यात्पादमादत्ते पादं शिष्यः स्वबुद्धितः । पादं ब्रह्मचारिभ्यः पादं व्याख्यान कौशलात्" इति ॥१३॥

ज्ञानादयो द्वादश यस्य रूपमन्यानि चाङ्गानि तथा बलं च ।
आचार्ययोगे फलतीति प्राहु (चाहु) र्ब्रह्मार्थयोगेन च
ब्रह्मचर्यम् ॥१४॥

पूर्वोक्तज्ञानादीनां आचार्ययोगेऽतिशयफलदत्वमाह—**ज्ञानादय** इति । **यस्याधिकारिणो ज्ञानादयो रूपं आचार्ययोगे** आचार्यसन्निधाने **फलतीति** प्राज्ञाः धर्माः भवन्तीति यस्य ते

ज्ञानादयो द्वादश, तथाऽन्यानि "षड्विधस्त्यागः" "सत्यं न्यून
मिति श्लोकोक्तानि च, तथा बलं मीमांसोक्त युक्तिबलं
इत्येतत्सर्वं प्राहुर्ब्रह्मचर्यं । ब्रह्मार्थयोगेन परब्रह्मरूपार्थस्य भक्ति
लक्षणोपायेन फलति ॥१४॥

एवं वसन्तद्यदुपप्लवेद्धनमाचार्यया प्राप्तमित्येव मन्येत्
(द्धनमाचार्याय वै तदनुयच्छेत्) ।
सतां वृत्तिं बहुगुणामेवमेति गुरोः पुत्रे भवति च
वृत्तिरेषा ॥१५॥

वसन्नित्यत्र । एवं गुरुकुले वसन्, यद्धनमुपप्लवेत् प्राप्नो
तदाचार्यया आ सम्यक् चर्यया प्राप्तमित्येव मन्येत्, परन्
यद्धनसंचयादिकं अहं करोमीति न मन्येत, न मन्येतेत्यर्थः
"आचार्याय वै तदनुयच्छे"दिति पाठः स्पष्टार्थः । शिष्टं स्पष्टं ॥१५

एवं वसन्सर्वतो वर्धतीह (बृहत्पु) बहून्पुत्रान् लभते च
प्रतिष्ठाम्
वर्षन्तिचास्मै प्रदिशो दिशश्च सन्त्यस्मिन्ब्रह्मचर्ये जनाश्च ॥१६॥

एवमायासेनानुतिष्ठता गुरुसेवायाः फलमाह--एवं वसन्निति ॥१६॥

एतेनब्रह्मचर्येण देवा देवत्वमाप्नुवन् ।
ऋषयश्च महाभागाः ब्रह्मचर्येणचाभवन् ॥१७॥

न केवलमेतावत्किन्तु देवत्वादिकमपीत्याह— एतेनेति
ऋषयश्च ब्रह्मचर्येण महाभागा अभवन्निति योजना ॥१७॥

एतेनैव सुगन्धर्वा रूपमप्सरसोऽजयन् ।
एतेन ब्रह्मचर्येण सूर्यस्त्वन्हाय जायते ॥१८॥

अजयन् "जि प्राप्ता"विति धातोः प्राप्नुवन्नित्यर्थः । यद्वा **रूपमन्येषां सौन्दर्यमजयन्** अभ्यभावयन्नित्यर्थः । **अन्हाय** जगतां द्योतनाय । "अह्नो दीप्तिश्च कथ्यथ" इत्युक्तेः ॥१८॥

अत्याशयेत्पाययेच्चापि राजन्सर्वं शरीरं तपसा तप्यमानः ।
एतेनासौ बाल्यमत्येति विद्वान्मृत्युं तथा रोदयत्यन्तकाले ॥१९॥

किंच **तपसा** ब्रह्मचर्याख्येन **तप्यमानः** पुमान् **सर्वं शरीरं** जीवजातं "यस्यात्मा शरीर"मिति श्रुतेः, **अत्याशयेत्** अतिशयेन भोजयेत् **पाययेच्च । बाल्यं** मौर्ख्यं ॥१९॥

आकाङ्क्षार्थस्य संयोगाद्रसभेदार्थिनामिव ।
एवं ह्येतत्समाज्ञाय तादृग्भावं गता इमे ॥२०॥

एकस्य ब्रह्मचर्यस्यानेकफलत्वं दृष्टान्तप्रदर्शनेनोपपादयति—**आकाङ्क्षार्थस्येति रसभेदाः** रसाः श्रेष्ठाः, तद्भेदाः तद्विशेषाः पारिजातादयः **आकाङ्क्षार्थस्य संयोगात्** आकाङ्क्षारूपो योर्थः तस्य संयोगात् सम्बन्धात् तमर्थं प्रयच्छंति । **एवमेतत्** ब्रह्मचर्यमपीति । **समाज्ञाय** सम्यक्ज्ञात्वा **इमे** देवादयः **तादृग्भावं** देवत्वादिकं **गताः** प्राप्ताः ॥२०॥

अन्तवन्तः क्षत्रिय ते जयन्ति लोकान्जनाः कर्मणा निर्मलेन ।
ज्ञानेन विद्वांस्तेज अभ्येति नित्यं न विद्यते ह्यन्यथा तस्य पन्थाः ॥२१॥

न केवलं ब्रह्मचर्यस्योक्तफलप्रदत्वं, किन्तु ज्ञानद्वारा मोक्षहे त्वमित्यभिप्रेत्यापरोक्षज्ञानस्यैव मोक्षहेतुत्वं, न कर्मण इत्याह— **अन्तवन्त** इति। अन्तो निर्णयः, "उभयोरपि दृष्टोऽन्त" इत्युक्तेः **क्षत्रिय !** कर्मस्वरूपनिर्णयवन्तो **जनाः निर्मलेन कर्मणा लोका** स्वर्गादीन् **जयन्ति** प्राप्नुवन्ति। "अन्तवत" इति पाठे–अन्तवा लोकानित्यर्थः। **विद्वान् ज्ञानेना**परोक्षेण **नित्यं तेजः** तेजः स्वरू ब्रह्मा**भ्येति** प्राप्नोति। **तस्य** ब्रह्मप्राप्तिलक्षणस्य मोक्षस्य **अन्यथ पन्थाः** ज्ञानं विना अन्यो मार्गो **न विद्यते** नास्तीति ॥२१॥

धृतराष्ट्र उवाच—

आभाति शुक्लमिव लोहितमिवाथो। कृष्णमथार्जुनं
काद्रवं वा।
यद्ब्राह्मणः पश्यति तद्धि विद्वान् कथं रूपं
तदमृतमक्षरं परम् ॥२२॥

एवं ब्रह्मचर्यस्वरूपं ज्ञात्वा, धृतराष्ट्रः तत्प्राप्यं ब्रह्म कीदृश मिति पृच्छति—**आभातीति**। **विद्वान् ब्राह्मणः यत्** ब्रह्म **पश्यति तद्ब्रह्म शुक्लमिवाभाति** शुक्लपटादिकमिव पटादिरूपसदृशरूपोपे आभाति किं ?। एवमुत्तरत्रापि योजना। किंच तद्ब्रह्म **कथं रूपं** कीदृशधर्मोपेतं ? तत्सर्वं ब्रूहीति शेषः। "तद्ब्राह्मणः पश्यति यत्र विद्वा"निति पाठे—यत्रेत्यस्य कुत्रेत्यर्थः। **"अस्तं यत्र च गच्छति"** **"धारणा यत्र सम्मता"** इत्यत्रेव। तथाचायमधिकरणप्रश्नः ॥२२॥

सनत्सुजात उवाच--

नाभाति शुक्लमिव लोहितमिवाथो कृष्णमायसमर्कवर्णं ।
न पृथिव्यां तिष्टति नांतरिक्षे नैतत्समुद्रे सलिलं बिभर्ति ॥२३॥

तस्याप्राकृतरूपवत्वेन न मानुषादिरूपवत्तं इत्यभिप्रेत्योत्तरमाह--**नाभाति** ॥ 'तदक्षरं कथं रूप'मिति प्रश्नस्योत्तरमाह--**न पृथिव्यामित्यादिना** । स्वतंत्रत्वेनान्याधारानपेक्षत्वान्न **पृथिव्यादिषु तिष्टति** । यत्**समुद्रे** विद्यमानं **सलिलं** एनं **बिभर्ति** ॥२३॥

न तारकासु न च विद्युदाश्रितं न चाभ्रेषु दृश्यते रूपमस्य ।
न चापि वायौ न च देवतासु नैतच्चन्द्रे दृश्यते नोत सूर्ये ॥२४॥

न तारकास्विति स्पष्टोर्थः ॥२४॥

नैवर्क्षु तद्दृश्यते तद्यजुःषु न चाप्यथर्वस्वमलेषु सामसु ।
रथन्तरे बृहद्रथे वाऽपि राजन्महाव्रतस्यात्मनि दृश्यतेऽपि
तत् ॥२५॥

एवं तस्य पृथिव्याद्यनाश्रितत्वमभिधाय ऋगादिप्रमाणावेद्यत्वमप्याह--**नैवर्क्ष्विति** । ऋक्षु ऋग्वेदेषु **नैव दृश्य**मित्यादियोजना । "**रथंतरे बृहद्रथे**" इति सामप्रभेदौ ॥ नन्वेवं तस्यावेद्यत्वाच्छून्यत्वमेवेत्यत आह--**महाव्रतस्येति** महाव्रतस्य पूर्वोक्तज्ञानादि महाव्रतस्य अत्मनि मनसि तद्ब्रह्म **दृश्यते** । अनेन पूर्वोक्तगुणहीनेन ऋगाद्यवेद्यत्वेपि गुणवत्तायोग्यतानुसारेणऋगादिवेद्यत्वान्नशून्यत्वमित्युक्तंभवति ॥२५॥

अवारणीय तमसः परस्तात्तदन्तकोऽन्वेति (अन्ततोऽभ्येति)
विनाशकाले ।
अणीयरूपं च तथाप्यणीयसां महत्स्वरूपं त्वपि
पर्वतेभ्यः ॥२६॥

तमसः प्रकृतेः, अज्ञानाच्च **परस्तात्**, तदुभयास्पष्टं **अन्तकः** अन्ते पृथिव्यादितत्वानामवसाने, विद्यमानः कः महत्तत्वाभिमानी ब्रह्म **विनाशकाले तद्ब्रह्म अन्वेति** प्रविशति । "तदन्ततोऽभ्येती"ति पाठे—जगदिति शेषः॥ **अणीयसामप्यणीयरूपं,** सूक्ष्मतरमित्यर्थः; **तथा पर्वतेभ्योपि महत्स्वरूपं** ॥२६॥

सा प्रतिष्ठा तदमृतं लोकास्तद्ब्रह्म तद्यशः ।
भूतानि जज्ञिरे तस्मिन्प्रलयं यान्ति तत्र च ॥२७॥

प्रतितिष्ठत्यस्मिन्निति **प्रतिष्ठा, तद्ब्रह्मामृतं** नाशशून्यं, **तल्लोकाः** सर्वलोकनियामकं, **तद्यशः** यशोरूपं, **तस्मिन्**भगवति **भूतानि जज्ञिरे** सृष्टिकाले इति शेषः, **तत्र च** तत्रैव **प्रलयं यान्ति** ॥२७॥

तदेतदह्ना संस्थितं भाति सर्वं तदात्मवित्पश्यति
ज्ञानयोगात् ।
तस्मिञ्जगत्सर्वमिदं प्रतिष्ठितं य एतद्विदुरमृतास्ते
भवन्ति ॥२८॥

इति श्रीमन्महाभरते उद्योगपर्वणि
सनत्सुजातीये चतुर्थोऽध्यायः ॥

तदेतदिति यदह्वा दिवसेन निमित्तेन **भाति, तदेतत्सर्वं** तस्मिन् **संस्थितं** प्रतिष्ठितं। न केवलमह्वाप्रकाश्यमेत**ज्जगत्तास्मि**न्स्थितं किन्तु **इदं** प्रमाणप्रमितं **सर्वं जगत्तास्मिन्संस्थितं** यद्वा भगवतः मूलाश्रयत्वं विशेषणद्वयेनोच्यत इति न पौनरुक्त्यं। **सदायतनाः सत्प्रतिष्टा इत्यत्रेव ज्ञातव्यम्** ॥२८॥

इति श्रीमन्महाभारते उद्योगपर्वणि सनत्सुजातीये
विषमवाक्यप्रकाशे चतुर्थोऽध्यायः ॥
॥ श्रीकृष्णार्पणमस्तु ॥

शोकः क्रोधश्च लोभश्च कामो मोहः परासुता ।
ईर्ष्या मानो विचिकित्सा च कृपा स्तेया जुगुप्सुता ॥१

पूर्वोक्तानां क्रोधादीनां न केवलं तपोविरोधित्वं किन्त्वैहिक
निष्टसंपादकत्वमपीति दर्शयन् तपसः समृद्धत्वासमृद्धत्वे प्रतिपादयत्यने
नाध्यायेन-तत्र क्रोधादीनां ऐहिकानिष्टसंपादकत्वमाह **शोकइत्यादिना**
परासुता पर प्राज्ञनाम्नि **असुः** प्राणो यस्य सः परासुः तस्यभाव
परासुता निद्रेति यावत् इयं च पूर्वमोहशब्देनैव गृहीता । मोह
शब्दस्य मिथ्या—ज्ञानस्यैव कृत्याकृत्यराहित्यस्यापि वाचकत्वात्
स्पृहा च कामविशेषत्वेन कामपदेनात्रसंगृहीतेतिज्ञेयं । अन्य
प्रागेव व्याख्यातं ॥

द्वादशैते मोहदोषाः मनुष्यप्राणनाशकाः ।
एकैकशस्तु राजेन्द्र मनुष्यं पर्युपासते ॥२॥

न क्रोधादिसमुदायस्य प्राणापहारित्वं, किन्तु प्रत्येकमित्याह-
एकैकशमिति । हे राजन् ! एते यं मनुष्यं पर्युपासते तस्
एकैकशः प्रत्येकं प्रत्येकं प्राप्य **प्राणनाशनं** । शोकक्रोधाभ्या
अग्निप्रवेशादिना प्राणनाशो दृष्टः । लोभेन दुर्गमदेशगमनादिना
कामेन परस्त्रीगमनादिना एवं सर्वत्र द्रष्टव्यं ॥२॥

यैराविष्टो नरः पापं मूढसंज्ञो व्यवस्यति ॥३॥

पापहेतुत्वमपि एषामाह—**यैराविष्ट** इति । **व्यवस्यति**
करोति ॥३॥

स्पृहयालुरुग्रः परुषो वदान्यो बिभ्रत्कोपं मनसा यो विकत्थी ।
नृशंसधर्माः षडिमे जना वै प्राप्यार्थं नोत सभाजयन्ते ॥४॥

पूर्वोक्तानां नृशंसानामप्यैहिकविरोधित्वमाह— **स्पृहयालु-रिति** । प्रागुक्तचपल शब्दस्य अर्थानुवादः **उग्र** इति । पूर्वोक्त **मनस्वी** शब्दस्यअर्थानुवादः **वदान्य** इति । **परुष** शब्दस्य । **मनसा कोपं** बिभ्रदित्यन्वयः । विकत्थमान इत्यस्य **विकत्थी**ति । **एते षड्जनाः नृशंसधर्माः** स्युः नृशंसास्य धर्मो येषां ते नृशंसधर्माः ॥४॥

सम्भोगसंविद्विषमोऽभिमानी दत्वा विकत्थी कृपणोऽबलीयान् ।
वर्गप्रशंसी वनितावमानी सप्तैवोक्ताः पापशीला नृशंसाः ॥५॥

एवं नृशंसषड्वर्गमभिधाय सप्तनृशंसानाह—**संभोगेति** । "विषमेधाना" इत्यस्यार्थो **विषम** इति । **अभिमानी, दत्वा विकत्थी**त्यनेन दत्तानुतापित्वमुक्तं भवति । अन्यद्व्याख्यातं प्राक् ॥५॥

धर्मश्च सत्यं च तपो दमश्च अमात्सर्यं ह्रीस्तितिक्षानसूया ।
दानं श्रुतिश्चैव धृतिः क्षमा च महाव्रता द्वादश ब्राह्मणस्य ॥६॥

पूर्वोक्तानां गुणानां न केवलं तपोवृद्धिसम्पादकत्वं, किन्तु मोक्षादिपुरुषार्थहेतुत्वमपीत्याह—**धर्मश्चेत्यादि** । अत एव क्वचिद-न्यथोक्तिर्न दोषाय । **अत्र क्षमा**शब्देन शमो लक्ष्यते ॥६॥

य एतेभ्यः प्रच्यवेद्वादशभ्यः सर्वामिमां पृथिवीं स प्रशिष्यात्
त्रिभिर्द्वाभ्यामेकतमेन वापि नास्य स्वमस्तीति च वेदितव्यम् ।।७।।

एतान्गुणांस्तौति—**य एतेभ्य इति** । तादर्थ्ये चतुर्थी **प्रच्यवेत्**, स्वस्थानादिति शेषः, गुरुकुले निवसेदिति यावत् "त्रिभिरि"त्यादितृतीया चतुर्थ्यर्थे । तथा च—गुणत्रयप्राप्त्यर्थं गुणद्वयप्राप्त्यर्थं, एकगुणप्राप्त्यर्थं वा **यः प्रच्यवेत् सः सर्वां पृथिवीं विशिष्यात्** यद्वा—**यः त्रिभिः द्वाभ्यामेकतमेन वा** युक्त **अस्येदं स्वं** स्वकीयमिति **वेदितव्यं नास्तीति** योजना ॥ 'सर्वमीश्वराधीनं, मदधीनं न किञ्चिदि'ति जानातीति तात्पर्यार्थः ॥७

दमस्त्यागोऽप्रमादश्च एतेष्वमृतमास्थितम् ।
एतानि ब्रह्ममुख्यानां ब्राह्मणानां मनीषिणां ॥८॥

दमादिस्वरूपं वक्तुं तान्स्तौति—**दम इति** । व्याख्यातमेतत् **ब्रह्ममुख्यानां** ब्रह्म वेदः, परब्रह्म वा, तदेव मुख्यं येषां **मनीषिण** **एतानि** भवन्तीति शेषः ॥८॥

सद्वाऽसद्वा परीवादो[1] ब्राह्मणस्य न शस्यते ।
नरकप्रतिष्ठास्ते वै स्युर्य एवं कुर्वते सदा ॥९॥

प्रसङ्गाद्ब्राह्मणनिन्दा अनिष्टहेतुरित्याह—**सद्वेति** । लिङ्ग व्यत्यासः पौराणिकत्वात् ॥९॥

---

१ परदोषकीर्तनं

दमोऽष्टादशदोषः स्यात्पुरा योऽत्र प्रकीर्तितः ।
लोकद्वेषः प्रातिकूल्यं अभ्यसूया मृषा वचः ॥१०॥

'दमोष्टादशदोषःस्या'दित्युक्तदमदोषानाह—**लोकद्वेष** इत्यादिना **अभ्यसूया** परश्रियामसहिष्णुता ॥१०॥

कामक्रोधौ परादैन्यं परिवादोऽथ पैशुनम् ।
अर्थहानिर्विवित्सा च मात्सर्यं प्राणिपीडनम् ॥११॥

परादैन्यं परस्मिन्स्वोत्तमे अदैन्यं 'स्वामी, अहं भृत्य' इति वचनाद्यभावः । **अर्थहानिः** प्रयोजनानुसन्धानशून्यत्वं । **मात्सर्यं** स्वोत्तमगुणप्रद्वेषः ॥११॥

ईर्ष्या मोहो विवादश्च संज्ञानाशोऽभ्यसूयता ।
तस्मात्प्राज्ञो न माद्येत सदा ह्येतद्धि गर्हितम् ॥१२॥

ईर्ष्या परगुणापलापः । **अभ्यसूयता** गुणेषु दोषत्वारोपः । **संज्ञानाशः** अधीतसच्छास्त्रविस्मरणं । अन्यद्व्याख्यातं पूर्वाध्याये । यस्मादेतदुक्तदोषजातं **विगर्हितं तस्मात्प्राज्ञो न माद्येत** उक्तदोषाधीनो न भवेत् ॥१२॥

सौहृदे वै षड्गुणा वेदितव्याः प्रिये हृष्यन्त्यप्रिये च व्यथन्ते ।
स्यादात्मनः सुहितं याचते यो ददात्ययाच्यमपि देयं खलु
स्यात् ॥१३॥

प्रसङ्गात्सौहृदगुणानाह—**सौहृद** इति । तस्य **प्रिये** सति **हृष्यन्ति, अप्रिये** सति **व्यथन्ते** ते सुहृद इति शेषः । **आत्मनः**

स्वस्य यत् **सुहितं** सुष्ठु हितं, यच्चायाच्यं याचितुमयोग्यमपि स्याच्
दपि **याचते** याच्यमानाय **यो ददाति,** यदि तद्वस्तु **देयं** द
शक्यं खलु निश्चितं स्यात्, सोपि सुहृदिति शेषः ॥१३॥

इष्टान्पुत्रान्विभवांश्चापि दारानभ्यार्चितश्चार्हता शुद्धभावः ।
त्यक्तद्रव्यः संवसेन्नेव [संवसेन्नेह] कामान्भुंक्ते कर्म
स्वाशिषं बाधते च ॥१४॥

एवमुत्तरत्रापि तदेव विवृणोति—**इष्टानिति** । योऽर्ह
योग्येन **अभ्यार्चितो** याचितः सन् **शुद्धभावः** मनःसंतोषपू
इष्टानपि विभवान् अर्थसञ्चयान् **दारान् पुत्रादीन्ददाति** अ
तृतीयो गुणः यश्च **त्यक्तद्रव्यः** अयाचितोपि तदभिप्रायं ज्ञा
त्यक्तद्रव्यः सन्, विषयाननादृत्येति शेषः । **न संवसेत्** न वसे
अयं चतुर्थो गुणः, यच्च **कर्म** तदीयकर्मसाध्यमन्नादिकं च स
भुङ्क्ते, तन्निमित्तं **स्वाशिषं** स्वमनोरथं **बाधते च** ॥ स
सौहृदशब्देन मित्रत्वहेतुरूपस्त्यागो लक्ष्यते । तत्र 'प्रिये हृष्य
त्यादयः षड्गुणाः वेदितव्याः । [संवसेन्नेह] कामानि'ति प
अयाचितोपि ब्राह्मणेभ्यो द्रव्यत्यागं कुर्वन् **इह** कर्मणि क्रियम
कामान् विषयान् **न संवसेत्** नोपभुञ्जीत, तथा **कर्म** प्राक्सञ्चि
कर्मफलं ईश्वरेच्छया प्राप्तं **भुङ्क्ते, स्वाशिषं** स्वार्थं आशंसम
बाधतेत्यर्थः ॥१४॥

द्रव्यवान्गुणवानेव त्यगी भवति सात्विकः ।
पञ्चभूतानि पञ्चभ्यो निवर्तयति तादृशः ॥१५॥

उक्तत्यागे कारणमाह—द्रव्यवानिति। यो **द्रव्यवान्** यश्च **गुणवान्** यश्च **सात्विकः** स एव **त्यागी** **भवतीति** योजना॥ त्यागस्य फलमाह—पञ्चभूतानीति। पञ्चेन्द्रियाणि, इन्द्रियाणां भूतजातत्वात्। **तादृशः** उक्तत्यागी **पञ्चभूतानि पञ्चभ्यो** विषयेभ्यो **निवर्तयती**त्यर्थः॥१५॥

एतत्समृद्धमप्यृद्धं ततो भवति केवलम्।
सत्यात्प्रच्यवमानानां सङ्कल्पेन समाहितं॥१६॥

तपो यज्ञाः प्रवर्तन्ते सत्यस्यैवावबोधनात्।
मनसान्यस्य भवति वाचान्यस्योत कर्मणा॥१७॥

एवं तपसो ऋद्धत्वसमृद्धत्वयोः साधारणं केवलत्वं विस्तरेणाभिधायेदानीं समृद्धत्वे साधारणं कारणमाह—एतत्समृद्धमिति। **केवलमपि एतत्तपः सत्यस्य** मुक्तामुक्तनियामकस्य भगवतोऽव**बोधनात् समृद्ध**मनन्तफलदं **भवति**। न केवलं तपः, किन्तु **यज्ञास्तत** एव **प्रवर्तन्ते** प्रकर्षेण फलदा भवन्ति, "यदेव विद्यया करोती"ति श्रुतेः॥ अवधारणव्यावर्त्यमाह—**सत्यादिति**। **सत्यात्** भगवतः **प्रच्यवमानानां,** तज्ज्ञानशून्यानामिति यावत्, साकल्येन फलं **सङ्कल्पेन समाहितं** अनुष्ठितं, असमृद्धं भवतीति शेषः॥ यद्यप्यनेवंवित् महत्पुण्यं करोति, "तद्धास्यांततः क्षीयत" इति श्रुतेः मनोवाक्कर्मणामेकविषयत्वमपि तपसः सिद्ध्यादिकारणमिति भावेन दुरात्मस्वभावमाह—**मनसेति** दुरात्मा **मनसा**-

न्यस्य व्यापरस्य वाचान्यस्य वा, कर्मणा च ततोऽन्यस्य क
भवति ॥ १६-१७ ॥

सङ्कल्पसिद्धः पुरुषः सङ्कल्पादधितिष्ठति (सङ्कल्पसिद्धं
पुरुषमसङ्कल्पोऽधितिष्ठति)।
ब्राह्मणस्याविशेषेण किंचान्यदपि मे श्रुणु ॥१८॥

सङ्कल्पसिद्ध इति। संकल्पः सं समीचीनः कल्पः पक्ष
मनोवाक्कर्मणामेकविषयत्वलक्षणः, सिद्धः सिद्धांतो यस्य सः त
तादृशः पुरुषः सङ्कल्पात् मनोवाक्कर्मणामेकविषयत्वात् अधितिष्ठ
अधिकृत्वेनवर्तते; अतः सता तत्संपाद्यमिति भावः ॥ 'सङ्कल्पसि
पुरुषमसंकल्पोऽधितिष्ठती'ति पाठे—असङ्कल्पः मनोवाक्कर्म
समीचीनैकपक्षरहितः दुरात्मा सङ्कल्पसिद्धं वागादिना समीचीनै
पक्षेणसिद्धप्रयोजनं पुरुषं अधितिष्ठति अधिकतया तिष्ठ
ततोप्यहमेव कुशल इति मन्यत इति भावः। एतादृशस्य स
स्वभावत्वात्सता मनोवाक्कर्मणामेकविषयत्वं संपाद्यमिति भावः
एतच्च ब्राह्मणस्यावश्यकमित्याह—ब्राह्मणस्येति ॥ तस्यैव कर्तव्यान्त
माह—किंचेति ॥१८॥

अध्यापयेन्महदेतद्यशस्यं वाचो विकारं कवयो वदन्ति।
अस्मिन्योगे सर्वमिदं प्रतिष्ठितं य एतद्विदुरमृतास्ते भवन्ति॥१९

प्रतिज्ञातमाह—अध्यापयेदिति। यत महत् अनन्तगुणप
यशस्यं यशः संपादकं यच्च कवयो वाचोविकारं वाचां वेदवा

विकारं विविधाकारं उक्तं **कवयो वदन्ति, तदेतत्** ब्रह्म **अध्याप-येत्** शिष्यान् प्रत्युपदिशेत् ॥ तस्यैवोपदेशे निमित्तमाह—**अस्मिन्निति** । **योगे** युज्यते सर्वैर्गुणैरिति **योगः** भगवान् तस्मिन् **अस्मिन् सर्वं इदं** जगत्**प्रतिष्ठितं** स्थितं । **य एतद्ब्रह्म विदुः ते अमृता भवन्ति** । तस्मादेतस्याध्ययनविषयत्वमावश्यकमिति भावः ॥१९॥

न कर्मणा सुकृतेनैव राजन्सत्यं वदेज्जुहुयाद्वा जपेद्वा ।
तेनैव बालो मृत्युमत्येति राजन् तरतिचासौ न
लभेतान्तकाले ॥२०॥

नन्व"पामसोम"मित्यादिना कर्मणैव मोक्षाभिधाना"द्य एत-द्विदुरि"त्यनुपपन्नमित्यत आह— **न कर्मणेति** । **सुकृतेन** सम्यगनुष्ठि-तेन **कर्मणैव मृत्युं** मिथ्याज्ञानं, "मोहो मृत्यु"रिति प्रथमे आध्याये अभिधानात्, **नात्येति,** मिथ्याज्ञानस्य ज्ञानैकनाश्यत्वादिति भावः । तथा च तन्मूलकस्य संसारस्य निवृत्तिः कर्मसाध्या नेति ज्ञानमावश्यक-मिति भावः ॥ एतदेव विवृणोति— **सत्यमित्यादिना बालो**ऽनपरो-क्षज्ञानी यत् **सत्यं वदेत्, जुहुयाद्वा जपेद्वा तेनैव मृत्युं नात्येति** ॥ अन्तकाल इति । उत्क्रमणसाध्यं सुखमपि **न लभेत,** तस्यापरोक्ष-ज्ञानसाध्यत्वादिति भावः ॥२०॥

तूष्णीमेकमुपासीत न गच्छेन्मनसापि च ।
अथ संस्तुतिनिन्दाभ्यां प्रीतिरोषौ विवर्जयेत् ॥२१॥

अत्रैव तिष्ठन्क्षत्रिय ब्रह्माऽऽवसति पश्यति ।
वेदेषु चानुपूर्वेण विद्वानेतद्ब्रवीमि ते ॥२२॥

इति श्रीमन्महाभारते उद्योगपर्वणि
सनत्सुजातीये पञ्चमोध्यायः ॥

भगवदपरोक्षज्ञानसाधनमाह---**तूष्णीमिति एकं** स्वगतभेद रहितं, स्वसमानद्वितीयरहितं वा ब्रह्म **तूष्णीं** वाङ्नियमादु**पासीत** उपासनकाले **मनसापि** विषयान्**नैच्छेत् च ॥** इत्थं भावान्तरमाह—अथेति ॥२१॥

उक्तोपासनाफलमाह---**अत्रैवेति ।** हे **क्षत्रिय ! अत्रो**पासनायां **तिष्ठन्नेव ब्रह्म पश्यति,** भगवदपरोक्षज्ञानानन्तरं **आवस**ति सम्यग्वैकुण्ठादिलोके वसति । स्वोक्तस्य निर्मूलशङ्कामपाकुर्वन्नाह--वेदेष्विति । **वेदेषु** कथितमिदं सर्व**मानुपूर्वेण** त्वदीयप्रश्नक्रमानुसारे **अहं ते ब्रवीमि** अब्रुवमिति ॥२२॥

इति श्रीमन्महाभारते उद्योगपर्वणि सनत्सुजातीये
विषमवाक्यप्रकाशे पञ्चमोऽध्यायः ॥

षष्ठाध्यायः

हरिः ॐ ॥ सनत्सुजात उवाच—

यत्तच्छुक्रं महज्ज्योतिर्दीप्यमानं महद्यशः ।
तद्वै देवा उपासन्ते तस्मात्सूर्यो विराजते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥१॥

॥ श्रीः ॥

॥ अथ षष्ठाध्यायटीका ॥

ॐ ॥ पूर्वाध्याये "य एतद्विदुरमृतास्ते भवन्ती" ति ब्रह्मज्ञानेन मोक्षो भवतीत्यभिहितं तत्र कीदृशं ब्रह्मस्वरूपं, केषां च तज्ज्ञानं भवतीति जिज्ञासायां तदुभयं निरूपयत्यस्मिन्नध्याये ॥

तत्रादौ सर्वप्रकाशकत्वदेवोपास्यत्वादिमहिमानं वदन् तज्ज्ञाने अधिकारिण आह—यदिति । **यत्** व्याप्तं **शुक्रं** शुद्धं **महज्ज्योतिः** सर्वप्रकाशकं **दीप्यमानं** प्रकाशमानं **महद्यशः** पूर्णं, **यस्माच्चार्को विराजते तद्वै** ब्रह्म **देवाः** ब्रह्माद्याः **उपासन्ते । वा** इत्यनेन "विश्वेदेवा उपासत" इत्यादिश्रुतिप्रसिद्धं दर्शयति । तं पूर्वोक्तगुण-विशिष्टं ब्रह्म **योगिनः** ध्यानादियोगसम्पन्नाः **प्रपश्यन्ति** प्रकर्षेण जानन्ति ॥१॥

शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्द्धते ।
तच्छुक्रं ज्योतिषां मध्येऽतप्तं तपति तापनं ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥२॥

इदानीं भगवतः चतुर्मुखोत्पादकत्वमाह—शुक्रादिति । यस्म
च्छुक्रात् चतुर्मुखाख्यं ब्रह्म प्रभवति उत्पद्यते, उत्पन्नं च शुक्रे
वर्धते 'यो ब्राह्मण'मिति श्रुतेः, तच्छुक्रं ज्योतिषां मध्ये स्थितं
तैरतप्तं अप्रकाशितं तपति प्रकाशते । कीदृशं ? तेषां ज्योति
तापनं । प्रकाशकं ॥२॥

पूर्णात्पूर्णमुद्धरन्ति पूर्णात्पूर्णं प्रचक्षते ।
हरन्ति पूर्णात्पूर्णं च पूर्णमेवावशिष्यते ॥
योगिन स्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥३॥

योगिनः महिमान्तरमाह—पूर्णादिति । **पूर्णात्** गुणपूर्णा
मूलरूपात् **पूर्णं** अवताररूपं **उद्धरन्ति** स्वकीयप्रयोजनार्थं देवाद्य
पृथक्कुर्वन्ति । **पूर्णात् पूर्णं हरन्ति । च** भूम्यादिलोकं प्रत्यानयन्ति
श्वेतद्वीपादिकं प्रति गत्वा अनेकविधैस्स्तोत्रैस्तं प्रसाद्य स्वप्रयोजन
निष्पत्त्यर्थं पूर्णमेव स्थितं रामादिरूपं मूलरूपात्पृथक्कृत्वा भूरादिलो
मानयन्तीति यावत् । प्रलयकाले च सर्वाणि रूपाणि एकीकृ
पूर्णमेवावशिष्यते ॥ उक्तार्थे किं प्रमाणमित्यपेक्षायमाह पूर्णात्पूर्ण
मिति ॥ वेदाः उक्तमर्थं **प्रचक्षते** सतात्पर्यं कथयन्ति । अने
"पूर्णमदः पूर्णमिदं"मिति श्रुतिरुक्तार्थे प्रमाणमित्युक्तं भवति ॥३

आपोऽथाद्भ्यस्तत्सलिलस्य मध्ये उभे देव्यौ (अपोऽथाद्भ
सलिलं तस्य मध्ये उभौ देवौ) शिश्रियातेऽन्तरिक्षे ।
स सध्रीचीः स विषूचीर्वर्तमाना उभे (आदध्रीचीः सविषूचीर्
सानावुभौ) बिभर्ति पृथिवीं दिवं च ॥ योगिन' ॥४

श्रीभूरूपधारकत्वादिमहिमानमाह—**आप** इति । **अथ सूक्ष्म-**सृष्टयनन्तरं **अद्भ्यः** बाह्यावरणोदकेभ्यः **आपः** ब्रह्माण्डान्तः स्थित-गर्भोदकरूपाः, उत्पन्ना इति शेषः । **तस्य सलिलस्यमध्ये अन्तरिक्षे** अवकाशे **उभेदेव्यौ** श्रीभूदेव्यौ **शिश्रियाते । सध्रीचीः** समीचीनाः **सविषूचीः** विष्वक् वर्तमानाः आपः **बसानः** वस्त्रव (वसनव) त्परितो बिभ्राणः ॥ यद्वा—**सध्रीचीः** पूर्वादिदिशः **विषूचीः** आग्नेयादिविदिशः, द्वितीया सप्तम्यर्थे, तासु **वसानो** निवसन् इत्यर्थः । उक्तं च ऐतरेयभाष्ये—सचासु पूर्वा दिदिक्ष्वेतौ च चतुर्ष्वपि नित्यदा वसतः । कोणदिक्ष्वप्यासु विषूचिषु" इति । **स** वेदादिषु प्रसिद्धः **स** परमात्मा **पृथिवीं** तदभिमानिनीं भूदेवीं **दिवं** द्योतमानां श्रीदेवीं **चेत्युभे बिभर्ति** धारयति पोषयति च ॥ "आपोऽथाद्भ्यः सलिलं तस्य मध्ये उभौ देवौ शिश्रियातेऽन्तरिक्षे । आदध्रीचीः सविषूचीर्वसानावुभौ बिभर्ती— " त्यादि] पाठान्तरे तु—**अथ** महदादिसृष्टयनन्तरं **आपः** तदुपलक्षितपञ्चमहाभूतानि, सृष्टाः इति शेषः । **अद्भ्यः** पञ्चभूतेभ्यः **सलिलं** पञ्चभूतात्मकं स्थूलदेह-मुत्पाद्य **तस्य** सलिलस्य **मध्ये अन्तरिक्षे** हृदयाकाशे **उभौ देवौ** नारायणमुख्यप्राणौ **शिश्रियाते** ॥ न केवलं शरीराकाश एवोभयोरव-स्थानं, अपितु सर्वत्रेति भावेन तयोर्विशेषमाह—**आदध्रीचीरिति । सविषूचीः** विष्वग्गमनात् विषूच्यो विदिशस्ताभिः सह वर्तन्त इति सविषूच्यः, ताः सविषूचीः **आदध्रीची** आभिमुख्येनध्रीयमाणाः, अवस्थिता इति यावत्, अञ्चन्तीति लयमिति आदध्रीच्यस्ताः आदध्रीचीः, आग्नेयादिविदिक्सहिताः प्राच्यादिदिश इति यावत्,

वसानौ अच्छादयन्तौ । नारायणमुख्यप्राणौ **उभौ पृथिवीं दिवं बिभर्ति** बिभ्रतः । वचनव्यत्यासः छान्दसः अस्मिन्नर्थे प्रागुदाह वचनमेव प्रमाणं ॥४॥

चक्रेणावर्त्य तिष्ठन्तं ध्रुवस्याव्ययकमर्णः ।
केतुमन्तं वहन्त्यश्वाः तं दिव्यमजरं दिवि ॥ योगिनस्तं०॥५

चक्रेणेति अव्ययकर्मणः ध्रुवस्य ध्रुवमण्डलस्य सम्बन्धि **चक्रेण** ज्योतिश्चक्रेण **आवर्त्य** ग्रहनक्षत्रादीन्परितो भ्रामयित **तिष्ठन्तं,** सूर्यस्य रथ इति शेषः, **केतुमन्तं** ध्वजसहितं **तं** भगव **अश्वाः** सूर्यरथेनियुक्ताः सप्ताश्वाः **दिव्यं** लोकविलक्षणं **दिवि** अन्त रिक्षमार्गे **वहन्ति** ॥५॥

न संदृशे (न सादृश्ये) तिष्ठति रूपमस्य न चक्षुषा
पश्यति कश्चिदेनं ।
मनीषया यो मनसा हृदाच य एनं विदुरमृतास्ते
भवन्ति ॥ योगिनस्तं० ॥६

न सन्दृश इति । **अस्य** भगवतो **रूपं संदृशे** समीची ज्ञानाय **न तिष्टति,** साकल्येन **न** ज्ञानविषयो भवतीत्यर्थः कुत इत्यत आह—नचक्षुषेति । उपलक्षणमेतत् । **कश्चिद**प्यविक **चक्षुषा** चक्षुरादिप्रमाणै**रेनं** साकल्येन **न पश्यति** न जानाति **ये च मनीषया** शास्त्रोत्थबुद्धचा, तथा तदेकनिष्ठेन **मनसा हृ** तन्निष्ठत्वात्तत्प्रेरकत्वाच्च हृच्छब्दवाच्येन तत्प्रसादेनेति यावत् । **ए** भगवन्तं स्वयोग्यतानुसारेण **ये विदुः ते अमृताः** मुक्ताः **भवन्ति**

"न साहश्ये तिष्ठति रूपमस्ये" त्यपि क्वचित्पाठः । तत्रास्य भगवतो **रूपं साहश्येउपमायां न तिष्ठती**त्यर्थः, एतस्यान्योपमा नास्तीति यावत् । "भगवतो नीरूपत्वमुपमायोग्यत्वमुच्यत" इति श्रुतिः, ॥ ६ ॥

द्वादशपूगाः सरितो देवरक्षिता मध्वीशते ।

तदनुविधायिन्यस्तदा सदाचरन्ति घोरम् ॥ योगिनस्तं०॥७

महिमान्तरमाह—**द्वादश** पूगा इति । **द्वादशपूगाः** पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनो बुद्धिश्चेति द्वादश, तेषां पूगाः समूहाः । पुरुषाणां बहुत्वात्तत्सम्बन्धिनां समुदायानामपि बहुत्वमपेक्ष्य बहुवचनं । **सरितः** सरन्ति विषयान्प्रति गच्छन्तीति सरितः, स्वतो विषयगमनस्वभावाः **देवरक्षिताः** क्रीडादिगुणविशिष्टेन भगवता नियमिताः **मधु** आपाततो मनोहरं, विषयसमूहं प्रतिगन्तु-मिति शेषः, **ईशते** समर्था भवन्ति । यदैव ते विषयान् प्रतिगच्छन्ति **तदा तदनुविधायिन्यः सदाचरन्ति** । "लोकेस्मिन्नि"तिपाठे—या **द्वादशधाः** द्वादशप्रकाराः **तस्य** भगवतो **मदिष्ठाः** 'मदि हर्षे' इति धातोः अतिशयेन सन्तोषकराः । **याश्चेशते** सज्जनानां पापानि परिहर्तुं समर्था भवन्ति ताः **सरितो** गङ्गायमुनाद्याः नद्यः **इह लोके तदनुविधायिन्यः** तस्य समुद्रगतबडवाग्निस्थनृसिंहस्यानु-विधायिन्यो अनुसारिण्यो भूत्वा **सदा चरन्ति** प्रवहन्ति । नदीनां प्रवाहो भगवदर्थमेवेत्येतत् ॥ "आपात्पतन्तेन्यः सुदुघाः अनुप-स्पृशाः । आयः स्फुरं गृहायत्तं सोममिन्द्रय पातवे" इति श्रुत्या,

"भूतानि भूतोऽम्बुनिधानमध्ये भूत्वा हरिः सर्वहरोऽतिशान्ना
अगाधमम्भो विदधाति भस्म यो वाडवाग्निर्नृहरिर्विचिन्त्यः" इ
कर्मनिर्णयोदाहृत वैहायससंहितावचनाच्च सिद्धं ॥७॥

तदर्प्यमाणमपिबन्साश्रितं भ्रमरा मधु ।
ईशानः सर्वभूतेषु हविर्भूतमकल्पयत् ॥ योगिन०॥८

तदर्प्यमाणमपिबन्निति । **भ्रमराः** मधुपानासक्तत्वात्तत्सदृश
आदित्याः रुद्रा वसवः मरुतः साध्याश्चेति प्राच्यादिषु विद्यमान
देवाः **तदर्प्यमाणं** तेन भगवता अर्प्यमाणं **साश्रितं** स्वकर्मण
चार्जितं **मधु** आनन्दकरत्वात् मधुस्थानीयं परमात्मानं आदित्याद्य
अपिबन् उपजीवन्तिस्म। अयमर्थः छान्दोग्ये स्पष्टमभिहितः ॥ न केव
मादित्यादिदेवानामेव भगवान्मधुपर्कत्वेनोपजीव्यः किन्तु सर्वभूताना
मपीति भावेनाह—**ईशान** इति **ईशानः** सर्वभूतानां स्वामी भगवा
सर्वभूतेषु निमित्तसप्तमी **हविर्भूतं** प्राणाग्निहोत्रे हविर्द्रव्यरूपम
न्नमकल्पयत् ॥८॥

हिरण्यपर्ण (सुवर्णवर्ण) मश्वत्थमभिपद्य (सपक्षकाः)
ह्यपक्षकाः ।
तत्र ते पक्षिणो भूत्वा (प्रपतन्ति) प्रभवन्ति
यथासुखम् ॥ योगिन० ॥९॥

हिरण्यपर्णमिति । **अपक्षकाः** । अत्र पक्षशब्देनोर्ध्वलोक
गमनसाधनंज्ञानं गृह्यते । तथा च ये अपक्षकाः ज्ञानरहिताः ते
पक्षिणो भूत्वा श्रवणादिभिर्भगवदपरोक्षज्ञानिनो भूत्वा **हिरण्यपर्ण**

सुवर्णसदृशछदं । 'सुवर्ण'मिति पाठे—सुवर्णसदृशवर्णं, श्वेतद्वीपगत-**मश्वत्थमभिपद्य यथासुखं प्रभवन्ति** प्रकृष्टा भवन्ति । "सपक्षका" इति पाठे पक्षाः स्वपक्षस्थाः स्वैः सुहृन्मुक्ता इति यावत्, तैः सहिताः सपक्षकाः **ते** मुक्ताः **पक्षिणो** भूत्वा ये गच्छन्ति गमनवत्वात्तत्सदृशा भूत्वेत्यर्थः, "प्रपतन्ती" त्यपि क्वचित् पाठः, तत्र प्रकर्षेणाभिवाञ्छितं प्रदेशं गच्छन्ति ये ज्ञात्वा प्रपतन्ति तं योगिनः प्रपश्यन्ति ॥९॥

अपानं गिरति प्राणः प्राणं गिरति चन्द्रमाः ।
आदित्यो गिरते चन्द्रमादित्यं गिरते परः ॥
योगिन० ॥१०॥

"प्रभवन्ति यथासुखमि"ति अधिकारिणां मोक्षोऽभिहितः । तत्र देवानां मोक्षकाले स्वोत्तमप्रवेशप्रकारं लेशेन दर्शयति—**अपान-**मिति । अत्रावान्तर **प्राणः अपानं गिरति** संहरति । **आदित्यः** अदितेः पुत्रोऽनिरुद्धः **चन्द्रं आदित्यं** अनिरुद्धं **परः** उत्तमः कामो **गिरति ।** अनेन क्रमेण परः परमात्मा ब्रह्माणं गिरति संहरति । उक्तंचानुव्याख्याने— "सोमस्तु वारीशसुतोऽनिरुद्धं विशत्यसौ काममसौ च वारुणीम् । स शेषदेवं स गिरं च सैव वायुं विशत्यंज इतीह निर्णय" इति ॥१०॥

एकं पादं समुत्क्षिपति सलिलार्धं सउच्चरन् (एकं
पादं नोत्क्षिपति सलिलाद्धंस उच्चरन्) ।
सततमृत्विजं न मृत्युर्नाऽऽमृतं भवेत् ॥ योगिन० ॥११॥

एकमिति । सलिलार्धं सलिलं गर्भोदकं अर्धं यथा भवति तथा कृत्वा **उच्चरन्** ऊर्ध्वं चरन् स नारायणः **एकं पादं** जीवाख्यं

भिन्नांशं "पादोस्य विश्वाभूतानी"ति श्रुतेः, क्षिपति इहलो
स्थापयति । अपरं च पादं जात्यभिप्रायेणैकवचनं । स्वरूपांशत्र
समुत्क्षिपति ऊर्ध्वे वैकुण्ठादिलोकत्रये सम्यक् स्थापयति
"त्रिपादस्यामृतं दिवी"ति श्रुतेः । **ऋत्विजं** ऋत्विङ्नियाम
चतुष्पादं भगवन्तं चरन् यदि **सततं** निरन्तरं वेदान्तश्रवणादिन
अपरोक्षीकुर्यात् तर्हि तस्याधिकारिणो **मृत्युः न भवेत्** । तथाऽऽमृ
आ समन्तात् मृतं मरणं यस्य तदामृतं, संसारमिति यावत्,
भवेत् ॥ "एकं पादं नोत्क्षिपति सलिलाद्धंस उच्चर"न्निति
पाठे—**हंसः** परमशुद्धो भगवान् **सलिलात्** भूते भौतिकरूपा
संसारार्थं **चरन् एकं पादं** भिन्नांशरूपं **नोत्क्षिपति** ऊर्ध्वलो
वैकुण्ठादौ स्वरूपांशत्रयवत् न स्थापयतीत्यर्थः ॥११॥

अङ्गुष्ठमात्रः पुरुषोन्तरात्मा लिङ्गस्य योगेन स याति नित्यम्
तमीशमीड्यमनुकल्पमाद्यं पश्यन्ति मूढा न विराजमानम् ॥ योगिन० ॥१२॥

अङ्गुष्ठमात्र इति । यः **अङ्गुष्ठमात्रः** अङ्गुष्ठपरिमाणः **पुरुष**
पूर्णषड्गुणः **अन्तरात्मा** अन्तर्नियामकः **सोनुकल्पं** प्रतिकल्पं **याति**
रामाद्यवताररूपेण भूलोकादिकं प्राप्नोति । **तं नित्यं** ध्वंसाप्रतियोगि
ईशं स्वामिनं **ईड्यं स्तुत्यं आद्यं** आदौभवं **विराजमानं लिङ्गस्**
देहस्य **योगेन** सम्बन्धेन **मूढाः** अज्ञानिनो जनाः **न पश्यन्ति** ।
यद्वा—**लिंगस्य** मध्ये **योगेन** स्वसामर्थ्येन विशेषेण, स्थितमिति
शेषः ॥१२॥

नात्मानमात्मस्थमवैति मूढः संसारकूपे परिवर्तते यः ।
त्यक्त्वाऽऽत्मरूपं विषयांश्च भुङ्क्ते स वै जनो गर्दभ एव साक्षात् ॥ योगिन० ॥१३॥

नात्मानामिति । य मूढः आत्मस्थं जीवान्तर्गतं **आत्मानं** परामात्मानं **नावैति** न जानाति, **सः संसारकूपे परिवर्तते,** यश्चा**त्मरूपं** भगवत्स्वरूपं **त्यक्त्वा** तत्स्मरणादिकमकृत्वा **विषयान् भुङ्क्ते स जनः** नरः **साक्षात्** अनुपचारेण **गर्दभ एव** ॥ यः स्वहृदये वर्तमानमङ्गुष्ठमात्रं अयं पुरुषो न जानाति, यदज्ञानाच्च साक्षाद्गर्दभ **एव** । तं योगिन एष प्रपश्यन्तीति योजना ॥१३॥

गूहन्ति सर्पा इव गह्वरेषु क्षयं नीत्वा स्वेन वृत्तेन मर्त्यान् (मर्त्याः) ।
ते विप्रमुह्यन्ति जना विमूढास्तैर्दत्तभोगा मोहयन्ते भवाय (स्तैर्दत्तमाद्यं गूहयन्ते भवार्थे) ॥ योगिनस्तं० ॥१४॥

गूहन्ति सर्पा इति । यथा **सर्पाः** गह्वरेभ्यः निष्क्रम्य । **स्वेन** स्वजातिस्वभावेन **वृत्तेन** दंशनरूपव्यापारेण **मर्त्यान् क्षयं** नाशं **नीत्वा गह्वरेषु** गुहासु स्वात्मानं **गूहंति** प्रच्छादयन्ति ॥ एवं श्रोत्रादींद्रियाणि गोलकेभ्यो निर्गत्य स्वेनवृत्तेन विषयानुभवलक्षणेन मर्त्यान्क्षयं नीत्वा गोलकेषु स्वात्मानं प्रच्छादयन्ति 'क्षयं नीत्वे' युक्तः क्षयः कीदृश इत्यतस्तं प्रदर्शयति—**त इति ते विमूढाः** विषयानुभवसक्ताः **जना विप्रमुह्यन्ति** परापरतत्वज्ञानशून्याः भवन्ति । न केवलं ते स्वयं विप्रमुह्यन्ति **तैः दत्तभोगाः**

तैरिन्द्रियैस्सम्पादितविषयभोगाः अन्यानपि **मोहयन्ते** मोहं प्रा
वन्ति । तदेतन्मोहनं **भवाय** संसाराय भवति, यदज्ञानात्संसारमि
योजना ॥ "स्वेन वृत्तेन मर्त्याः । .... तैर्दत्तमाद्यं गूहयन्
भवार्थे" ति पाठे—**स्वेन वृत्तेन** सकृदनुष्ठितेन श्रवणादिन
परमात्मानं **क्षयं** हृदयगुहाख्यं मन्दिरं **नीत्वा गूहन्ति** आच्छा
यन्ति । अनधिकारिणं प्रति नोपदिशन्तीत्यर्थः ॥ तत्र दृष्टान्तमाह—
सर्पा इवेति । **गह्वरेषु** गुहासु मण्डलीभूय शयानाः **सर्पा** स्वशिरो
रत्नमिव ॥ **ते मर्त्याः विप्रमुह्यन्ति** भगवान् जीवाभिन्नः, निर्गुणो
निराकार इत्यादिमिथ्याज्ञानं ये प्राप्नुवन्ति ॥ कुतः **विमूढ**
'तत्त्वमस्या'दि श्रुतितात्पर्याज्ञानिनः ॥ अधिकारिणस्तु **ते** ज्ञानिभि
र्दत्तमुपदिष्टं हरिं स्वहृदये निधाय स्वयमपि **गूहयन्ति** अनधि
कारिणंप्रति छादयन्ते । तदेतद्गूहनं **भवाय** शोभनाय भवति
"विद्या ह वै ब्राह्मणमाजगामे"ति श्रुतेः ॥१४॥

असाधना वापि ससाधना वा समानमेतद्दृश्यते
मानुषेषु ।
समानमेतदमृतस्योत्तरस्य युक्तास्तत्र मध्वनुतं
(मध्व उत्सं) समापुः ॥ योगि० ॥१५

भगवतो महिमान्तरमाह—**असाधना** वेति । **असाधन**
मोक्षसाधनरहिताः **वा, ससाधनाः** तत्साधनसहिता मानुषाः तिष्ठन्ति
तेषु **मानुषेषु एतत्** ब्रह्म **समानं,** न्यूनाधिकभावरहितं **दृश्यते**
योगिभिरिति शेषः । **उत्तरस्य** पुरुषार्थेषु उत्कृष्टस्य मोक्षस्य विष
एतत् ब्रह्म **समानं** तत्तद्योग्यतयेति शेषः । योग्याय मोक्षं दिशति

अयोग्याय न नयतीति यावत् ॥ एतदेव विशदयति—**युक्ता इति** तत्र योग्यायोग्यजीवेषु **ये युक्ताः** योग्यतावन्तो जनाः **मध्वनुतं** मध्वनाम्ना वाय्ववतारेण नुतं प्रेरितं ब्रह्म **समापुः** सम्यक् प्रापुः। "नुतनुन्नाः तन्निष्ठ्यूतविद्धक्षिप्तेरिताः समा" इत्यमरः। 'मध्व उत्सं समापु'रिति पाठे—मध्वः मधुनः आनन्दस्य **उत्** उत्कर्षेण संशेतेऽस्मिन्निति उत्सं शयः, मुख्याधिकारिणं परं ब्रह्म **समापुः** प्रापुरित्यर्थः। तत्र नुमागमाभावः छान्दसः॥ अमृतस्येतरस्येति। **अमृतस्येति** पाठे मोक्षस्य **इतरस्य** संसारस्य विषये **समानं** योग्यतानुसारेण उभयप्रदमित्यर्थः ॥१५॥

उभौ लोकौ विद्यया व्याप्य यान्ति तदा हुतं
चाऽऽहुतमग्निहोत्रम्।
मा ते ब्राम्हीलघुतामादधीत (तदा हुत्वा चानुहुतमग्निहोत्रम्।
मात्रे ब्राह्मीं लघुतामादधाना) प्रज्ञामस्य नाम धीरा
लभन्ते। योगिनस्तं० ॥१६॥

उभाविति। यत् **धीराः लभन्ते** तत्र तत्प्रज्ञा यदा स्यात्। **तदा हुतमप्यग्निहोत्रं अहुतं** स्यात् अग्निहोत्रादिकर्मफलं ज्ञानेनैव भवतीति यावत्। तदा **विद्यया उभौ लोकौ व्याप्य** उभयत्रापि भोगान्भुक्त्वा परब्रह्म **यांति**। हे राजन्! **ते ब्राह्मी विद्या लघुतां मा आदधीत** मा सम्पादयेत् ॥ "तदाहुत्वा चानुहुतमग्निहोत्रं। मात्रे ब्राह्मीं लघुतामादधाना" इतिपाठे—**मात्रे** तन्मात्रात्मके देहे **ब्राह्मीं** ब्रह्म वेदः, तत्सम्बन्धिनीं, तत्प्रतिपाद्यमिति

यावत् **लघुताप्रसारतां आदधानाः** मन्वानाः **अनुहुतं** ज्ञानानु-
कूलतया हुतं पूर्वैरनुष्ठितं **अग्निहोत्रं हुत्वा**—। **धीरा** धिया रमन्ते
इति धीराः **अस्य** भगवतः **प्रज्ञां** अपरोक्षज्ञानं **लभन्ते नाम**। तत्
विद्यया **उभौ लोकौ व्याप्य** प्राप्य **तत्र** भोगान्भुक्त्वेति यावत्
इमं परमात्मानं **यान्ति** प्राप्नुवन्ति ॥२६॥

एवंरूपो महानात्मा पावकं पुरुषोऽङ्गिरः (महान्पूज्यं
पावकं पुरुषोगिरन्)।
यो वै तं पुरुषं वेद तस्येहात्मा न रिष्यति(ते)॥ योगिन०॥१७॥

एवंरूप इति। एवंरूपः पूर्वोक्तगुणविशिष्टः **महान्**व्याप्तः
आत्मा अन्तर्नियामकः **तं पावकं** नामस्मरणमात्रेण सकलपातक-
नाशकं **पुरुषं** पूर्णषड्गुणं भगवन्तं **इह** अधिकारिवर्गे **यः अङ्गिरः**
अङ्गिनि अङ्गदेवता युक्ते भगवति रमतेत्यङ्गिराः **पुरुषो** अधिकारी
वेद तस्य आत्मा स्वरूपं **न रिष्यति** न दुःखाद्यनर्थं प्राप्नोति। यद्वा
आत्मा परमात्मा **न रिष्यते** फलदो भवतीति यावत्। 'प्रयोजना-
क्षमे नष्ट' इति प्रयोगस्य लोके बहुलं दर्शनात्। उक्तं चैतत्
"तस्याहं न प्रणश्यामी"ति वाक्यव्याख्यानावसरे॥ 'पूज्यं च
पावकं पुरुषोगिरन्' इति पाठे—**पावकं** अग्निं, यद्वा पावकं पवित्र-
संपन्नं **कं** वायुं **गिरन्** संहरन् आस्ते **यः तं वेद** इत्यर्थः ॥१७॥

सदाऽध्वसात्कृतोऽस्यान्नं न मृत्युरमृतं कुतः।
सत्यानृते सत्यसमानुबन्धिनी सतश्च योनि-
रसतश्चैकमेव ॥ योगिन० ॥१८॥

सदाध्वासात्कृतोस्यान्नमिति। **सतः** सज्जनस्य **असतो** दुर्जनस्य च **योनिं** कारणं, पोषकं तथा । यद्वा **सतः** मूर्तस्य **असतः** अमूर्तस्य **योनिं** कारणं, "मूर्तं सदिति संप्रोक्त" मिति श्रुतेः । **एकं** प्रधानं **अन्नं** अन्नस्थं अदनात् अन्ननामकं भगवन्तं **अध्वसात्** अध्वने सर्वं इत्यध्वसात्, मोक्षमार्गार्थं **कृतः** कुर्वतः, अल्पाहारं कुर्वत इति यावत् , तदेव **अमृतं** अमृतप्रायं कुर्वतः, अल्पाहारेप्याहारचिन्तामकुर्वतः इति यावत् **अस्य** ज्ञानिनः **मृत्युः** संसारो नेति योजना । पुनः कीदृशस्य ? **सत्यसमानुबन्धिनी** सत्य समत्वेनानुबन्धीत इति सत्यसमानुबन्धिनी सत्यस्यैव समाने **सत्यानृते** "सत्य ॐमिति संप्रोक्तं यन्नेत्याहानृतं हि तत्" इति स्मृतेः । "ॐमिति सत्यानृतं तदेतत्पुण्यं फलं वाचं" इति श्रुतेश्च । **सत्यं** सति सत्पात्रालाभे धनालाभे वा नेति वचनं, ते उभे **कृतः** कुर्वतः ॥१८॥

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा न दृश्यतेऽसौ हृदये निविष्टः ।
अन्तश्चरो दिवारात्रमतंद्रितं तं मत्वा कविरास्ते प्रसन्नः । योगिन० ॥१९॥

अङ्गुष्ठमात्र इति । चरतीतीति **चरः** **यः** सृष्ट्यादौ **नित्यं** प्रवर्तते । **तं नित्यमतन्द्रितो** भूत्वा **मत्वा** मनोविषयं कृत्वा **कविः** ज्ञानी **प्रसन्नः** स्वरूपसुखमनुभवन् सन् **आस्ते** ॥१९॥

तस्माच्च वायुरायातः तस्मिंश्च प्रलयस्तथा ।
तस्मादाग्निश्च सोमश्च तस्माच्च प्राण आगतः ।
योगिन० ॥२०॥

तत्प्रतिष्ठा तदमृतं लोकास्तद्ब्रह्म तद्यशः ।
भूतानि जज्ञिरे तस्मात्प्रलयं यान्ति तत्र च ।
योगिन० ॥२१॥

इदानीं भगवतः सृष्टिस्थितिसंहारकर्तृत्वादिमहिमानमाह-**तस्मादिति** । **वायुः** मुख्यप्राणः, प्रलयस्तस्यैति शेषः । **प्राणः** अहंकारिकः ॥ **तद्** ब्रह्म **प्रतिष्ठा** सर्वस्याश्रयः । **तदमृतं** । **तद्ब्रह्म** **लोकः** सर्वलोकनियामकं । **तद्यशः** यशोरूपं । **तस्माद्भूतानि** ॥
॥२०—२१॥

उभौ च देवौ पृथिवीं दिवं च दिशाश्च शुक्रं भुवनं बिभर्ति ।

तस्माद्दिशः सरितश्च स्रवन्ति तस्मात्समुद्रा विहिता महान्ताः ॥ योगिन० ॥२२॥

उभाविति । **उभौ च देवौ** सूर्यचंद्रमसौ **दिवं** स्वर्गं, **भुवनं** तदितरलोकं **दिशाश्च शुक्रं बिभर्ति** । तस्मात् ब्रह्मणः सकाशात् **दिशः** साकाः दिशः स्वकार्यं कुर्वन्ति । **सरितश्च स्रवन्ति** । **तस्मादेव** **महान्तो** लक्षयोजनादिपरिमाणा **समुद्राश्च विहिताः** एतादृशगुणविशिष्टं भगवंतं योगिन एव प्रपश्यंति ॥२२॥

यः सहस्रं सहस्राणां पक्षानाहृत्य सम्पतेत् ।
नान्तं गच्छेत्कारणस्य यद्यपि स्यान्मनो जवः ॥
योगिन० ॥२३॥

साकल्येनावेद्यत्वलक्षणं भगवन्महिमानमाह–**यः सहस्रमिति** । **यः सहस्राणां सहस्रं पक्षान्** गतिसाधनत्वसाधर्म्यान् तच्छन्दप्रतिपाद्यान् भारतादिग्रन्थानाहृत्य सम्यगधीत्य **सम्पतेत्** भगवन्तं सम्यग्विचारयेत् यथा **मनोजवः स्यात्** । तथापि **कारणस्य** जगत्कारणस्य भगवतः **अन्तं न गच्छेत्** ॥ यद्वा–**सहस्राणां** मासानां **पक्षान्** पुनः सहस्रपक्षांश्च **समाहृत्य सम्पतेत्** सम्यग्जीवेत् यः, **यद्यपि**त्यादि योजना ॥२३॥

अदर्शने तिष्ठति रूपमस्य पश्यन्ति चैनं
सुसमिद्धसत्वाः ।
हीनो मनीषी मनसाऽभिपश्येद्य एवं विदुरमृतास्ते
भवन्ति ॥ योगिन० ॥२४॥

अदर्शन इति । **अदर्शने तिष्ठति** दर्शनविषयो न भवतीति यावत् । तर्हि तद्दर्शनं शून्यं स्यादिति तत्राह—पश्यन्तीति । **सुसमिद्धसत्वाः** सुष्ठु समिद्धं अभिवृद्धं सत्वं सत्वगुणो येषां ते तथा **एनं** भगवन्तं **पश्यन्ति** ॥ तद्दर्शने साधनान्तरमपेक्षितमिति भावेनाह–हीन इति । **हीनो** रागद्वेषादिरहितः **मनीषी** शास्त्रार्थज्ञानवान् **मनसाऽभिपश्येत्** जानीयात् ॥ तद्ज्ञानफलमाह–य एनमिति ॥२४॥

इमं यः सर्वभूतेषु आत्मानामनुपश्यति ।
अन्यत्रान्यत्र युक्तेषु स किं शोचेत्ततःपरम् ॥
योगिन० ॥२५॥

इममिति । योऽन्यत्रान्यत्र अन्यान् यस्मिन् लोकेषु सम्ब
धेषु इममात्मानमनुपश्यति स ततःपरं तादृशज्ञानानन्तरं शोचे
त्किं ? संसारदुःखं प्राप्नुयात्किं ? न प्राप्नुयादित्यर्थः ॥२५॥

यथोदपाने महति सर्वतः संप्लुतोदके ।
एवं सर्वेषु भूतेषु ब्राम्हणस्य विजानतः ॥
योगिन० ॥२६॥

यथोदपाने इति । यथा तृषितस्य उदपाने कूपे तृषानिवृत्ति
रूपं यत्प्रयोजनं भवति, सर्वतः संप्लुतोदके महति ततोऽधिकं
प्रयोजनं भवति, एवं सर्वभूतेषु ब्रह्म विजानतो ब्राह्मणस्य काम्य
कर्मादिना जायमानं स्वर्गादिफलं, ततोप्यधिकं मोक्षादिफलं भवती
त्यर्थः ॥ अनेन स्वर्गादिसर्वफलसाधनज्ञानविषयत्वरूपं भगवन्माहा
त्म्यमुक्तं भवति ॥२६॥

अहमेवास्मि वो माता पिता पुत्रोस्म्यहं पुनः ।
आत्माहमास्मि सर्वस्य यच्च नास्ति यदस्ति च ॥२७॥

इदानीं भगवतो गुणान्तरप्रतिपादकं भगवता जीवान्प्रत्युदी
रितं वाक्यमनुवदति भगवान्सनत्सुजातः । यद्वा—अन्तर्याम्यपेक्षय
सनत्सुजातस्येदं वाक्यं “ अहं मनुरभव ”मित्यादि वामदेववाक्यवत्

उक्तं च भगवता सूत्रकारेण– " ओंशास्त्रदृष्ट्या तूपदेशो वामदेववत् ओं" (२-१-३०) यदिदानीं **अस्ति यच्च नास्ति** अस्य **सर्वस्व आत्मा स्वामी** ॥२७॥

पितामहोऽस्मि स्थविरः पिता पुत्रश्च भारत ।
ममैव यूयमात्मस्था न मे यूयं न चाप्यहम् ॥२८॥

भारतेति धृतराष्ट्रं प्रति सनत्सुजातस्य सम्भोधनं ॥ भगवद्वाक्य-पक्षे **भा** दीप्तिः, ज्ञानमिति यावत् तस्मि**न्रते** ति आसक्तेति । भगवतो जीवान्प्रति समुदायापेक्षया सम्बोधनं, हे जीवाः! **यूयं ममैव आत्मस्थाः** मदाधाराः । **न मे यूयं, न चाप्यहमिति** स्वस्य लेपाद्यभाव-सूचनार्थः ॥२८॥

आत्मैव स्थानं मम जन्म चात्मा ओतप्रोतोऽहमजर-
प्रतिष्ठः ।
अजश्चरो दिवारात्रमतन्द्रितोऽहं मां विज्ञाय
कविरास्ते प्रसन्नः ॥२९॥

इदानीं स्वस्यानपेक्षत्वमाह-**आत्मेति । मम आत्मैव** परमात्मैव **स्थान** माधारः । " स्वे महिम्नी " ति श्रुतेः । आत्मैव **जन्म** प्रादुर्भाव नियामकः । **अहमात्मन्येव ओतप्रोतश्च ।** कीदृशः ? **अजरप्रतिष्ठः** अजरः जरारहितः, प्रतिष्ठा वैकुण्ठादिलोके स्थितिर्यस्य स तथा ॥२९॥

अणोरणीयान्सुमनाः सर्वभूतेष्ववस्थितः ।
पितरं सर्वभूतानां पुष्करे निहितं विदुः ॥३०॥

पुनरपि भगवतो महिमानमाह सनत्सुजातः–**अणोरणीय**
निति । अणोः सूक्ष्मादप्यणीयान् सूक्ष्मतरः । **सुमनाः** सु
चिदानन्दस्वरूपं मनो यस्य स तथा । **पुष्करे** हृदयकमले **निहि**
सन्निहितं **विदुः** जानन्ति ॥ योगिनः एतादृशगुणविशिष्टं भगव
योगिन एव प्रपश्यंतीति योजना ॥३०॥

इति श्रीमन्महाभारते शतसहस्र्यां संहितायां उद्योगपर्वा
सनत्सुजातीये षष्ठोऽध्यायः समाप्तः ॥

समाप्तश्चेदं ग्रन्थः

सनत्सुजातवाक्यार्थो वादिराजयतीरितः ।
संक्षेपात् मन्दबुद्धीनां विज्ञानाय प्रदर्शितः ॥

॥ श्री कृष्णार्पणमस्तु ॥

॥ श्री ॥

शुद्धाशुद्धपत्रिका (Errata list)

पुट Page	पंक्ति Line	अशुद्ध Erratum	शुद्ध Correction
२	१९	पपृच्छे	पप्रच्छे
६	२	वादीनां	वादिनां
,,	७	त्यर्थः	इत्यर्थ.
,,	१७	ज्ञानीनां	ज्ञानिनां
,,	२०	स्वात्मनि कृतृ...त्यर्थः	स्वात्मनि स्वतंत्र कर्तृत्वरूप मिथ्याज्ञानमित्यर्थः
७	१६	चेत्युक्त तत्वज्ञान ... प्रयुक्तत्वेन	चेत्युक्ततत्वज्ञानत्वेन
८	६	तदात्म्य	तादात्म्य
,,	१०	मृत्योस्तदभाव	मृत्योस्तदभावा
११	१२	विमार्गात्	विमार्गान्
,,	,,	दुर्मार्गात्	दुर्मार्गान्
,,	१८	तदुभयात्मको	तदुभयात्मक
,,	१९	"यावलिंङ्गान्वितो...	"यावल्लिङ्गान्वितो
१२	४	दिविनिरयादिषु	द्युनिरयादिषु
,,	,,	पुण्येन	पुन्येन
,,	१३	प्रविशंति	प्रविशति
१२	१६	मरणांतरं	मरणानंतरं
,,	१७	कर्मेपिचितं	कर्मोपचितं
१४	६	योगस्य	योगेऽस्य

पृष्ठ Page	पंक्ति Line	अशुद्ध Erratum	शुद्ध Correction
१५	८	संसारदनुत्यानस्य	संसारादनुत्थानस्य
१५	१	पूर्वानुभूतान्तानेव	पूर्वानुभूतान् तानेव
,,	६	प्राप्त्य	प्राप्त्या
१६	४	कार्यभूतक्रोधा अनुस्यूत	कार्यभूतक्रोधानुस्यूत
,,	७	संसाराया	संसाराय
,,	१७	मृत्युमृत्यु	मृत्युर्मृत्यु
,,	१९	एवं	एव
१८	६	ज्ञानिरेव	ज्ञान्येव
१९	६	भूतनां	भूतानां
,,	२०-२१		omit
२१	१९	प्राप्ताहमित्यादि	प्राप्तमहमित्यादि
२२	४	विमश्यतेति	विनश्यते
,,	५	स्वरूपतो नाश	स्वरूपतो मृत्योःना
२९	११	त्यदयो	त्यादयो
३०	१६	एवमाचरित सकाम	एवमाचरिताकाम
,,	१८	स्थितो तस्मिन्स्थितौ	तस्मिन्स्थितो
३१	६	उत्तरपूर्वाद्य	उत्तरपूर्वाघ
,,	८	सिद्धं	सिद्धि
३२	४	तत्रविद्धि	विद्धि
,,	१६	नार्योर्थायेह	नार्थोर्थायेह
३३	३	फलानुसाधनेन	फलानुसंधानेन
,,	८	कस्यैवं	कस्यैव
,,	१३	भुत्राधिकं	मुत्राधिकं
,,	१६	बलवंतं	बलवत्त्वं
,,	१६	संद्धर्षा	संद्धर्षो
३४	३	सुरूारागिणं	सुखरागिणं

पुट Page	पंक्ति Line	अशुद्ध Erratum	शुद्ध Correction
३४	१०	'कर्मणामस्पर्धे'	कर्मणामस्पर्धे'
३६	२	तृणस्थोदकस्य	तृणस्योदकस्य
,,	३	भूयस्त्वं	च भूयस्त्वं
३७	३	प्राप्ति	प्राप्तिः
,,	७	ज्ञानि	ज्ञानी
,,	१२	वाऽकथयमानस्य	वाऽकथय मानस्य
३९	१	हन्तुमर्हति	मन्तुमर्हति
,,	६	देवामहिम्नः	देवमहिम्नः
,,	१०	महिमानत्वेन	महिमत्वेन
,,	११	लिगसंबन्धशून्यं	लिंगसंबंधशून्यं
४०	१०	स्यादनादाता मंसतो	स्यादना दाता (अनाद्यनात्) संमतो
,,	१४	अनादानात्	अनादाता
,,	१५	स्वीकारात्	स्वीकर्ता
४१	३	विषयेऽन शिष्टवत्	विषये न शिष्टवत्
,,	१९	श्वानाः	श्वानः
४२	६	भवतीति	भवंतीति
४४	७	मानिनः	मानिताः
,,	८	२९	१९
,,	,,	नावमानेऽतु	नावमानेतु
,,	१२	मानिनः	मानिताः
४४	१६	मानिनो ज्ञानिन इति, यद्वा-मानिनः	मानिताः ज्ञानिन इति, यद्वा मानिताः
४६	१७	ज्ञानानां	ज्ञानिनां
,,	,,	महद्भि	असाद्भि
,,	१९	तैरवतो मानितोपि	तैरवमानितोपि

पृष्ठ Page	पंक्ति Line	अशुद्ध Erratum	शुद्ध Correction
४६	३	सन्मानितोऽपि	मसन्मानितेऽपि
४७	८	मुमुक्षुणस्ततद्धेयेह	मुमुक्षुणः तत् हेय
,,	१४	सदोषित्वेन	सदोषत्वेन
,,	१५	प्राप्त	प्राप्ता
,,	२०	विद्या	विद्याः
४८	९	दुराचाराणि	दुराचराणि
५१	१८	आचारमाणः	आचरमाणः
५४	२	सिद्धत्वादज्ञानपूर्कानुष्टान	सिद्धत्वादज्ञान पूर्वकानुष्टान
५५	१९	यथा	तथा
,,	२०	नित्ययुक्तो	नित्यमुक्तो
५६	१८	विविधा	द्विविधा
५७	१३	तेषमेव	तेषामेव
६८	,,	परिचक्ष इति	परिचक्षते इति
६१	४	निष्टूरता	निष्टुरता
६२	१८	कोपयुज्यत	क्रोपयुज्यत
६३	११	प्रसंसी	प्रशंसी
,,	२१	सन्निष्टधर्माणां	तन्निष्टधर्माणां
६४	१७	इत्यर्थ	इत्यर्थे
६५	१	देवतोद्देशिक	देवतोद्देश्येक
,,	२१	सामग्रिभिः	समग्रीभिः
६६	६	निर्दुष्टगुणादि	निर्दुष्टज्ञानादि
,,	१२	निर्दुष्टत्व	निर्दुष्ट
,,	,,	भगवन्निष्टत्वा	भगवन्निष्टत्व
६७	८	सामर्थ्यं	असामर्थ्यं

ृट	पंक्ति	अशुद्ध	शुद्ध
age	Line	Erratum	Correction
७	९	दमे कृते	कृतेः
	२१,२२	विवादादि पञ्चकान्यत्र उपलक्षितानि	omit
८	३	द्वंदा असहिष्णुता	द्वंदासहिष्णुता
	७	आरब्धकर्मणोऽन्तगामित्वं	आरब्धकर्मणो ऽनन्तगामित्वं
	१३	दमदोषा	मददोषा
	१६	शम इति	शन इति।
९	३	दमदोषा:	मददोषाः
	१३	(३३ २७)	(३।२७)
	१४	(३१ २८)	(३।२८)
०	१६	पुत्रत्यागस्तादशरथादौ	पुत्रत्यागः दशरथादौ
	१८	इष्टापूर्ं	इष्टापूतं
	१९	पूर्तं	omit
१	१०	(३३२६)	(३।२६)
	१३	(३३२७)	(३।२७)
	१५	सावदः	सावधानः
	१९	न्यूनं	न्यूनं (ध्य नं)
२	१२	केलिः रागोपरक्तविनोदः	omit
	,,	सर्जीवन	स्वजीवन
	१६	"दमोऽष्टादोषस्या"	"दमोऽष्टादशदोषःस्या"
	,,	न्यूनमित्यन्तेन	ध्यानमित्यन्तेन
२	९	देवोत्तमावतारि	देवोत्तमावतार
	१९	सुवर्गाल्लोकाच्च्यवन्तं	सुवर्गाल्लोकाच्च्यवन्ते
३	४	व्यजयन्निव	व्यञ्जयन्निव

पृष्ठ Page	पंक्ति Line	अशुद्ध Erratum	शुद्ध Correction
७५	२	एवोत्तमत्व	एवोत्तमत्वं
७६	१	पृष्टोसि	omit
,,	३	फलश्रुतिभुदाहरति	फलश्रुतिमुदाहरति
७७	१९	श्लाघतं	श्लाघ्यते
७९	४	एवोत्तमपात्रामित्युत्तरग्रन्थे	एवोत्तमपात्रत्व मित्युत्तरग्रन्थे
८०	१	। इत्यादि	इत्यादि ।
,,	४	सत्यस्य	सत्यस्य ।
,,	१०	पुंसि कं शिरोम्बुनी''	पुंसि कः कं शिरो म्बुनो''रि
८२	६	बहुवागित्वादि	बहुवागित्यादि
,	१०	शीलामित्यर्थः	शीलनमित्यर्थः
,,	२०	तप्तमुद्रधारणादि	तप्तमुद्राधारणादि
८४	३	सत्यज्ञानमेवाश्यक	सत्यज्ञानमेवावश्य
,,	७	वेदपाठ	वेदपाठा
८५	६	स्वच्छन्दयोगेने	स्वच्छन्दयोगेन
८६	१०	बहुष्व्रकः	बहुष्वेकः
,	१४	वेदं	वेद्यं
८७	१५	बहुशाखिनोर्वेद	बहुशाखिनो वेद'
८८	७	इस्यनेन भगद्गुण	इत्यनेन भगवद्गुण
८९	९	वृत्यां	वृत्या
,,	१६	अभीत्यव्ययबला ब्राह्मणोत्तमं	अभीत्यव्ययबला ब्राह्मणोत्तमं
९१	१६, १७	ज्ञानप्राप्तिरितिर्ना न्येनेति	ज्ञानप्राप्तिः नान्येनेति

ट Page	पंक्ति Line	अशुद्ध Erratum	शुद्ध Correction
१	२०	नेच्छेत	नेच्छेत्
२	१-२	निवर्तेत, निवर्तेत इत्यर्थः	आवर्तेत
२	८-९	नियमात्किमित्युच्यते	कथनात्किमित्युच्यते
३	११	सर्वशब्दाथ	सर्वशब्दार्थ
	१३	मित्यर्थः	मित्याशंक्य
	१६	चेन्न	omit
४	३	निष्पत्तीकरण	निष्पत्तिकरण
	११	वेति	चेति
	१३-१४	वैयाकरणीति निर्णायीति	वैयाकरण इति निरणायि
	१६	ब्रह्मण	ब्राह्मण
६	११	अपरीक्षणेति	अपरोक्षेण इति
७	६	प्रथमो	प्रथमं
	१३	"पञ्चषडायनार्था भाः पूर्वेषामपि पूर्वज"	"पञ्चषड्डायनार्था भाः पूर्वेषामपि पूर्वजा"
	१४	सामर्थ्युपेतत्वेन	सामर्थ्योपेतत्वेन
८	१०	भगवन्निष्टसंपन्न	भगवन्निष्टासंपन्न
	१४	अतत्	एतत्
	१८	विद्या। ब्रह्मविद्या	विद्या ब्रह्मविद्या ।
	१९	अहिंसाकृत	अहिंसा सहकृत
१	३	कामात्	(कामात्) देहात्
	६	ह्मचर्यमिति	ब्रह्मचर्यमिति
३	१०	शास्त्रशासनं	शास्त्रं शासनं

पृष्ट Page	पंक्ति Line	अशुद्ध Erratum	शुद्ध Correction
१०३	१४	पादं ब्रह्मचारिभ्य:	पादं सब्रह्मचारिभ्यः
१०४	३	ब्रह्मार्थयोगेन	ब्रह्मचर्यं ब्रह्मार्थयोगेन
,,	५	माचार्याय	माचर्यया
,,	१०	तदाचार्यया	तदाचर्यया
१०७	७	एनं बिभर्ति	एनं न बिभर्ति
,,	१५	अत्मनि	आत्मनि
११०	७	परं	परे
११२	७	शब्दस्य ।	शब्दस्य
,,	९	नृशंसास्य	नृशंसस्य
११४	५	संवसेन्नेव	संवसेन्नैव
११६	२०	वेद्वाचां	वेदवचसां
११९	२	महज्जोति	महज्ज्योति
,,	११	महज्जोतिः	महज्ज्योतिः
१२०	३	ब्रह्मण'	ब्रह्माण'
,,	१८	(अपोऽथाद्धः	आपोऽथाद्धयः
,,	२०	वर्तमाना	वसाना
१२२	१	अच्छादयंतौ	आच्छादयन्तौ
१२५	२१	अर्धे	अर्धं
१३३	११	चंनै	चैनं